चपाच्छुः शः पदांते वर्तमानाः चपादुत्तरस्य शकारस्य छो वा भवत्यचि परे वाक्छूरः वाक्शूरः अचि किम् वाक् श्योतति होरुभाः चपादुत्तरस्य हकारस्य रुभा वा भवंति यहर्गगस्तु पस्तहर्गगस्तु यो भवति तद्धविः तद्हविः वाग्घरिः वाग्हरिः अब्भारः अह्वारः स्तोः श्चुभिः श्चुः सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ भवतः उद्दिश्यमानमतिनिर्दिश्यमानयोऽयथाक्रममिश्चुरिति पुंल्लिंगनिर्देशोयमित्येके नपुंसकनिर्देशोयमित्यन्ये श्चुभिरिति॰ ॥ तिवाच्यम् कश्चरति कश्शूरः तच्चित्रम् तच्छादयति ॥

सहादियोगं विनापि सहार्थे तृतीया स्यादिने तिनिर्देशात् अत्र स्थान्यादेशयोर्यथासंख्यमस्ति निमित्तस्थानिनोस्तु न यथासंख्यं न शादिति ज्ञापकात् उद्दिश्यते इति उद्दिश्यमानः स्थानीति निर्दिश्यते विधीयते यः स निर्दिश्यमानः आदेशस्तयोर्यथाक्रमं यथासंख्यं वक्तव्यं चवर्गयोगे कश्चरतीति कश्शूर इत्यत्र शसिवेत्यस्य पाक्षिकत्वात् विसर्जनीयस्य सस्तस्य शकारेण योगे शः तच्चित्रमित्यत्र चवर्गयोगे तवर्गस्य चुत्वं तच शिव इत्यत्र शकारेण योगे तोः श्चुत्वम् ॥ ॥

नशात् स्तोः श्चुरित्यनुवर्त्तते शात्परस्य सस्य शकारप्रसंगो नास्ति अतः शात्परस्य तोः श्चुत्वं न प्रच्छ ज्ञीप्सायां विच्छ गतौ आभ्यां नङ् कीति नङ् प्रत्ययः ङ्वि
ति कसेङ्कौ ष्नमे चेति छस्य शत्वं नङो ङित्वात् गुणाभावः प्रच्छेस्तु संप्रसारणं न भाष्येऽनुक्तत्वात् ॥ ष्टुभिः ष्टुः स्तोरित्यनुवर्त्तते ष्टुचटवर्गश्च ष्टुश्च ताभ्यां ष्टुभिः ष्टुच ष्टु
नानयोः समाहारः ष्टु नपुंसकनिर्देशोपमित्यत्र के पासहितः ष्टुः ष्टुः शाकपार्थिवादित्वान्मध्यमपदलोपः इति पुंल्लिङ्गनिर्देशोपमित्यन्ये इहापि स्थान्यादेशयो
र्यथासंख्यं निमित्तस्थानिनोस्तु न न पीति निषेधात् स्तोः ष्टुभिर्योगे ष्टुः स्यादिति नषितो ष्टुर्न स्यात् षकारे परे तोरिति किं कष्टु पृष्ठः पीति किं तट्टीकाषीति सप्तमीनि
र्देशात्पूर्वे षकारे ष्टुत्वं स्यादेव तोरेवेति टोरन्त्यात् स्तोरित्यनुवर्त्तते अंते भवोऽन्त्यस्तस्माद्दन्त्यात् अंतशब्देन पदान्तं कथ्यते भवार्थेऽण्यः णिनोवेति णित्वविकल्पा

नशात् शकारात्परस्य तवर्गस्य श्चुत्वं न भवति प्रश्नः विश्नः ष्टुभिः ष्टुः सकारतवर्गयोः षकारटवर्गाभ्यां योगे षकारटवर्गौ भवतः कष्टः तट्टीकते न पि षकारे परे तवर्गस्य ष्टुत्वं न भवति भवान्षष्ठः टोरन्त्यात् पदान्ते वर्त्तमानाट्टवर्गात्परस्य स्तो ष्टुर्न भवति षण्नरः षड्नरः षट्सीदंति नवतिनगर्योर्न षण्णवतिः षण्णगर्यः सुपो न लिट्सु दनात्सस्य वा धुट् लिट्त्सु ॥ ॥

ष्टुत्वाभावः पदान्ते स्थितात् टोः परस्य स्तोः ष्टुत्वं न भवति पदान्तात् टोः किं ईट्टे टोः किं सर्पिष्टमं जमेज्जमावेति जमे षण्नरः जवभावपक्षे षड्नरः नरइति बहुवचनं
नवतिनगर्योर्न पदान्ताट्टवर्गात्परयोर्नवतिनगरीशब्दयोः ष्टुत्वं भवति टोरन्त्यात् इति निषेधो न प्रवर्त्तते इत्यर्थः ॥ षड्भिरधिका नवतिरित्यत्र षष्ण्ड लक्षते
नस्य ष्टुत्वं ततः कचिज्जवत्वे ततो डस्य णः षण्णवतिः षट्नगर्यः इत्यत्र नस्य ष्टुत्वं ट्सत्र मत्व षण्णगर्यः स्वादीनां सुपित्तस्य न टवर्गात्परस्य स्वादीनां तका
रस्य सकारस्य ष्टुत्वं न भवति सुपि सप्तमीबहुत्वे ॥ ॥ ॥ श्रीरामचन्द्राय नमः ॥ ॥ ॥ ॥ ॥

सि॰ कौ॰ पू॰ तोर्लिः तोर्मितिकिं शक्नोमीति शक्लुनातीति लिङ्गितिकिं तदन्न पकारवकारलकाराः सानुनासिका निरनुनासिकाश्च तत्र सानुनासिकस्य नकारस्य स्थाने सानुना

टी॰ स॰ सिक एव लो भवतीत्यर्थः उदः स्थास्तंभोः सलोपः उदः परयोः स्थास्तंभोः सकारस्य लोपो भवति उत्थानं निरुद्धौ स्तंभु निरोधने सलोपे कृते खसेचपा कृ सानाः

१५ मितिदस्यतः उत्थानं नः सक्यछते नांतस्य पदस्य सकुस्यात् अवः परो यस्मात्सः अवपरस्तस्मिन् अवपरे छते कित्वादंते सकोऽकार स्तूच्चारणार्थः कृसांते ई

स्यांकां श्यापा पदस्यांते भवति नस्यापदांतत्वान्नश्चापदांते कृसेइ स्यनुस्वारः तस्य सगागमो भवतीति वचनेतु नस्यानुस्वारेण स्यात् सकोनकार स्यभक्तत्वात्

तस्य पदांतत्वाऽनपायात् आगमाः टित्किन्मितस्ते यस्य गुणीभूता यद्गुणीभूताः यस्य विशेषणीकृतास्तद्ग्रहणेन विशेष्यग्रहणेन कृत्वाते आगमाः आ।

तोर्लिः तवर्गस्य लकारे परे लकारः स्यात्तल्लुनाति भवाँल्लिखति अनुनासिकाननुनासिकत्वेन द्विधा यवलास्तत्र नकारस्या

नुनासिको लकारः उदः स्थास्तंभोस्सलोपः उत्थानम् उत्तंभनम् नः सक्छते नांतस्य पदस्याव परे छते सगागमो भवति राजँ

श्छिन्नम् भवाँस्लनोति अवपरे किम् सन्त्सरुः नप्रशानः प्रशान्तनोति शेचकुवानांतस्य पदस्याव परे शेवाच गागमो भवति

भवान्ष्णूरः भवान्खरः भवाञ्झूरः भवाञ्छूरः ॥ ६ ॥ रचार्यैर्गृह्यंते अभ्युपगम्यंते पथा समागमः पदस्य विहितः पदं विशेष्यं स गाग

मो विशेषणं पदग्रहणेन सक् गृह्यते सक्पर्यंतं पदमित्यर्थः पदस्येति किं हंति नांतस्येति किं तद्दीकते छते किं भगवन् कुरु अवपरे छते किं सन् त्सरुः खड्गमुष्टिः

नप्रशानः प्रशानिति नांतस्य पदस्य सगु न भवत्यवपरे छते प्रपूर्वात् शाम्यतेः क्विप् अनांतस्योपधायादीर्घ इत्यनेन दीर्घः मोनोधातोरितिनः नस्यासिद्धत्वा राम॰

ल्लोपो न प्रशाम्यतीति प्रशान् शेचकानदृत्यनुवर्तते नांतस्य पदस्य चकुस्याद्वाशे पदस्येति किं दंशः शेइति किं भवान्श्छिनोति चकुवाइत्यत्र वाक्येसाचि १५

वसामपेक्षते इत्युक्तत्वात् जबाभावः भवान् शूर इत्यत्र चगागमस्य कित्वात् पूर्वांतत्वेन चपाच्छः शइति छत्वविकल्पः पक्षे हसात्परस्य हसस्येति चलोपः नकारस्या
नुस्वारपरसवर्णौ टपदांतत्वात् भवाञ्छूरः भवाञ्चछूरः भवाञ्शूरः भवाञ्चशूरः अछौञ् चछौञ् चशौञ् शाविति चतुष्टयं रूपाणामिह चकु छत्वचलो
पानां विकल्पनात् कुर्वंस्तिष्ठ कुर्वञ्चूर्छते इत्यत्राः पदांतनकारस्य स्थानेऽनुस्वारचुत्वाभ्यां परत्वात्प्राप्तं णत्वं न कस्मात् असिद्धं बहिरंगमंतरंगे इति परिभाष
या बहिरंगयोः सकुचकोरसिद्धत्वात् अनंतेइत्यंतरंगेण णत्वनिषेधे सति न च छात्वं शच्छंभुरित्यादौ चोः कुरिति कुत्वमपि न अंतरंगे कुत्वे कर्तव्ये चुत्वकोरसि
द्धत्वात् कुत्वविधिस्तुवाभ्यां वस्य नोत्पादादावेकपदस्थे चवर्गे सावकाशः चपाच्छः शः अन्वयुक्तो छसादावित्यादि निर्देशात् ॥ ङ्णोर्ह्रस्वाद्द्विः स्वरे ङ् च

ङ्णोर्ह्रस्वाद्द्विः स्वरे ङकारणकारनकारा ह्रस्वादुत्तरा द्विर्भवंति स्वरे परे पदांते च प्रत्यङ्ङिदम् सुगण्णिह राजन्निह ह्रस्वा

॥ त्किम् प्राङास्ते पदांते किं परमदण्डिनौ ॥

पचन् चैते ङ्णनः पदांते इत्यनुवर्तते ह्रस्वात्परः पदांते स्थिताः ङणना द्विः स्युः स्वरे परे ह्र
स्वादिति किं प्राङ् आस्ते सुगण् आस्ते भवान् आस्ते ङ्णनः इति किं किम् आस्ते स्वरे किं प्रत्यङ्करोति सुगण् वदति पचन् वदति पदांते किं दण्डिनौ ननु समिद्दंडि
नावित्यादौ पूर्वपदस्यैव चोत्तरखंडस्यापि प्रत्ययलक्षणेन पदत्वात् तस्य द्वित्वं स्यात् उच्यते उत्तरखंडस्य प्रत्ययलक्षणेन पदांतकार्यं न एरोतोतः वत्विनो
वित्यादौ निर्देशात् अतएव परमवाचौ परमगोदुहौ परमलिहावित्यादौ कुत्वघत्वढत्वादीनि न भवंति ननु अनन्व इत्यादौ नस्य द्वित्वं स्यात् उच्यते ॥
अनंते अनपीत्यादिज्ञापनान्न द्वित्वम् ॥ ॥ ॥ ॥

सि॰चं॰ पू॰ही॰ सू॰ १६

च्छः ह्रस्वादित्यनुवर्तते छकारे अकारस्उच्चारणार्थः तेनविछिन्नमित्यादिसिद्धानिखसेचपारुसानां रुसानांचपास्युः खसेपरेरुसानामितिकिंखन्सुखसेकिं बे
थिरीघोत दीर्घात्परः छकारेहिःस्यात् पदांताद्दीर्घाद्वा पदांताद्दीर्घात्परः छोवाद्विःस्यात् आङ्माङ्भ्यांनित्यं पदांताद्दीर्घाद्विस्यापवादोयं आङ्माङ्
भ्यांपरः छोद्विःस्यान्नित्यं पुंसोऽवपरेखपेसंयोगांतस्यलोपोनपुंस् शब्दस्यसस्यलोपोनभवति अवःपरोयस्मात्सः अवपरस्तस्मिन् अवपरेखपेसंयोगांते
स्यलोपः इतिप्राप्तावयंनिषेधः अवपरेकिंपुंसीरंसलोपोत्रखपेकिंपुंदासः अत्रापिसलोपःख्याधातौवा पुंस् शब्दस्यसकारस्यलोपोवाभवति चक्षिङः।
ख्यान्न् इतिख्याधातौपरेपुंख्यानमितिचसिद्धोधुदिरूपं मोनुस्वारः पदांतेइत्यनुवर्तते पदांतेमोनुस्वारःस्यात् हसेपरे पदांतेकिंगम्यते मइतिकिंभवान्हस

छः ह्रस्वात्परस्छकारेद्विर्भवति खसेचपारुसानाम् तवछत्रम् तवच्छत्रम् दीर्घाचहौ च्छः पदांताद्दीर्घाद्वा लक्ष्मीछाया लक्ष्मी
च्छाया आङ्माङ्भ्यांनित्यम् आच्छादयति माछिदत् पुंसोऽवपरेखपेसंयोगांतस्यलोपोनपुंस्कोकिलःपुंस्पुत्रः अवपरेकिम् पु
ङ्सीरम् खपेकिंपुन्दासःख्याधातौवा पुंख्यानम् पुङ्ख्यानम् मोनुस्वारः मकारस्यानुस्वारोभवति हसेपदांतेच तंहसति पदं
ख्यापदांतेकिंगम्यते हसेकिंकिमत्रनश्चापदांतेरुसे नस्यमस्यचापदांतेवर्तमानस्यानुस्वारोभवति रुसेहकारेचपरे यशां
सि पुम्स्याम् स्वनडुांहि अपदांतेकिं ब्रह्मन्नुपाहि रुसेकिं तन्यते यमायपेस्य ॥ ""तिहसेकिं फलमस्तिमइत्यत्राकारउच्चारणार्थः अ

नुस्वारइति पूर्वाचार्याणांसंज्ञा नश्चापदांतेरुसे चकारोमकारस्यसमुच्चयार्थः अपदांतेनस्यमस्यचानुस्वारःस्यात् रुसेपरे अपदांतेकिं भवान्भातिरुसेकिं।
मन्यते यम्यते ॥ यमायपेस्य अस्येति यपयपमशार्थे अनुस्वारस्यानुवृत्त्यैवलाभात् अपदांते अनुस्वारस्ययमाभवंति यपेपरेतेयमा अस्ययपस्यसवर्णाभ
वंतीत्यर्थः सानुनासिकस्यानुस्वारस्यसानुनासिकाएवयमाःस्युः यमाइतिबहुवचनंजातौज्ञेयंकुंडंरथेनेत्यत्रानुस्वारस्यपाक्षिकोयमोनरकारस्यानुनासिकत्वात् रा॰म॰ १६

यथेकिं आकंस्यते स्तनडुंहि अनुस्वारस्येतिकिंराजन् गछ गम्यते अंकपदेलक्षणेचेति चुरादिण्यंतात् क्तः सेटो: क्तक्तवत्वोर्निलोपइति णेर्लोपः अनेना
नुस्वारस्यङः अकिलक्षणे इत्यस्माद्धातोः क्तः नुमोनुस्वारे परसवर्णेनङः अङ्कितः अंचेः पूजायामिडितीट् पूजार्थस्यांचतेर्नेति नलोपोन अंचितः कुटिप्र
तिघाते क्तः नुमोनुस्वारे परे परसवर्णेनणः कुण्ठितः शमुउपशमे क्तः दांतशान्तपूर्णदस्तस्पष्टछन्नज्ञप्ताः इति निपात्यन्ते इतिनिपातनादिडभावः जनांतस्योपधायादीर्घः क्वाविति दी
र्घः मस्यानुस्वारे परसवर्णेननकारः शान्तः गुंफ ग्रंथे क्तः मस्यानुस्वारे परसवर्णेनमः गुम्फितः ननु कुर्वन् तीसवाने नहत नस्य नस्य णत्वं कस्मान्न उ

अपदान्ते वर्तमानस्यानुस्वारस्य यमाभवंति यपेपरे अस्य यपस्य सवर्णाः शान्तः अङ्कितः अञ्चितः कुण्ठितः गुम्फितः वा
पदांतस्य पदांते वर्तमानस्यानुस्वारस्य यमावाभवंति यपेपरे अस्य यपस्य सवर्णाः त्वङ्करोषि त्वंकरोषि नन्तनोति तंतनोति
सँय्यन्ता संयंता सँव्वत्सरः संवत्सरः यँल्लोकम् यंलोकम् मोराजिसमः क्वौ क्विवंते राजतौ परे समो मस्य म एव स्यात् सम्राट् य
वलमनपरे हकारे मस्य यवलमना वा किंम्ह्यः किंह्यः किंव्ह्लयति किंह्लयति किँह्लादयति किंह्लादयति किंम्ह्मल
यति किंह्मलयति किन्न्हुते किंन्हुते शसे चपस्य द्वितीयो वा वत्सरः वथ्सरः अफ्सरः अप्सरः ॥ ९ ॥ ५ ॥ १० ॥

ष्यते असिद्धं वहिरंगमंतरंगे इति परसवर्णस्यासिद्धत्वान्नणत्वं वा पदांतस्य अत्रानुस्वारस्यानुनासिका एव यमा वास्युः क्विवंते राजतौ परे समो मस्य
म एव मकारस्य मकारवचनमनुस्वारनिवृत्त्यर्थं राजतौ किं गमादीनां चमस्येति मलोपे ह्रस्वस्येति तुक् संयत समइति किं इदं राट् क्विवंते इति किं संराजि
तव्यं संराजते इति राजटी सं पूर्वात् स्मात् त्रिमाने क्विप् यत्व इत्व चपत्वानि सम्राट् यवलमनपरे हकारे मस्य यवलमना वा यश्च वश्च लश्च मश्च नश्च ते य
वलमनाः यवलमना परे यस्मात् सः यवलमनपरस्तस्मिन् यवलमनपरे हकारे मस्य यवलमना वा भवंति ह्मल ह्मल संचलने हुङ् अपनयने शसे चपस्य
द्वितीयः वर्गप्रथमानां द्वितीया भवंति शसे परे ॥ ५ ॥

नपदांते। पदांतेस्थितानांवर्गप्रथमानांद्वितीयानभवंति कुकुटुकुवर्जितस्यचपस्यविभक्तौनचपस्यविभक्तौद्वितीयानस्युः कुकुटुकोश्चद्वितीयाः सुर्विभक्तौप
रेटनातस्यवाधुट् टश्चनश्चतयोः समाहारः टनंतस्मात् टकारनकाराभ्यांपरस्यसकारस्यधुट्वास्यात् धुटश्चपत्वेनतकारः ततः शसेचपस्येत्यनेनतका
रस्यथोनचपत्वस्यासिद्धत्वात् षट्त्संतः शसेङ्णोः कुकुटुकौवा ङकारणकारयोः कुकुटुकावागमौवास्तः शसेपरे कुगभावेप्राङ्षष्ठः कुगागमेप्राङ्क्षष्ठः कु
कोद्वितीयेप्राङ्खषष्ठः पकारेपरेन्दूण् नकारस्यन सवा नृनित्यस्य नकारस्यन्स् आदेशः स्याद्वापिपरे पकारे अकारउच्चारणार्थः तेननॄः पुनाति इत्या
दिसिद्धानित्त्रोर्विसर्गः सचरुवसौतयोः स्रोः पदांतेस्त्रोर्विसर्गः स्यात् धात्वधातुसाधारणमिदं अधातोः स्त्रोर्विसर्गः स्याद्रसेपरेपदांतेचपदांतेकिम

नपदांते तत्साधुः कुकुटुकुवर्जितस्यविभक्तौन भवत्सु टनात्सस्यवाधुट् षट्त्सन्तः षट्संतः सन्त्सः सन्सः शसेङ्णोकुकुटुकौ
वा प्राङ्क्षष्ठः प्राङ्खषष्ठः प्राङ्षष्ठः सुगण्त्साधुः सुगणट्साधुः सुगण्ट्साधुः पकारेपरेन्दून् नकारस्यनसवा स्त्रोर्विसर्गः॥॰
सकाररेफयोर्विसर्गोभवत्यधातोरसेपदांतेच कुप्वोः ᳵकᳶपौवा कवर्गपवर्गसंबंधिनिखसेपरे विसर्गस्य ᳵकᳶपौवाभवतः॥
कपावुच्चारणार्थौनॄᳶपाहि नॄः पाहि नॄन्पाहि ॥ इतिहससंधिः ॥ ःः स्यात् ब्रूयात् पयस्तोवारिरसेकिंचातुर्यस्तुप्रत्ययेपरे
रस्यविसर्गोनचतुर्षितिनिर्देशात् तेनगीर्षुवार्षुपूर्षु इत्यादिसिद्धमितिनापेत्यः भार्गवइत्यादौतुवहिरंगायाव्दृद्धेरसिद्धत्वान्नविसर्गः वर्धवर्त्मेत्यादौकर्तृ
वाचनयोरितिनिर्देशान्नविसर्गः कुप्वोः ᳵकᳶपौवा आदेशनिमित्तयोर्यथाक्रममत्रास्तिआदेशेककारपकारावुच्चारणार्थौकेवलयोर्जिह्वामूलीयोपध्मानी
ययोरुच्चारणासंभवात् किंचककारखकारयोः परतः ᳵकः स्यात् पकारफकारयोश्च ᳶपः स्यात् कुप्वोरितिकिंकश्चारः वाग्नहणात्पक्षेविसर्गः विसर्ज
नीयस्यसद्धत्वस्यापवादोयंउपध्मानीये नॄᳶपाहिविसर्गेनॄः पाहिन्सभावे नॄन्पाहि । इतिहससंधिः ॥ ॥ श्रीहरिः ॥ ॥ ॥

विसर्जनीयस्य सः विसर्गस्य सकारः स्यात् खसे परे कस्तनोतीत्यत्र विसर्गस्य सत्वे कृते तस्य पुनर्विसर्गादेशो न असिद्धत्वाद्विधिसामर्थ्याद्वा शसपरे।
खसे विसर्जनीयस्य विसर्ग एव शसः परो यस्मात्स शसपरस्तस्मिन् शसपरे खसे विसर्जनीयस्य विसर्जनीय एव भवति न त्वन्यत् यदि तु शसपरे खसे नेत्येवोच्ये
त तर्हि यत्कृते सत्वे निषिद्धेपि ᳲकᳲपौ स्यातां विसर्गवचनात्तु विकारमात्रमपि निषिध्यते तेन वासः क्षौमं आद्भिः प्सातमित्यादौ विसर्ग एव शसेवा शसे परे विस
र्जनीयस्य विसर्जनीय एव वा भवति पक्षे सः कस्त्सरुः कुत्तं कष्पंडः कुत्तं खपपरे शसे विसर्गलोपो वा खपः परो यस्मात्सः खपपरः तस्मिन् खपरे शसे।
विसर्जनीयस्य लोपो वा भवति वाग्रहणात्पक्षे शसे वेति विसर्गसत्वे च त्रैरूप्यं हरिस्फुरति हरिःस्फुरति हरिस्स्फुरति वाचस्पत्यादयो निपातनात् सिद्ध्यंति ॥

विसर्जनीयस्य सः खसे परे कस्तनोति शसपरे खसे विसर्जनीयस्य विसर्ग एव कः त्सरुः घनाघनः क्षोभणः शसेवा कश्शूरः कः शूरः
कष्षंडः कः षंडः कस्साधुः कः साधुः खसपरे शसे विसर्गस्य लोपो वा हरिस्फुरति हरिःस्फुरति हरिस्स्फुरति कुप्वोःᳲकᳲपौ वा कःᳲकरो
ति कः करोतिकᳲपचतिकः पचति वाचस्पत्यादयो निपातात्सिध्यंति वाचस्पतिः बृहस्पतिः तस्करः कौतस्कुतः कान्कान् कांस्कान्।

सिद्धस्वरूपोच्चारणं निपातनं तस्मादेते शब्दाः सिद्धिं यांतीति वाचः पतिरित्यत्र षष्ठ्या अलुक् ॥ भास्करः पयस्पात्रम् पयस्कल्पम् पयस्कम्॥ ॥
निपातनाद्विसर्गस्य सत्वं वाचस्पतिः ततश्चौर्यं करोतीति दकारस्य सत्वं निपातनात् तस्करः बृहतां पतिरिति निपातनात् तकारस्य सत्वं बृहस्पतिः कुतः कुत
आगत इत्यत्र त्यप् तनाविसर्गेन आगम्य तत्प्रत्यये प्राप्ते गणपाठसामर्थ्यादण् प्रत्ययपरिलोपश्च निपातनाद्विसर्गस्य जिह्वामूलीयाभावः कौतस्कुतः कान् कानिति अत्र ए
कः किम् शब्दः प्रश्नोद्दितीयो नेदार्थे समागमाभावो त्र भिन्नार्थत्वात् गणे चाम्रेडितस्यैव ग्रहणात् कान्कुत्सितान् पश्यसीत्यर्थः कांस्कान् इति अत्र आम्रेडितत्वात्तु
पूर्वनकारस्य सगागमो भवति निपातनात् कांस्कान् कान्कान् पश्यतीत्यर्थः कः कड् इति कस्कः जिह्वामूलीयाभावो त्र भासः करोतीति भास्करः जिह्वामूलीयभावः।
कुत्सितं पय इति पयस्पात्रं तु सापामिति पाशः ईषदूनं पयश इति पयस्कल्पं ईषदसमाप्तावितिकल्पप् कुत्सितं पयश इति कुत्सितेर्थे कः पयस्कं ॥ ॥ ॥

आत्मनो यश इच्छतीति काम्यच्प्रत्यये यशस्काम्यति । इत्यादौ विसर्गस्य जिह्वामूलीयोपध्मानीयाभावो निपातनात् कुत्सितं सर्पिरिति सर्पिष्पाशं ईष-
न्न्यूनं सर्पिरिति सर्पिष्कल्पं कुत्सितं सर्पिरिति सर्पिष्कं आत्मनः सर्पिरिच्छतीति सर्पिष्काम्यति इत्यादौ विसर्गस्य षत्वं निपातनात् नमस्करोति नमः करोतीत्यत्र
विकल्पेन सकारविसर्गौ निपातनात् पुरस्करोतीत्यत्र जिह्वामूलीयाभावः निष्प्रत्यूहं आविष्कृतं दुष्कृतमित्यादौ विसर्गस्य षत्वं निपातनात् तिरस्कर्त्ता तिरः क-
र्त्तेत्यत्र विकल्पेन सकारविसर्गौ द्वौ वारौ करोतीति द्विष्करोति द्विः करोति त्रीन् वारान् करोतीति त्रिष्करोति त्रिः करोति चतुरो वारान् करोतीति चतुष्करोति चतुः
करोति द्वित्रिचतुर्भ्य इति सुः चतुर्षु कपालेषु संस्कृत इत्यर्थे अण् द्विगुसमासे ऽ लोलुक् चतुष्कपालः चतुःकपालः सर्पिष्करोति सर्पिः करोति धनुः करोति धनु

यशस्काम्यति सर्पिष्पाशम् सर्पिष्कल्पम् सर्पिष्कम् सर्पिष्काम्यति नमस्करोति पुरस्करोति निष्प्रत्यूहम् आविष्कृतम् तिरस्कर्त्ता
द्विष्करोति द्विःकरोति त्रिष्करोति त्रिःकरोति चतुष्करोति चतुःकरोति चतुष्कपालं सर्पिष्करोति सर्पिःकरोति धनुष्करोति धनुःकरो-
ति सर्पिष्कुण्डिका सर्पिःकुण्डिका अयस्कारः अयस्कामः अयस्कुम्भः अयस्पात्रम् अयस्सहिता कुशा अयस्कुशा अयस्क-
र्णी अधस्पदम् शिरस्पदम् आकृतिगणोयम् अविहितलक्षणस्सकारो वाचस्पत्यादिषु द्रष्टव्यः ॥ ॥ ॥ ॥ छ

ष्करोतीत्यादौ विकल्पेन विसर्गस्य षत्वविसर्गौ निपातनात् सर्पिषो घृतस्य कुंडिकेति सर्पिष्कुंडिका नित्यं षत्वमत्र अयः कार इत्ययस्कारः अयसः काम
इत्ययस्कामः अयसः कुंभ इत्ययस्कुंभः इत्यत्र विसर्गस्य जिह्वामूलीयाभावः अयसः पात्रमित्ययस्पात्रमित्यत्रोपध्मानीयाभावः अयस्सहिता कुशेत्ययस्कु-
शा वेदे औदुंबरं शंकुशेति व्यवहरंति अयोविकारे तु कुशीति अयइव कर्णौ यस्याः सा अयस्कर्णी नासिकोदरेतीप् इत्यत्र जिह्वामूलीयाभावः पदस्या-
ध इत्यधस्पदं शिरसः पदमिति शिरस्पदम् इत्यत्रोपध्मानीयाभावः आकृत्या स्वरूपेण गण्यते यः स आकृतिगण इति ॥ ॥ ॥ ॥

रात्रिषु पदान्तो ऽहन् शब्दस्य विसर्गस्य रः स्यात् रात्र्यादिवर्ज्जितेषु परतः रात्रिष्विति बहुवचनमादिशब्दार्थं तेन रात्रिरात्ररूपरथंतरणि रात्र्यादयः अहर्गणइ
त्यहर्गणः अहइति नस्य रः अहः अहइत्यहरहः वीप्सायां द्वित्वम् अहश्च रात्रिश्चानयोः समाहारः इत्यहोरात्रः समासांतो ऽप्रत्ययो ऽत्र रात्राह्नाहंता इति पुंस्त्वम्
अहो रात्रिरेषा इदमहः एषा रात्रिरस्तीत्यर्थः प्रशस्तमह इत्यहोरूपं प्रशंसायां रूपमिति रूपः अहोरूपः गुणवाचको रूपशब्दोप्यत्र रथंतरं सामवेदसंज्ञा अहोरथंतरं
एषु विसर्गस्य उत्वं नत ओत्वं पदान्ते किमहोभ्याम् अतोत्सुः आदवेलोपशि इत्यस्यापवादोयमतः परस्य विसर्गस्य उत्वं स्यादति अत इति किम् अग्निरत्र तपरः किंदे
वा अत्र सुम्नोतः ३ अत्र दूराद्धाहूतेऽनिन्द्र इति प्लुतः अतीति किं देव इह तपरः किं देव आगतः तिष्ठतु पयः अग्निदत्तेत्यत्र गुरोरनृत इति प्लुतः विसर्गस्य उत्वे ओत्वे च एदो

रात्रिषु। अहो विसर्ज्जनीयस्य पदान्ते रो भवति न तु रात्र्यादिषु अहर्गणः अहरहः अरात्रिषु किम् अहोरात्रः अहोरूपम्॰ ॥
अहोरथन्तरम् अतोत्सुः अकारात्परस्य विसर्ज्जनीयस्योकारो भवत्यति परे "कोर्थः" हवे अकारात्परस्य विसर्ज्जनीयस्योका
रो भवति हवे परे देवो याति मनोरथः आदवे लोपशः अवर्णात्परस्य विसर्ज्जनीयस्य लोपश्च भवत्यवे परे देवा अत्र वाता वान्ति
देव इह स्वरे यत्वं वा देवायिह भोतः भोस् भगोस् अघोस् इत्येतस्य विसर्ज्जनीयस्य लोपश्च भवत्यवे परे भोहरे भगो नमस्ते ॥

ति म इत्यल्लोपः कोर्थः हवे अत इत्यनुवर्तते अतः परस्य विसर्गस्य उत्वं स्यात् हवे आदवे लोपशि इत्यस्यापवादोयम् अतः किम् वायुर्वेदः तपरः किं वे धावन्त्यः हवे कि
म देवः पश्यति आदवे लोपशः आदिति पंचम्यन्तं न तु तपरत्वं दिव ओड् इत्यादिनिर्देशात् अवे किं देवाः संति स्वरे यत्वं वा लोपश्चो विकल्पेनाऽपचादोयम् अव
र्णात्परस्य विसर्गस्य यत्वं वा स्यात् पक्षे लोपश्च स्वरे किं एम अतुरः भोसः भोस् भगोस् अघोस् इति सकारांता निपाताः संति तत्राऽऽद्यं ताभ्यां मत्याहारो भोस्
इति प्रहीतः भोस इति पर्यन्तं भोस् भगोस् अघोस् एषां विसर्गस्य लोपश्च स्यादवे अवे किं भोस्तपस्विनः ॥ ॥

स्वरे यत्वम्वा। भोस् भगोस् अघोसां विसर्गस्य यत्वं वा भवति स्वरे पक्षे लोपश् नामिनोरः नामिन इति किम् एमोवेदः अवेकिं अग्निः करोति रेफप्रकृतिकस्य खपे वा।
रेफः प्रकृतिर्मूलकारणं यस्य स रेफप्रकृतिकः तस्य रेफप्रकृतिकस्य विसर्गस्य रकारो वा भवति खपे परे वा न हणात् पक्षे विसर्गोपध्मानीयौ अहन् शब्दस्य विसर्ग
स्य रोरविधिरित्वे विसर्गे चकृते ऽयं विधिः प्रवर्तते अहर्पतिः अहःपति अहꣵपतिः रः षष्ठ्यंतमिदं रेफस्य स्थाने विहितो यो विसर्ज्जनीयस्तस्य रो भवत्येवे
परे अवेकिंप्रातः कालः रेफप्रकृतिकस्येति किं एमोनमः रिलोपो दीर्घश्चर इति षष्ठ्यंतमनुवर्तते रि इति सप्तम्यंतं रो लोपः स्याद्रेफे परे चकाराद्विधेययोर्लोप

स्वरे यत्वम्वा। भोस् भगोस् अघोस् विसर्गस्य स्वरे यत्वम्वा भवति। भोयेहि भगोयेहि अघोयपगच्छत नामिनोरः नामिनः
परस्य विसर्ज्जनीयस्य स्वरे रो भवत्यवे परे अग्निरत्र पटुर्व्वक्ता उषसो बुधे उषसो विसर्ज्जनीयस्य रेफो भवति बुधे परे उषःबुधः
उषर्बुधः रेफप्रकृतिकस्य खपे वा गीर्पतिः गीꣵपतिः अहर्पतिः अहःपतिः अहꣵपतिः रः रेफसम्बंधिनो विसर्ज्जनीयस्य रे
फो भवत्यवे परे प्रातरत्र अन्तर्गतः रिलोपो दीर्घश्च रेफस्य रेफे परे लोपो भवति पूर्वस्य च दीर्घः पुनारमते हरीराजते भानूरम्यः
शम्भूराजते सैषाद्हसे सशब्दादेषशब्दाच्च परस्य विसर्ज्जनीयस्य लोपो भवति हसे परे स चरति एष हसति ॥ ॐ ॥

दीर्घयोः समुच्चयार्थः तेन पूर्वस्वरस्य दीर्घश्चरीति किम् प्रातर्वायुः र इति किं मनोरथः सैषाद्हसे सश्च एषश्च तयोः समाहारः सैषं तस्मात् अनञ्समासे ऽक।
कालसैषात् परस्य विसर्गस्य लोपः स्यात् हसे परे स इति एष इति च कृतात्वसत्वस्य तच्छब्दस्य एतच्छब्दस्य चानुकरणम् अनुकार्य्यानुकरणयोर्भेदे ऽर्थवत्वाद्विभ
क्त्युत्पत्तौ सत्यां द्वन्द्वे विभक्तिलोपे चकृते नामत्वात् ङसिपरतः स्यटोभावः द्वन्द्वे सर्वादीनां न सर्वकार्य्यमिसुक्तत्वात् अककारात् किम् एषको हद्दः अनञ् समासे।

सशब्दाद्धिसर्गस्यलोपः स्वरे लोप एव पादपूरणं चेत् सदिति शब्दस्य विसर्गस्य लोपः स्यात् स्वरे परे चेद्यदि लोपे सत्येव पादः पूर्यते पादः श्लोकचतुर्थांश इति पादपू
रणमिति किं सएवमुक्त्वा लोप एवेत्यवधारणादन्यथा पादपूरणे लोपो न सोहमाजन्मशुद्धानामिति सएष रामोस्ति कीदृशः दशरथस्यापत्यन्दाशरथिः अ
तइञ्जनवेषितोम् सएषयुधिष्ठिरः कीदृशः राजेति इतिराजा सएषकर्णः कीदृशो महानात्मा सौ त्यागश्च महात्यागः महात्यागोस्ति यस्य स महात्यागी मतोपधा इति
नावितीन् सएषभीमः कीदृशो महानात्मा सौ बलश्च महाबलः महाबलोस्ति यस्य स महाबलः अइकौचेत्यप्रत्ययः १ ॥ इति विसर्गसन्धिः ॥ ५ ॥ अविभक्ति
नाम ॥ विभक्तेरन्यदित्यविभक्ति अन्यच्छब्देन शब्दरूपं विशेष्यं गृह्यते ॥ नत्क्लीवे तस्य विशेषणमिदं सत्त्वे विभक्तिशब्देन तंत्रादिना विभक्तिः विभक्त्यंतं चेत्सुभ

सशब्दाद्धिसर्गस्यलोपस्स्वरे लोप एव पादपूर्णं चेत् सैष दाशरथी राम सैष राजा युधिष्ठिरः सैष कर्णो महात्यागी सैष भी
मो महाबलः ॥ ॥ इति विसर्गसन्धिः ॥ ॥ अविभक्तिनाम ॥ ॐ गणपतये नमः ॥ ॥

पर्युदासे विभक्तिशब्देन सदृगन्यः नञ्पुरुषो नञ्तु द्विधा तथाहि द्वौ नञौ तु समाख्यातौ पर्युदासप्रसज्यकौ पर्युदासः सदृग्ग्राही प्रसज्यस्तु निषेधकृत् १ प्राधान्यं न तु विधे
र्यत्र प्रतिषेधे प्रधानता पर्युदासः सविज्ञेयो यत्रोत्तरपदेन नञ् २ अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता प्रसज्यस्तु सविज्ञेयः क्रियया सह यत्र नञ् ३ एवं हि विभक्तिभि
न्नं विभक्त्यंतभिन्नमर्थवत्स्वरूपं संज्ञि नाम च संज्ञा विभक्त्यंतभिन्नमिति कथनेन धातून्व्यावृत्तिः कृतातेपांतिवादि विभक्त्यंतत्वात् तच्छब्दरूपम् नाम प्रातिपदि
कमुच्यते कीदृशं तत् अविभक्ति पर्युदासोऽयं नञ् प्रयुज्यते विभक्तिसदृशं विभक्तिभिन्नमित्यर्थः विभक्तिसदृशमिति कथनेनार्थवदेवागतं पुनः कीदृशं विभक्त्यंतभि
न्नमिति कथनेन धातुवर्जितमित्यागतं पुनः कीदृशमर्थवत् अत्रार्थशब्दोऽभिधेयवचनः न तु धननिवृत्तिप्रयोजनवचनः यथार्थवान् धनवानित्यर्थः ॥ ॥

मयकार्यो धूमः मयकनिवृत्तये इत्यर्थः ॥ कोर्थः किं प्रयोजनमित्यर्थः ॥ तत्राभिधेयं तु चतुर्विधं जातिगुणक्रियाद्रव्यभेदात् जातिशब्दाः यथा गौः अश्व इत्यादयः गुणश ब्दा यथा शुक्लः कृष्ण इत्यादयः क्रियाशब्दा यथा पाचकः गंतेत्यादयः द्रव्यशब्दा यथा डित्थः कपित्थः इत्यादयः ननु वंध्यापुत्राभावशशविषाणगगनकुसुमादी नामर्थोऽभावादेषां नामसंज्ञा न स्यादिति चेदुच्यते अभावोपि पदार्थांतरत्वेनाभिधेयवत्वात् भावशब्दस्य सिद्धा संज्ञा वंध्यादिशब्दार्थः पुत्रादिशब्दार्थं अप्रसिद्ध पदनयोः संसर्गमारोप्य शब्दप्रयोगसंभवात् तेषामप्यस्ति ॥ ॥ विभक्तिरहितमिति किं हरिषु करोषि सुप्तिपोर्माभूत् पदादित्वात्तस्य योनस्यात् विभक्त्यं तरहितमिति किं वेदौ भवंति अत्र हित्वाद्यनभिधानेप्यव्ययादिवच्चैकवचनं स्यात् धातुवर्जितमिति किमहन्नित्यत्र नाम्नोनोलोपशिस्यनेन लोपः स्यात् ॥

॥ विभक्तिरहितं धातुवर्जितं चार्थवच्छब्दरूपं नामोच्यते तस्मात् ॥

अहन्नित्यत्राहृ इत्यनेन सत्वं तु न तस्य लाक्षणिकत्वात् अर्थवदिति किं धनं वनमित्यादौ यनि वर्णसंज्ञा माभूत् अत्र वार्तिकं कृत्तद्धितसमासाश्चेति चकारोऽनुक्त समुच्चयार्थः तेन निपातस्यानर्थकस्य प्रातिपदिकसंज्ञा वक्तव्येति तस्मात् इत्यधिकारोऽयं धातोरित्यतः प्राक्स्याद्योऽप्याद्यश्च प्रत्ययानाम्नः परः सुः तस्मादिति पंचमीयं न विश्लेषावधौ विश्लेषस्यासंभवात् किंतु क्ते आदिषु दिक्शब्दपाठाद्दिग्योगलक्षणा पंचमी तत्र परः पूर्वो वा इत्यनियमे नाऽध्याहारे प्रशक्ते वहु वीऽक्षेर्येसत्वर योगे वेत्यनेन वहोः पूर्वत्वस्यानियतत्वादन्यः प्रत्ययः पर एवेति परशब्दोऽध्याहार्यः ॥ ॥ ॥ ॥ ॥ ॥

सि औजस १ अमौट्शस २ टाभ्यांभिस ३ ङेभ्यांभ्यस ४ ङसिभ्यांभ्यस ५ ङस ओस आम ६ ङि ओस सुप् ७ सिप्रत्ययस्येकारोऽत्वसोः स्तावित्यादौ विशेषणार्थः जस
सकारो जकार शकारौ जसीशसीत्यनयो र्विषयविभागार्थौ नप्रत्ययस्य टकारः टेन टानाटौ सोः तड्योभित्यादौ भेदकः ङे ङसि ङस् ङी नामु ङकारस्तु ङि नोस्यादौ विशे
षणार्थः ङसेरिकारो ङसिङ्टिमिविशेषणार्थः सुपुप्रत्ययस्य पकारः प्रत्याहारार्थस्तेन सिपुप्रत्याहारो यथा स्यात् स्यादित्यादि भेदतो विभक्ति र्द्विधा तत्र सि औ जस् इत्या
दीनां सप्तानां त्रिकाणां प्रथमाद्याः सप्तम्यंताः प्राचां संज्ञास्ताभिरिहापि व्यवहारस्तेषु त्रिकेषु त्रीणि त्रीणि वचनानि एकश एकवचन द्विवचन बहुवचन संज्ञकानि संति
एकत्व द्वित्व बहुत्वेषु एकत्व द्वित्व बहुत्व शब्दाः इह संख्यापराः संति तेन बहुः पर्वत इति वैपुल्यवाचिनो ग्रहणं न आश्रय द्रव्यगतेषु एकत्व द्वित्व बहुत्वेषु सत्सु एकवच

सि · औ · जस · अम · औ · शस · टाभ्याम् · भिस · ङे · भ्याम · भ्यस · ङसि · भ्याम् · भ्यस · ङस · ओस · आम · ङि · ओस · सुप् · नाम्नः प

रस्स्यादयस्सप्तविभक्तयो भवन्ति एकत्व द्वित्व बहुत्वेषु एकवचन द्विवचन बहुवचनानि स्तोर्विसर्गः देवः देवौ जसो जकारो

जसीति विशेषणार्थः देवाः ॥ ॥ ११ नद्विवचनबहुवचनसंज्ञकाः प्रत्यया भवंति उच्यते ऽनेनेति वचनं एकस्य वचनमेकवचनं द्वयोर्वचनमिति
द्विवचनं बहूनां वचनमिति बहुवचनं सरूपाणामेकशेष एकविभक्तौ एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते रूप्यते बोध्यते इति रूपमर्थः ॥
समानरूपं येषां ते सरूपाः स्थूलादित्वात्समानस्य सादेशः तथा समानं रूपं सरूपं येषां ते सरूपाः सरूपाश्च सरूपाश्चेति सरूपास्तेषामित्येकशेषेण व्याख्यानम् एक
विभक्तावितिविभक्ति सामीप्ये उपलक्षणं नत्वेकशेषे निमित्तं एवं चानैमित्तकत्वेनांतरंगोयमेकशेषः स्यादुत्पत्तेः प्रागेव प्रवर्तते यद्येतन्नारभ्येत तर्हि प्रत्येकं विभक्तिः ।
स्याद्द्वंद्वश्च प्रवर्तेत अत एवैकशेषो भवति न तु द्वंद्वः अनेकपदाभावात् ननु स्याद्युत्पत्तेः प्रागेकशेषप्रवृत्तौ शिष्यमाणं यत्प्राति पदिकं तदेकमेवार्थं बोधयतीति द्वि
वचनाद्युत्पत्तौ देवौ देवा इत्यादि न सिध्येत् उच्यते शिष्यमाणो लुप्यमानार्थकथयति एकशेषस्य वृत्तिषु पाठात् परार्थाभिधानं वृत्तिरिति अत एव लुप्तेपि प्रत्ययेलिङ्गधुक्

सि॰ च॰ पू॰ इत्यादौ कर्तामतीयते एकस्यां विभक्तौ परतः सरूपाण्येवेति किं मातृशब्दयोर्जननी परिच्छेतृवाचिनोर्नैकशेषो भवति मातृभ्यां मातृभिरित्यादौ सारूप्येति औजसादिषु वैरू
टा॰ दु॰ प्यान्नन्वेवं पयः १२ पयं २१ नयति देवदेव इत्यादावतिप्रसंगः स्यादिति चेदुच्यते सहविवक्षायामेकशेषः प्रवर्तते इतरेतरयोगे द्वन्द्वस्य विषये इत्यर्थो नात्र ॥ ॥
२१ ॥ अम्शसोरस्य समानाद्वेर्लोपो ऽधातो रित्यतः समानादिति लोप इति अधातोरिति चानुवर्तते अधातोः समानात्परयोरम्शसोरकारस्य लोपः स्यात् अधातोरिति
किम् श्रियं भुवमित्यादावियुवौ सेनान्यं खलपमित्यादौ यो सोमपामित्यादौ सवर्णे दीर्घः समानादिति किम् रायं ग्लावं सो नः पुंसः पुंल्लिंगात्समानान्तान्नाम्नः परस्य श

अम्शसोरस्य समानादुत्तरयोरम्शसोरकारस्य लोपो भवति देवम् देवौ शस शकार इत् शसो ऽ ति विशेषणार्थः सो नः पुंसः पु
ल्लिङ्गात्समानादुत्तरस्य शसस्सकारस्य नकारादेशो भवति नत्वाम्शसीत्यात्वे शसि शसि परे पूर्वस्य दीर्घो भवति यदादेशस्त
द्वद्भवति नतु वर्णमात्रविधौ देवान् टकार इत् टेनेति विशेषणार्थः टेन अकारान्तात्परष्टा इनो भवति देवेन० ॥ ॥० ६०

सः सस्य नः स्यात् शसइत्यनुवृत्तं लिंगं नामार्थ इति मते पुंस इति पंचमी पुल्लिंगात्समानांतान्नाम्न इति पदात्तु लिंगं प्रत्ययार्थस्तदा पुंस इति षष्ठी समानांतान्नाम्नः रा॰ म॰
परस्य पुंसो वाचकस्य शसः सस्य नः स्यादिति उक्तं च एकं द्विकं त्रिकं चाथ चतुष्कं पंचकं तथा नामार्थ इति सर्वे ऽमी पक्षाः शास्त्रे निरूपिताः १ इति स्वार्थे द्रव्यलिंगसं २१
ख्याकारकात्मकः पंचको नामार्थः उक्तपंचसु पूर्वस्य पूर्वस्य नामार्थत्वे परः परो विभक्त्यर्थो ज्ञेयः शब्दप्रवृत्तिनिमित्तं स्वार्थो ऽस्ति स्वार्थश्चानेकविधः स्वरूपजातिगुणक्रि
याद्रव्यसंबंधभेदात् स्वरूपं यथा डित्थः पदार्थस्वरूपेण विशिष्टा जातिः कथ्यते गौरिति तदा गोशब्दस्य स्वरूपं स्वार्थो ऽस्ति विशेषणत्वात् जातिस्तु द्रव्यं भवति ॥

विशेष्यत्वात् यदाजात्याविशिष्टोगुणः कथ्यतेयथास्य शुक्लोगुणइतितदाजातिःस्वार्थोभवतिविशेषणत्वात् शुक्लगुणोद्रव्यंभवतिविशेष्यत्वात् यदागुणेनवि
शिष्टंद्रव्यंकथ्यते शुक्लःपटइति। तदाविशेषणभूतोगुणःस्वार्थोभवतिविशेष्यभूतंपटादिकंद्रव्यंभवति यदातुद्रव्यमपिद्रव्यांतरस्यविशेषणंभवति यष्टीःप्र
वेशयेत्यादौतदायष्ट्यादिकंद्रव्यंविशेषणत्वमापन्नंस्वार्थोभवति पुरुषादिविशेष्यंद्रव्यंभवति दंडीत्यादौदंडपुरुषसंबंधःस्वार्थोभवति दंडीतिद्रव्यंविशे
ष्यम्॥ भवतिपाचकइत्यादौक्रियास्वार्थोभवतिपुरुषोद्रव्यंभवति किंच शब्दस्ययत्रविश्रांति र्वाच्यंद्रव्यं तदिष्यते पर्यवसानभूमिरित्यर्थः तत्त्वानेकप्रकारंजाति
गुणःक्रियाद्रव्यंस्वरूपमितिगौः शुक्लः पाचकः डित्थः त्रिमतासीस्य यमिद्गे लिंगंस्त्रीत्वादिसंख्याएकत्वादिः कर्मादयः कारकविशेषास्तत्रस्वार्थोविशेषणंद्रव्यं
तुविशेष्यमितितिनिर्गलितार्थः॥ ग्रामस्पसीति॥ सूत्रेणौकारस्यस्थाने आत्वेकृतेसतिसोनःपुंसइत्ये तत्सूत्रंनप्रवर्ततेइत्यर्थः कुतोलब्धउच्यते पदविभागात्
यथास् १ ओ २ त्त ३ अः ४ पुंसः ५ इतिपंचपदानिछित्वापुंल्लिंगात्समानाच्छसःसस्यन् स्यात् ओकारसंबंधिनोऽवर्णात्तुविसर्गःस्यादितिव्याख्येयमतोगाः प
श्येत्यादौनत्वंनपुंल्लिंगादितिकिम् बुद्धिःसमानादितिकिं रायः ग्लावः लोपविषयएवास्यप्रवृत्तिः समानादम् शसोरत्वोपस्यानिषेधात् अतएवबहुश्र
इत्यत्रनत्वंनस्याद्यधिकारात् शसिदीर्घकृतोपस्थितस्यस्वरस्येति पदस्यनाम्नो विशेषणत्वात्तदंतविधिः पूर्वस्यस्वरांतस्यनाम्नोदीर्घःस्यात् शसिपरेसोनः
पुंसः इतिनत्वेदीर्घेतं पूर्वंनत्वंततोदीर्घत्वम् पश्चाद्दत्वोपावैपरोत्सवाज्ञेयं शसिकिम् हरिभिः स्वरस्यकिम् लिहः ननुइहशस् परत्वाभावात्कथंदीर्घः उच्यते
यस्यस्थाने आदेशः यदादेशः सतेनस्थानिनातुल्यंमद्वत् स्थानिवद्भवतीत्यर्थः॥ स्थानिवर्णाश्रयविधौकर्तव्ये नभवति अस्यव्याख्यानंपरि
॥९॥ भाषाप्रकर्णे उक्तम् देवपदद्वयमपिप्रथमांतंसंकेतितं अतःपरष्टाइनःस्यात् अतः किंकत्रीभवत्तानपरः किंहाहाटाकिम् देवैः॥

अट्टि अकार आकारो भवति भादौ स्यादौ अदिति किम् हरिभ्याम् तपरत्वमुत्तरार्थं भीतिकिम् देवस्य स्यादौ किम् देवभवनं बहुत्वे तु परत्वादेत्वं भवति देवे
भ्य इति भ्यः एस्सिबहुत्वे इत्यस्यापवादोयं भ्भिअइति पदच्छेदो भिइत्येकदेशद्वारेण भिस एवानुकरणं अत इत्यनुवृत्तम् अतो भिसो भकारस्याकारः स्यात् सा
द्याधिकारात् स्यादिरेव भी भिसग्ह्यते तेन ब्राह्मणेभिसेत्यादौ नातिप्रसंगः ङे॰ अक्ङे॰ इत्यविभक्तिको निर्देशः अतो ङे॰ इत्यस्याक् स्यात् कित्वादंते अत इत्यनुवृ
त्तेर्नेह वातप्रम्येत्तपरत्वान्नेह हाहै अथ अकि कृते एदोनीत इत्सकारस्य लोपप्र तुनविधान सामर्थ्याद्पदांतत्वाद्यानहि अकि कृते एतः पदांतत्वं संभवती

अट्टि अकारस्यात्वम्भवति भकारादौ स्यादौ देवाभ्याम् भ्यः अकारात्परस्य भिसो भकारस्याकारादेशो भवति देवैः ङ॰
कारो ङि॰त्वात्पार्यः ङे॰रक् अकारात्परस्य ङे॰ इत्येतस्य ागागमो भवति देवाय देवाभ्याम् एस्सिबहुत्वे अकारस्यैत्वम्भव
ति सकार भकारादौ विभक्तौ बहुत्वे सति देवेभ्यः ङ॰सिरत् अकारात्परो ङ॰सिरद् भवति देवात् देवाभ्याम् देवेभ्यः ॥ ।

ति एस्सिबहुत्वे अकार एकारो भवति बहुत्वे वर्तमानेषु सकार भकारादिषु स्यादिषु परेषु अकार इति किम् हाहाभ्यः बहुत्वे किं देवस्य स्यादिष्विति किमपच
ध्वम् ङ॰सिरत् अदंतानाम्नः परो ङ॰सिरत् स्यात् अत: किं वातप्रम्यः ग्लावः तपरः किं हाहाः ननु ङ॰सेरदादेशे कृते पस्य लोप इत्यतो लोपः स्या दुच्यते॰
स्यादौ पस्य लोप इत्यस्याभावो ज्ञापितो ऽकोविधानेनान्यथा ङ॰सिस्त इत्यवस्यत् यद्वात्तद्धित प्रकारणादीपीतिसूत्रारंभाच्च नात्र पस्य लोपः देवादित्यत्रवा
वसानेद्वितिजवत्वचपत्वेहसेऽहेसइतिदत्तयोर्द्वित्वे रूपचतुष्टयं बोध्यम् ॥ ॥ ❁ ॥ ॥

ङस्य अतोङस्य स्यात् अतइति किं वातमम्यः तपरः किं हाहाः ङोसि अत एकारः स्यादोसिपरे अदितिकिं हय्योस्तपरः किं हाहोङोसि किम् देवस्य नुडामः
आमो नुडितिकर्त्तव्येनुटः पूर्वोच्चारणं भाग्यम्यार्थं पञ्चनुडश्च ञ्च मामोति तत्र मघमं नुडेव भवति तेन त्री णां वारीणामित्यादावुभयप्रसंगे परत्वपीपू नुमोवाधि
त्वान्नुडेव अतएव प्राकृ प्रायशो दृश्यतामित्युक्तेर्वात न नुडाक्वचित्पूर्वेणापि परस्य बाधः क्रियते इतितदर्थः किंच मंडूकप्लुत्याङ् एनोहस्वादिति सूत्राद् ह्रस्वा
दितिपदं पुंसः इतिचाचानुव र्त्तवाक्यभेदेन संबध्यते समानादित्यनुवृत्तं समानांतान्नाम्नः आमो नुट्स्यात् पुल्लिंगे तु हस्वसमानांतान्नाम्न एव परस्यामो
नुडनदीर्घातान्नाम्नङस्यर्थः समानादितिकिं एषांभवतां ह्रस्वांतात् पुंसइतिकिम् हाहाम् वातप्रम्यांनाम्न इतिकिम् कार्याचकार पचति तरामित्यत्र न
ङस्य। अकारान्त्परोङस्याभवति देवस्य ओसि अकारस्यैत्वभवति ओसिपरे देवयोः नुडामः समानादुत्तरस्यामो नुडा
गमोभवति पुंसि तु हस्वादेव नामि नामिपरे पूर्वस्य दीर्घोभवति देवानाम् देवे देवयोः किलात्सः सः कृतस्य कवर्णादिला
चप्रत्याहारात्परस्य केनचित्सूत्रेण कृतस्य सकारस्य षकारादेशो भवति अन्तेस्थितस्य न भवति हरिस्तेत्यादो देवेषु ॥ ए
कारानुबंध आम् शेषस्तेन न नुट् निरनुबन्धकग्रहणेन सानुबन्धकस्येति वचनात् ङे आदेशस्याम स्तु न नुट् परत्वेनाङ् यट् भ्यां बाधनात् स्त्रियामित्यादि निर्दे
शान्नाभि पूर्वस्य स्वरांतस्य नाम्नो दीर्घः स्यात् नुट् सहिते आमि परे नुम् सहिते आमित्युनदीर्घो भवति पदि हि नुम् सहिते आम्यपि दीर्घः स्यात्तर्हि नुमं वा
धित्वा नुड् विधानं व्यर्थं स्यात् नुमः चिरत्ब्ज्वद्वाचेभ्यो नुट् पूर्व विप्रतिषेधेनेत्युक्तत्वान्नुट् सहितस्य वनाम्ग्रहणे किलात्सः सः कृतस्य कुप्वइलस्थानयोः सम
हारः किलेनस्यात् किलात् क्रियते स्म विधीयते स्मेति कर्मणि क्तः कृतो विहितः तस्य कृतस्य शास्त्रेण विहितस्येत्यर्थः सइति षष्ठ्यंतं ष इति प्रथमांतम्
कारोच्चारणार्थः किलात्परस्य कृतस्यादेशरूपस्य प्रत्ययावयवस्य च सः स्थाने षः स्यात् प्रुणोऽनंतेरस्यतोऽनंते इस्य नु वर्त्तते तेन पदांते स्थितस्य सस्य षत्वं
न किलात्किं देवस्य कृतस्येति किं सुपी सुपि सोपदांते स्थितस्येनेति किम् हरिस्तच ॥ ॥ ५ ॥ ॥

सिद्धिः आमंत्र्यते प्रसन्नीक्रियतेऽनेनेत्यामंत्रणं साधनेपुट् आमंत्रणे किम् रामः सत्यः सिः किम् रामौ समानाद्धेर्लोपोऽधातोः ङ॰ एनोह्रस्वादित्यतोमंडूकप्लुत्या
ह्रस्वादितिपदं एदोतोनइस्यतएदोतनइतिचानुवर्ततेह्रस्वसमानान्तादेदोदंताच्चनाम्नः परस्यधेर्लोपः स्यात ह्रस्वसमानांतादितिकिम् हेहाहाः हेवातप्रमीः।
अधातोरित्युत्तरार्थम् एदोतइतिग्रहणंकिम् हेहरे हेविष्णो अत्रहिपरत्वान्नित्यत्वाच्चधाविस्तनेनैदोतोः कृतयोर्ह्रस्वात्परत्वंनास्ति अभिमुखस्यभाव आभिमु
ख्यं सन्मुखीकरणम् आभिमुख्यस्याभिव्यक्तिः प्रकटीकरणम् आभिमुख्याभिव्यक्तिस्तस्यैनाम्नः प्राक्हेशब्दस्यप्रयोगोऽर्थतःशब्दतोवायोज्यः सर्व विश्व उभ उ

सिद्धिः आमन्त्रणेऽर्थे सिद्धिसञ्ज्ञकोभवति समानाद्धेर्लोपोऽधातोः ह्रस्वान्तसमानादेदोतश्चोत्तरस्यधेर्लोपोभवत्यधा
तोः आभिमुख्याभिव्यक्तयेहेशब्दस्यप्राक्प्रयोगः हेदेव हेदेवौ हेदेवाः एवंघटपटगणकृष्णमुकुन्दादयः सर्व्व॰ विश्व॰ उभ॰
उभय॰ अन्य॰ अन्यतर॰ इतर॰ डतर॰ डतम॰ सम॰ सिम॰ त्वत्॰ त्व॰ भवतु॰ नेम॰ एक॰ पूर्व॰ पर॰ अवर॰ दक्षिण॰ उत्तर॰ अपर॰ अधर॰
स्व॰ अन्तर॰ त्यद्॰ तद्॰ यद्॰ एतद्॰ इदम्॰ अदस्॰ द्वि॰ किम॰ युष्मद्॰ अस्मद्॰ एतेसर्वादयस्त्रिलिङ्गाः ॥ श्रीहरिः ॥

भय॰ अन्य॰ अन्यतर इतर ॥ डतर डतम कतर कतम सम सिम त्वत् त्व भवतु नेम एक पूर्व पर अवर दक्षिण उत्तर अपर अधर स्व अंतर त्यद् तद् यद् एतद् इदम्
अदस् द्वि किम् युष्मद् अस्मद् एते पंचत्रिंशच्छब्दास्त्रीणि लिंगानियेषांतेत्रिलिंगाः सर्वादिसंज्ञकाज्ञेयाः गणसूत्रमिदम् आदिशब्दोऽत्रावयववाची सर्वआदिरेष
यवबोधेषांतेसर्वादयः तद्गुणसंविज्ञानोऽयंबहुव्रीहिस्तस्यान्यपदार्थस्यगुणानांविशेषणानांवृत्तिपदार्थरूपाणांकार्यान्वयितयासंविज्ञानंयस्मिन्ससतद्गुणसंविज्ञानइत्य॥

आदिशब्दस्यावयववाचित्वादुक्तावयवभेदः समुदायः समासार्थः इतिबहुवचनं तस्य च युगपदुक्त्यप्रयोगाभावान्नदंगेष्विति न्यायेन तदवयवेषु प्रवर्तमाना सर्वा
दिसंज्ञाऽविशेषात्सर्वशब्देष्वपि वर्तते इतियुक्तम् तद्गुणसंविज्ञानत्वं संयोगसमवायान्यतरसंबंधे लंबकर्णमानयेत्यादौ तद्गुणसंविज्ञानत्वमेव स्वस्वामिभावसंबं
धेतु चित्रगुमानयेत्यादावतद्गुणसंविज्ञानत्वं तदंतस्यापीयं सर्वादिसंज्ञा भवति द्वंद्वे सर्वादीनां सर्वकार्यं नेति ज्ञापकात् संज्ञोपसर्जनीभूतेषु सर्वादिषु सर्वादि
संज्ञा न प्रवर्तते मुख्यामुख्ययोर्मुख्ये कार्यसंप्रत्ययो नाऽमुख्ये इति न्यायात् मुख्यो हि लोकप्रसिद्धोऽर्थः तत्र सर्वविश्वशब्दौ कृत्स्नपर्यायौ २ उभशब्दो।
द्वित्वविशिष्टस्य वाचकोऽतो नित्यं द्विवचनांतः ननु उभस्य सर्वनामत्वे कोऽर्थ इति भाष्यकारप्रयोगो विरुध्येत उच्यते अर्थपरस्यैव नित्यं द्विवचनांतता न तु स्वरू
पानुकरणस्येति अथ सर्वादिषु उभशब्दपाठो व्यर्थः सर्वादिकार्याणां स्मडादीनां द्विवचनेऽभावात् उच्यते सर्वादिगणे उभशब्दस्य पाठस्तु उभकाविति रूप
सिद्ध्यर्थः तथाहि ॥ उभशब्दस्तावद् द्विवचनमात्रविषयः नित्यस्वरितेन उभे इति लिंगात् समासतद्धितादौ तु द्विवचनलोपेनासौ न प्रयुज्यतेऽनभिधानात् ॥ ३
द्विवचनलोपे तु उभशब्दाद् वृत्तिविषये स्वार्थे नित्यमयट् भवति उभयोऽन्यत्रेति ग्रन्थत्र द्विवचनपरत्वाभावेऽप्युक्तत्वात् तेन उभयतः उभयत्र उभाभ्यां पक्षाभ्यां
विनीता निद्रा येस्ते रतिविग्रहे उभयपक्षविनीतनिद्रा इत्यादिप्रयोगवत् ॥ कप्रत्ययेऽप्ययट् प्राप्तः ऽप्यपरिसमाप्ति उभयकाविति रूपापत्तिः स्यात् तन्निवार
णार्थः सर्वादिषु उभशब्दस्य पाठः तेनाव्ययसर्वनाम्नामकच् प्राक् टेः इत्यकच्प्रत्यये उभकाविति सिध्यति न हि तस्य मध्यपतितत्वेन द्विवचनपरत्वानपायात्
३ उभयशब्दस्तु अवयवद्वयपात्रेऽवयविनि वर्तते उभावयवौ यस्य स उभयः संख्याया अवयवे तयप् इत्यत्र विसयट् ननु द्वयेषामपि मेदिनी ऽन्यामिति माघ
प्रयोगः कथं संगच्छते तस्य सर्वादित्वाभावात् इच्यते द्वयं द्वैधमित्युक्तानि गच्छंतीति द्वये पत्तेषां द्वयेषामिति निर्देशः किं तु तस्य रूपम् ४ अन्यशब्दो भिन्नार्थः ५ ॥

अन्यतरशब्दोऽव्युत्पन्नः स्वभावाद्द्विविषये निर्द्धारणेऽस्ति ६ इतरस्त्वन्यनीचयोः ७ इतरडतमौ प्रत्ययौ यद्यपि संज्ञाविधौ प्रत्ययग्रहणे तदंतग्रहणं नास्ति॰
विधानात्तंपदमिति ज्ञापकात् ॥ तथापीह तदंतग्रहणं येभ्यो डतरडतमौ विहितौ तेषां तदंतानां ग्रहणमित्यर्थः केवलयोः संज्ञायाः प्रयोजनाभावात् कतरक
तमयतरयतमादयस्तदंताः द्वयोर्बहूनां चैकस्य निर्द्धारणे इति डतरडतमौ ८ समशब्दः सर्वपर्यायस्तुल्यपर्यायस्तु नेह गृह्यते १० सिमः कृत्स्नेच शक्तेच स्या
न्यभ्योरावबहुयोः ११ त्वत्त्वशब्दावन्यपर्यायौ आद्यस्तान्तएतस्य पाठः कार्यः ॥१३॥ भवतुशब्दस्तु भवदर्थः उणादौ भातेर्डवतुरिति डवतु प्रत्ययांतउकारे
नुबंधोऽव्युत्पादितः आसर्वादेरित्यात्वमकप्रत्ययश्च प्रयोजनमस्य भवादकुभवकान् १४ नेमशब्दोऽर्द्धवाची १५ एकोन्यार्थे प्रधाने च प्रथमे केवले तथा ॥
साधारणे समानेल्पे संख्यायां च प्रयुज्यते १५ संख्यायामेकवचनांतः १७ पूर्वपरावरशब्दा दिग्देशकालवाचकाः सर्वादिसंज्ञकाः १८ दक्षिणशब्दस्तु दिग्
देशवाचकः सर्वादिः नतु प्रवीणवाची २० उत्तरपरशब्दौ दिग्देशकालवाचकौ सर्वादी २२ अधरस्तु दिग्देशवाचकः सर्वादिः स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वो
स्त्रियां धने इत्यमरः स्वः स्यात्पुंस्यात्मनि ज्ञातौ त्रिष्वात्मीये स्वोऽस्त्रियां धने इति मेदिनी इति चत्वारोऽर्थाः स्वशब्दस्य तत्रात्मात्मीययोरेव सर्वादित्वम् २४ अंतरमवकाशाव
धिपरिधानांतर्द्धिभेद तादर्थ्ये छिद्रात्मीयविनाबहिरवसरमध्येंतरात्मनि चेत्यंतरशब्दस्यार्थास्तत्र परिधाने बहिर्योगयोरेव सर्वादित्वम् २५ त्यद् तदौ शब्दौ॰
पूर्वोक्तपरामर्शकौ २७ यदशब्दउद्देश्यसमर्पकः २९ एतदिदमौ शब्दौ प्रत्यक्षोपस्थितवाचकौ ३० अदसशब्दस्तु व्यवहितवाचकः उक्तं च इदमस्तु सन्नि राम॰
कृष्टं समीपतरवर्ति चैतदो रूपं अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयादिति ३१ द्विशब्दो द्वित्वविशिष्टवाचकः ३२ किम्शब्दः प्रश्ने आक्षेपे च ३३ २४
आलिंगः संबोधनेकविषयकश्च युष्मदर्थः ३४ आलिंगउच्चार्य इत्यर्थो स्मच्छब्दः ३५ ॥ ॥ ३५ ॥ ॥ ३५ ॥ ॥ ३५ ॥

जसी । अदंतात्सर्वादेर्जस ईः स्यात् षष्ठ्या अविधानात् नांतस्याप्यादेशो भवति निर्दिश्यमानस्यादेशा भवंतीति न्यायेन जस इत्यस्य सर्वस्यैव स्थाने
आदेशः यद्वा जसीत्यत्र इ इ इति प्रश्लेषेण गुरुत्वात्सर्वादेशः अन्यथा दीर्घग्रहणस्य प्रयोजनाभावात् यद्वाऽस्यत्र दीर्घस्य प्रयोजनं द्वितीय इकारः प्रथमवर
र्णादिभ्योपि विध्यर्थः ननु अकारमात्रस्य जात ईकारकथमेतत्स्वरूपेणाकारस्य विघातकः स्यात् उच्यते उभयइतिनिर्देशेन सन्निपातपरिभाषाया अनित्यत्वा
भ्युपगमाद् विघातको भवतीत्यर्थः ष्रुनों णोनंते ष्र च र् च ऋ च एषां समाहारः ष्रः तस्मात् ष्रुः संज्ञापूर्वकत्वेनानित्यत्वान्नामिनः स्वरइति न नुम् अनंते इत्यत्र
नञ् प्रसज्यप्रतिषेध एव अंतशब्देन पदांत एव गृह्यते नतु वाक्यांतः व्याकरणे पदसंस्कारपक्षस्याभ्युपगमात् ष्रुर्नधातोर्नामिनः इत्यादिनिर्देशादेकप

जसी । सर्वादेरकारान्तात्परो जस ई र्भवति सर्वे ष्रुनों णोऽनंते पकाररेफऋवर्णेभ्यः परस्य नकारस्यैकपदस्थस्य णकारा
देशो भवत्यन्ते स्थितस्य न भवति सर्वाणित्यादौ अवकुपन्तरेऽपि अवप्रत्याहारेण कवर्गेण पवर्गेणानुस्वारेण विसर्गेण
ऽकऽपाभ्यां च मध्ये व्यवधानेऽपि भवतीत्यन्येन सर्वेण ॥ ॥ देएवणत्वविधिरस्तीति नैकपदस्थस्य षरऋवर्णेभ्यः परस्य नस्य णः

स्यात् पदान्ते यथा पुष्पाणि चतुर्णाम् धातृणाम् अपदान्ते किम् पितृन् ष्रुरितिकिं देवेन अवकुपंतरेऽपि अवश्च कुश्च पुश्च तेषां समाहारः अवकुपुनेनांतरं
अवकुपंतरं तस्मिन् स्वरणवृदंतस्येति अवशब्दस्य पूर्वनिपातः दंतौष्ठ्य वकारेण अवप्रत्याहारः अंतरशब्दोत्र मध्यवाची ष्रुभिरत्तनुवर्तते पंचमीनिर्देशाद्व्यवधाने
सति परस्य नस्य णः स्यादिति अत्रापिशब्दोऽनुक्तसमुच्चयार्थः तेनानुस्वारविसर्गजिह्वामूलीयोपध्मानीयानेषा एतेषां व्यस्तानां यथासंभवं मिलितानां च मध्ये
व्यवधाने सति ष्रुः परस्य नस्य णः स्यात् अनंते अवेत्यादीति किम् मतन्ना ष्रुरितिकिम् भानुना अनंते किं सर्वान् अनुस्वारादिव्यवधाने यथा बृंहणम् उरःकेन
उरःकेण उरःपेन उरःपेणेत्यादि ० ॥ ६० ॥ ६ ॥ ०

सर्वादेः स्मट् ङे॰ रमित्यस्यापवादोयं अदंतात्सर्वादेर्ङे॰ इत्यस्य स्मट् स्मात् अदंतादिति किं भूत्वते भवते सर्वादेरिति किं रामाय अतः ङ॰ स्मिरहितस्तेङ॰ सिभिस्यनुव
र्तते विभक्तिविपरिणामेन तस्यास्यान्वयं यथा अदंतात्सर्वादेः परस्य ङ॰ सेरादेशस्यातः स्मट् स्मात् सुडामः ॥ आमः शासेरस्येत्यतो मंडूकप्लुत्या ऽऽसेत्यनुवर्त्यव्याख्येयं
यथा अवर्णान्तात्सर्वादेरामः सुट् स्यात् सुडामइत्यत्र आम् इत्यनुवर्तनीयं तेनामः षष्ठीबहुवचनस्यामः सुडित्यर्थो ज्ञेयः तेन आमो आम् ङे॰ रित्यादिना कृ
तस्याम सत्सु सुट् न पुर्वा भवां सर्वेस्यामित्यत्र परत्वात् ङि॰ तांयङित्यपि समाधानमस्ति ङि॰ स्मिन् अदंतात्सर्वादेर्ङि॰ स्मिन भवति अतः किं भवति सर्वादि गणे

सर्वादेः स्मट् सर्वादेरकारान्तात्परस्य ङे॰ इत्येतस्य स्मड़ागमो भवति सर्वस्मै अतः सर्वादेरकारान्तात्परस्मात्स्मड़ागमो भवति
सर्वस्मात् सुडामः सर्वादेरवर्णान्तात्परस्यामः सुड़ागमो भवति सर्वेषाम् ङि॰ स्मिन् सर्वादेरकारान्तात्परेङि॰ : स्मिन्भवति ॥
सर्वस्मिन् शेषन्देववत् एवम्विश्वादयः उतरड़तमौ प्रत्ययौ तत्तस्तदन्ताश्शब्दाग्राह्याः पूर्वादीनान्नवानां जसङ॰ सिङ॰ ना
मीस्मात्स्मिनोवा पूर्वे पूर्वाः पूर्वस्मात् पूर्वात् पूर्वस्मिन् पूर्वे शेषं सर्ववत् एवम्परादयः ॥ ॥ ॥ ॥ छ ॥

उतरडतमौ प्रत्ययौ पठितौ न केवलाप्रकृतिः प्रयोक्तव्या न केवलः प्रत्ययः इत्युक्तस्यात्त तौ उतरडतमावंते येषां ते तदंताः कतरकतमादयो ज्ञेयाः पूर्वादीनां
नवानां जसङ॰ सिङ॰ नामी स्मात् स्मिनो वा पूर्वादीनां सज्ञानां व्यवस्थायामसंज्ञायां स्वशब्दस्य चात्मा ऽऽत्मीयार्थयोरंतरशब्दस्य बाह्ये परिधानीये चार्थे गण
पाठात्सर्वत्र सर्वादिसंज्ञा प्राप्ता साजसङ॰ सिङि॰ षु परतो वा भवतीत्यर्थः ॥ ॥ ॥ ॥ छ ॥ ॥ ॥ ॥ छ ॥

सर्वादिः सर्वकार्यीस्यान्नचेद्गौणोऽथवाभिधा पूर्वादिश्चव्यवस्थायां समोऽतुल्येऽन्तरेपुरि १ परिधानेवहिर्योगेस्वोर्थज्ञात्यन्यवाच्यपिचेद्यदिसर्वादिः स
र्वादिगणेगौणोनाऽथवाऽभिधानाम नस्यात् तदासर्वादिः सर्वशब्दस्यकार्य्यमस्तियस्यसःसर्वकार्यीस्याद्भवेत् मां तोपधादितीन् सर्वनामाख्यइति
वापाठः येतुसंज्ञोपसर्जनीभूताः सर्वादयस्तेषांसर्वादिकार्यमंतर्गणकार्यंच नसर्वादिसंज्ञायाअभावात् सर्वादिकार्यम् यथाजसीतीत्वं सर्वादेरितिस्म
ट् अतइतिस्मट् ङिःस्मिन्निति स्मिन् सुडामइतिसुडागमः यटोश्चेतिसुट् इत्यादिअंतर्गणकार्यं। यथास्त्रन्यादेशिजि सुःसदादेशेरित्यः दस्मइतिमः

सर्वादिस्सर्वकार्यीस्यान्नचेद्गौणोऽथवाभिधा पूर्वादिश्चव्यवस्थायांसमोऽतुल्येऽन्तरेपुरि परिधानेवहिर्योगेस्वोऽर्थज्ञात्य
न्यवाच्यपि सर्वमतिक्रान्तोऽतिसर्वः तस्मैअतिसर्वायदेहि प्रियंसर्वंयस्यासौप्रियसर्व्वः तस्मैप्रियसर्व्वाय सर्वोनामकश्चि
त्तस्मैसर्वाय अतिपूर्वाय अंतरायांपुरि समायतुल्यायव्यवस्थायांकिम् दक्षिणा गाथकाः कुशलाइत्यर्थः असंज्ञायांकिम्
उत्तराः कुरवः अन्तरेऽन्तरावाशाटकाः परिधानीयाइत्यर्थः अन्तरेऽन्तरावाचाण्डालस्यगृहाः वाह्याइत्यर्थः वहिर्योगे
किम् ग्रामयोरन्तरे तापसः मध्यइत्यर्थः स्वायधनायज्ञातयेवा ॥ ॥

॥ सोस्मइतिस्मट् इत्यादिस्वार्थंपरित्यज्यअन्यार्थंब्रूतेसगौणः गौणे
यथासर्वमतिक्रान्तइत्यत्रात्यः क्रांताद्यर्थेद्वितीययेतितत्पुरुषः अतिसर्वस्तस्मैअतिसर्वायपुरुषायत्वंदेहिगौणत्वादत्रनस्मट् प्रियंसर्वंयस्येतिवहुव्रीहिः
स प्रियसर्वः संकेतकरणेसंज्ञावचाकश्चित्पुरुषस्तस्यनामसर्वइति तस्मैसर्वायसंज्ञात्वादत्रनस्मट् पूर्वादिसप्तकोगणोव्यवस्थायांसर्वकार्यीस्यात् स्वाभि
धेयापेक्षोऽवधिनियमोव्यवस्थेति स्वस्यपूर्वादिशब्दस्याभिधेयेनापेक्ष्यमाणस्याऽवधेर्नियमइत्यर्थः अपेक्ष्यतेइति अपेक्षः कर्मणिघञ् प्रत्ययः ॥

स्वशब्देन पूर्वादयः सप्त ग्राह्याः तेषां पूर्वादीनामभिधेयः स्वाभिधेयो दिग्देशकालरूपोऽर्थः स्वाभिधेयस्यापेक्षः स्वाभिधेयापेक्षः कर्तृकार्ययोरक्त
दाविति कर्तृषष्ठ्याः समासः स्वाभिधेयेनापेक्ष्यत इत्यर्थः स्वाभिधेयापेक्षश्चासाववधिनियमश्च स्वाभिधेयापेक्षावधिनियमो व्यवस्था अवधिम
पेक्षते पूर्वादिप्रयोगश्च स तत्र व्यवस्था भवतीत्यर्थः॥ व्यवस्थायां किम्॥ दक्षिणा नराः कुशला इत्यर्थः एवं अधरे ताम्बूलरागः उत्तरे प्रत्युत्तरे च शक्तइ
ति गौणे यथा पूर्वं मतिक्रांतोऽतिपूर्वस्तस्मै अतिपूर्वाय पुरुषायेत्यत्र हि गौणत्वादत्र न स्मट् समशब्दोऽतुल्येऽर्थे सर्वकार्यतुल्येऽर्थे न भवतीत्यर्थः
समाः पदे हि तुल्या यथा तत्र न स्मट् अंतरशब्दः परिधाने उत्तरीयेऽर्थे बहिर्योगे चार्थे सर्वकार्यो अपुरि पुरीविषयतायां सर्वकार्यं न भवति बहिः श
ब्देनात्र तोदेशो वाह्यो वोच्यते अंतरायां पुरीति प्राकाराद्बाह्यायां पुरि प्राकारान्तरवर्तिन्यां वा पुरि गृहाः संति सत्यपि बहिर्योगे पुरिविषयत्वान्न सर्वा
दिसंज्ञा च सर्वादित्वाभावाद्याद्यैवेति न सुट् परिधाने तु अंतरे अंतरा वा शाटका इति परिधानीया इत्यर्थः सर्वादित्वाद्जसीतीत्वं बहिः शब्दोऽर्थेह
णवोक्तः तत्राद्ये यथा अंतरे अंतरा वा गृहा इति नगराद्बाह्याश्चाण्डालादिगृहा इत्यर्थः द्वितीये तु नगराभ्यंतरगृहा इत्यर्थः बाह्येन सहाभ्यंतर।
स्य योगो ह्यस्ति बहिर्योगे किम् ग्रामयोर्द्वयोरंतरे मध्ये तापसा वसंतीति अन्तरशब्दस्य मध्यार्थत्वान्न सर्वादिसंज्ञा अत एवात्र पाक्षिको न स्मिन्
अर्थश्च ज्ञातिश्च अर्थज्ञाती अर्थज्ञातिभ्यामन्यावात्मात्मीयावर्थौ अर्थज्ञातान्यौ अर्थज्ञातान्यौ वक्तीत्यर्थः ज्ञातमन्यवाची स्वशब्दः सर्वकार्यो आत्मात्मीयज्ञातिध
नवाची स्वशब्दस्तत्र ज्ञातिधनयोः पर्युदासादात्मात्मीयौ परिशिष्टौ तत्र सर्वादिसंज्ञा भवति स्वे स्वाः आत्मानः आत्मीया वेत्यर्थः सर्वादित्वादत्र वाज
सीतीत्वं ज्ञातिधनवाचिनस्तु स्वा इत्यत्र सर्वादित्वाभावान्न स्मट् ननु आत्मात्मीयवाचीति वक्तुं युक्तं पर्युदासग्रहणमनर्थकमुच्यते ज्ञातित्वेन धनत्वेन च
विवक्षायां सत्यामात्मीयार्थस्य सर्वादिसंज्ञा माभूदित्यर्थं पर्युदासग्रहणमिति अन्यशब्दग्रहणमनर्थकमुच्यते आत्मीयार्थस्यापि ज्ञातित्वेन धनत्वेन च
विवक्षायां सत्यां सर्वादिसंज्ञा माभूदित्येतदर्थमन्यशब्दग्रहणमिति॥ ॥ ॥ ॥

द्वंद्वे सर्वादीनां सर्वकार्यं न द्वंद्वसमासे सर्वादीनां सर्वादिसंज्ञा न भवति समुदायस्यायं निषेधो नत्ववयवानां वर्णाश्च आश्रमाश्च द्वंद्वे तरेचते वर्णाश्रमेतरे तेषां वर्णाश्र
मेतराणां सर्वादिसंज्ञाभावान्सुट् वा जसी द्वंद्वे ङ का संज्ञा वा स्यात् जसीति ई आदेश कर्तव्ये तृतीयासमासे तृतीयासमासार्थवाक्ये च न तृतीया तत्पुरुषसमासे
तृतीयासमासः अर्थः प्रयोजनं यस्य तत् तृतीयासमासार्थं तृतीयासमासार्थं च तद्वाक्यं च तृतीयासमासार्थवाक्यं तस्मिन् तृतीयासमासार्थवाक्येपि सर्वादि
संज्ञा न भवति मासेन पूर्वः मासपूर्वस्तस्मै मासपूर्वाय देहि तृतीयासमासे ग्रसर्वादित्वाभावान्स्मट् प्रथमचरमतयडल्पार्द्धकतिपयनेमानां जसी वा एते
द्वंद्वे सर्वादीनां सर्वकार्यम् पूर्वपरावराणाम् वा जसी वर्णाश्रमेतरे वर्णाश्रमेतराः तृतीयासमासे तृतीयासमासार्थवा
क्येपि च न मासपूर्वाय मासेन पूर्वाय प्रथमचरमतयाडयडल्पार्द्धकतिपयनेमानाञ्जसी वा प्रथमे प्रथमाः चरमे चरमाः तयड
यटौ प्रत्ययौ ततस्तदन्ता शब्दा ग्राह्याः द्वितये द्वितयाः द्वये द्वयाः शेषन्देववत् नेमे नेमाः शेषं सर्ववत् तीयस्य ङित्सु वा
सर्ववद्रूपम् द्वितीयस्मै द्वितीयाय द्वितीयस्मात् द्वितीयात् द्वितीयस्मिन् द्वितीये एवं तृतीयः ॥ ॥ ॥ ॥
यास्सर्वादिसंज्ञा वा स्यात् जसीतीत्थं कर्तव्ये नेमशब्दस्य नित्यं प्राप्ते अन्येषामप्राप्ते वायमारम्भः तयडयटौ प्रत्ययौ केवलयोः संज्ञाया। प्रयोजनाभावात् तयडयडं
ताद्वितयद्वयादिकाग्राह्याः संख्याया अवयवे इति तयडयटौ ह्यावयवयो येस्य सः द्वितयः द्वयः तीयस्य वा ङित्सु सर्ववद्रूपम् तीयप्रत्ययान्तस्य वा सर्वशब्दतुल्यं रूपं
वति ङेङसिङिषु परतः द्वित्रिभ्यामिति तीयः अर्थवद्ग्रहणान्नेह पटुजातीयादयो येत्यत्र प्रकारेण जातीयः इति जातीयः उभशब्दस्य आख्यातात्यय सर्वादेरित्यकार्यः॥
सर्वादौ पाठः द्विवचनपरत्वाभावेतु उभशब्दान्नित्यमयट् भवतीति न कप्रत्ययादिष्टसिद्धिः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ उभयशब्दस्य द्विवचनांताऽनभिधानादिति कैयटः उभयशब्दस्य द्विवचनमस्ति अनभिधाने प्रमाणाभावादिति हरदत्तः उभयशब्दस्यायच् प्रत्ययांतत्वात् प्रथमचरमेति विकल्पे प्राप्ते सर्वादौ पाठसामर्थ्यान्नित्यं संज्ञा भवति विभक्तिनिरपेक्षत्वेनांतरंगत्वाच्च अयमर्थः उभयशब्दे प्रथमचरमेति विकल्पस्य जसपेक्षत्वाभावनाद्बहिरंगत्वं सर्वादिगणपाठसिद्ध नित्यसंज्ञायास्तु विभक्त्यपेक्षारहितत्वेन अंतरंगत्वं ततोंऽतरंगबहिरंगयोर्मध्येंऽतरंगो विधिर्बलीयानिति न्यायादत्र नित्यैव संज्ञा स्यान्न तु विकल्पइति ॥ निः क्रांतो जरया इति निरादयः क्रांताद्यर्थे पंचम्येति तत्पुरुषः अन्यार्थे इति ह्रस्वः निर्जरः ॥ अमरा निर्जरा देवा इत्यमरः ॥ जराया जरसन्यतरस्यां वा वा

उभयशब्दो नित्यं द्विवचनांतः उभौ उभौ उभाभ्याम् उभाभ्याम् उभाभ्याम् उभयोः उभयोः उभयशब्दस्य द्विवचनं नास्तीत्येके

अस्तीत्यन्ये उभयः उभये निर्जरः जराया जरसन्यतरस्यां वा वक्तव्यः तदन्तविधिरत्र षष्ठीनिर्दिष्टस्यादेशस्तदन्तस्य ज्ञेयः ॥

गुरुशिष्य सर्वस्य निर्दिश्यमानस्यादेशा भवन्ति एकदेशविकृतमनन्यवत् निर्जरसौ निर्जरौ निर्जरसः निर्जराः पक्षे

हलादौ च देववत् ॥ ॥ ⁘ ॥ ॥ ११ जरः जराशब्दस्य वा जरस् भवति स्वरादौ विभक्तौ परतः तदंतविधिरत्र जराया इत्यस्य नाम्नो विशेषणत्वात् ॥

षष्ठीनिर्दिष्टस्येति परिभाषया निर्जरशब्दस्यांतस्य स्थाने जरसि प्राप्तेऽत आह गुरुः शिष्येति अनया परिभाषया सोपपदस्य सर्वस्य स्थाने जरसादेशो प्राप्तेत्स्याह निर्दिश्यमानस्यादेशा भवंति निर्दिश्यते इति निर्दिश्यमानः उच्चार्यमाणस्तस्य स्थाने आदेशाः स्युरेवमपि निर्दिश्यमानजराशब्दस्य जरसादेशो भवति न तत्स्यान्नेत्यत

आह एकदेशेन विकृतमेकदेशविकृतं शब्दरूपं अनेन तुल्यमित्यन्यवन्न भवति अनया परिभाषया निर्जर इत्यत्र जरो पि जरावद्ज्ञेयः जरसादेशाभावपक्षे हला

संख्याविसायपूर्वस्याह्नस्याहन् वाड्यौ। संख्याविसायाः पूर्वेयस्यसः संख्याविसायपूर्वस्तस्यसंख्यादिपूर्वस्य अह्नस्य स्थाने अहन् आदेशोवास्यात् वेड्योः ईश्वडि॰श्च ईडी॰न
योरिड्योः ईड् इति ईर्मोर् इति सूत्रेण ह्रतोऽत्रग्रह्यते ननु जस्शसोः शिरितिशिः नापिईप् निरनुबंधग्रहणेनसानुबंधकस्येत्युक्तत्वात् अल्लोपड् इतिनिसेधात्रे।
विकल्पोयम् अन्नंतस्यनाम्नउपधायालोपोवास्यात् ईड्योः म्वतः वकारमकारौ अंतेयस्यसंयोगस्यसवकारमकारांतः वकारमकारांतश्चासौसंयोगश्चवकार
मकारांतसंयोगस्तस्मात्परस्यानउपधायालोपोनभवतीत्यर्थः यथाबहुयज्वनीचर्मणीत्यादिह्रयोरह्नोर्भवइति तद्धितार्थेद्विगुसमासोयंभवार्थे इकप्रत्ययस्तस्य

संख्याविसायपूर्वस्याह्नस्याहन्वाड्यौ। वेड्योः। अन्नन्तस्योपधायालोपोवाभवति ईडी। म्वन्तयोः परयोर्मकारवकारान्त
संयोगादुत्तरस्यन द्व्यह्नि द्व्यहनि द्व्यह्ने विगतमहोव्यह्नः व्यह्नि व्यहनि व्यह्ने अह्नःसायः सायाह्नः सायाह्नि सायाहनि साया
ह्ने पाददन्तनासिकामासहृदयनिशा असृक् यूषदोषयकृत् शकृत् उदक् आस्यमांसपृतनासानूनाम्पद्दत् नस् मा
स हृद्निश् असन् यूषन् दोषन् यकन् शकन् उदन् आसन् मांस पृतन् स्नुएतेआदेशाभवन्ति शसादौवा पदः पद्भ्या
म् पद्भिः दतः दता दद्भ्याम् दद्भिः मासः मासा माभ्याम् मासाभ्याम् ॥ ॥ लुक् चततः समासांतेष्टप्रत्ययः नोवेसुपधालोपः

द्व्यह्नः विगतमहर्विगतत्पुरुषः व्यह्नः अह्नःसायइति क्वचिदमाद्यंतस्येतिपरनिपातः एतेषंत्र प्रत्ययेपुकिचहतोसायशब्दोऽवसानवाचीसाधितः अहन्नादेशउ
पधालोपेद्व्यह्नि लोपाऽभावेद्व्यहनि अहन्नभावेद्व्यह्ने पाददंतनासिकामासहृदयनिशाअसृज् यूषदोषयकृत् शकृत् उदक आस्यमांसपृतनासानूनां एषांप
दादय आदेशावास्युः शसादौ माभ्यामित्यत्रसस्यविसर्गे भ्यादेवेइतिविसर्गलोपश्च यूषोमंडः मुद्गामलकयूषस्तुभेदीदीपनपाचनइतिदर्शनात्॰॥ ५ ॥

अल्लोपः स्वरेऽम्वयुक्ताच्छसादौ नोपधाया इत्यनुवर्तते नान्तस्य नाम्न उपधाया अतो लोपः स्यात् शसादौ स्वरे नान्तस्येति किम् भवतः अत इति किं दण्डिनः तपर इति
किम् मतान्मतीति मतान् क्विप् मत्यश्वत्वात् मतानः स्वरे किं राजभ्यां शसादौ किं मघोन इदं माघवनं देवते दमर्थे इत्यण् मृ चवश्च म्वौ अनयोर्युजति युक्तः
कर्मणि क्तः म्वाभ्यां युक्तः म्वयुक्तः न म्वयुक्त अम्वयुक्तः तस्मादम्वयुक्तात् म्वाभ्यां युक्ताद् वर्णान्त्यस्मात् नो लोपो न भवतीत्यर्थः यथा यज्वनः ब्रह्मणः म्वेति कि
म् तस्मादम्वयुक्तादिति किं अर्यम्णः पल्ले कृते पूणयोगे द्म इत्यस्त्वरं भवति पूष्णः नाम्नो नो लोपश् धौ न इत्यनेन नाम विशेष्यते विशेषणत्वात् तदन्तविधिर्भवति
नान्तस्य नाम्नो नस्य लोपश् स्याद्रसे पदान्ते चाधौ नाम्न इति किं अहन् नाम्न इत्यनुवर्त्तमाने पुनर्नामग्रहणं नामसंज्ञाप्रवृत्तिकाले स्थितस्य नकारस्य लोपश्

अल्लोपस्स्वरेऽम्वयुक्ताच्छसादौ अन्नन्तस्योपधाया लोपो भवति शसादौ स्वरे परे मकारवकारान्तसंयोगादुत्तरस्य न पूष्णः
पूष्णा नाम्नो नो लोपश् धौ नान्तस्य नाम्नो नस्य लोपश् भवति रसे पदान्ते चाधौ पूषभ्याम् पूषभिः पक्षे पञ्चसु देववत् ॥
पद्दादयः पृथक् शब्दा इत्येके सोमपाः सोमपौ सोमपाः सोमपाम् ॥ ॥ ॐ नमः परमात्मने ॥ ॥ ॐ ॥

र्थेन आगमादेशयोर्नकारस्य लोपश् न भवति यथा पचन् भवान् त्वन् सुहिन् प्रशान् पूषभ्या मन्नन्तस्य लोपश् शि कृते अड्डित्वात् प्राप्ते उच्यते नस्य लोपश् शि न विभक्ति
कार्यमिति विभक्तौ कार्यं विभक्तेर्वा कार्यमिति समासः पथिषि त्यादौ यत्वं तु न विभक्तिकार्यं से षादिति ज्ञापकात् आदेशाभावपक्षे सर्वाणि रूपाणि देववत् ०
आदेशपक्षे पञ्चवचनानि देववत् पद्दादयो नादेशाः किंतु पृथक् शब्दा एके आचार्या इति वदन्ति तेन पदं घ्रियस्य रणोक्षियां स्वान्तं हन्मानसंमत इत्यादि सं
गच्छते इत्यदन्ताः सोमं पिबतीति सोमपाः पा पाने इत्यस्मादातोड इति डप्रत्ययं बाधित्वा क्विप् ० ॥ ॥ ॐ ॥ ॥ ॐ नमः परमात्मने ॥ ॥ ॐ ॥ पू

आतो धातोर्लोपः आकारांतस्य धातोर्लोपः स्याच्छसादौ स्वरे शतृशानक्वसंतानां क्त्वांतानां तथैव च क्विवंतानां च शब्दानां धातुत्वं नोपहन्यते १ प्रातिपदि
कसंज्ञयेत्यर्थः आतोऽस्य हि संज्ञेति षष्ठीनिर्दिष्टस्येत्यंतलोपः धातोः किं हाहान् गंधर्वविशेषवाचकमव्युत्पन्नं प्रातिपदिकमिदं हाहा हूहूश्चैवमाद्या
गंधर्वा इत्यमरः दासवर्णे दीर्घः हाहा ङे ऐत्वं हाहै ङसि ङसोर्दीर्घः हाहाः २ ङेसि औत्वं हाहौ ङौ एत्वं हाहे शेषं सोमपावत् आत इति योगविभागा
द्धातोरप्याकारस्य लोपः क्वचिल्लः इत्यादंताः ॥ औप् इदुद्भ्यां ॥ परङौप्स्यात्तम् ईदूतौ दीर्घयोर्ग्रहणे ई ऊ इति पदद्वयं बोध्यम् ह्रस्वग्रहणपक्षे तु पू

आतो धातोर्लोपः धातुसंबन्धिन आकारस्य लोपो भवति शसादौ स्वरे परे सोमपः सोमपा सोमपाभ्याम् इत्यादि
एवं कीलालपा शंखध्मा मधुपा विश्वपा मनत्तपः धातोः किम् हाहान् हाहः हाहौ हाहाः हाहे हाहैः हरिः औप्
इकारान्ताद् उकारान्ताच्च परः औप् आपद्यते इउ भवतः हरी एओ जसि इकारान्तस्योकारान्तस्य च जसि परे एकार ओ
कारश्च भवति हरयः घौ इकारान्तस्योकारान्तस्य च घौ परे एकार ओकारश्च भवति हे हरे हरिम् हरी हरीन् ॥ ॥

इत्येतेन तदंतः इदुद्भ्यामिति किम् ॥ दैवौ तपरत्वमिति किम् वातप्रम्यो हूहो एडो जसि इदुद्भ्यामित्यनुवर्तते तच्च षष्ठ्या विपरिणम्यते तच्च नाम्नो वि
शेषणं विशेषणे हि तदंतविधिः ॥ इदुदंतस्य नाम्न ए ओ स्यातां जसि परतः इदुदंतस्येति किम् राः ग्लावः तपरत्वं किम् वातप्रम्यः ॥ हूहूः घौ इदु
दंतस्य एडो भवतः ॥ घौ परे हलाकृतमसंगित्वेन निसृत्वात् भस्त्वाच्च पूर्वमेव मोत्वं च ततः समानाद्धे रिति घिलोपः इदुदंतस्य किं हे ग्लौः तपरत्वं कि
म् हे वातप्रमीः हे हूहूः ॥ ॥ ॥ ॥ टाना स्त्रियाम् ॥ इदुद्भ्यां परष्टा ना स्यात् स्त्रीलिंगे तु न किंच पुंसीत्युक्ते तु अदसः प्रत्यये स्यदाद्यत्वमत्वं च

अपरस्ट्ट इतिस्थिते इनादेशतः परत्वादंतरंगाच्च मादृइसत्तेपुंस्त्रिगे सिद्धममुनेतिक्लीबेत्वमुनेतिनसिध्यतिनामिनः स्वरे इतिनुमिकर्तव्ये ङत्वस्यासिद्धत्वात्
अतोऽस्त्रियामित्युक्ते इदुद्भ्यां किं गवा तपरत्वं किम् वातप्रम्या हूहा ङि॰ति इदुदंतस्य नाम्न एङोस्यातां ङ॰ इत्यस्य सङि॰त् तस्मिन् ङि॰ति स्यादेरौ ङि॰भि किं
हरिभ्यांस्यादौ किं हरिश्रिवाचरतीति हरयति श्राचारे क्विप् ततः प्रत्ययांतात् स्त्रियामङि॰स्यङ॰ हर्यानाम्नः किं नुतः नुवंतिकिं अङ॰ चासौङ् च ङि॰त् तस्मि
न् ङि॰ति इ॰ति कर्मधारयकरणे ङ्संज्ञकः ङ॰कारादौ प्रत्यये परे इत्यर्थो भवति तदा नाम्नः स्यादौ विस्येत योरत्वं इति नैकर्तव्येति लित्सु षादेर्ङ. इत्यादि ङ
प्रत्ययेतु परत्वादियुवौ अशिश्रिपत् अदुद्भवङ्स्यादि ङस्य॰ एङोतोग इतिसूत्रमनुवर्ततेलोपश्च इति च एङोतः ऽपरस्य ङ॰स्याकारस्यलोपश्चस्यात्

चवमयोश्च पक्षस्या निर्दिष्टत्वादंतस्यादेशः सिप्रपे परतान्नकारे कृते सिलोपः प्रशानित्यत्र नान्तो नोलोपश्च इति न लोपो न नत्वस्यासिद्धत्वात् यहानाम्नो
नइति सूत्रे पूर्वमेवोपपादितत्वात् शमु उपशमे क्विप् अमांतस्येति दीर्घः ॥ प्रशाम्यतीति प्रशान् वमयोस्तु चक्ष्यवहे चक्ष्यम्हे पदांते च अशंशन् भ
वस्तन् पदांते किं प्रशामौ धात्वधिकारस्यैव भावादिति लभ्यमाने पुनर्धातुग्रहणान्नाम धातोर्न अयमिवाचरम् इदम् प्रशाम्भ्यामित्यादौ नत्वमेवेति नका
रस्यानुस्वारे किं शाम्भामित्यादौ स्यात् अनुस्वारः कायते र्डिमिति डिम प्रत्ययेन निष्पन्नः किम् शब्दः त्यदादेरित्यत्वे कृते सर्वशब्दवद्रूपम् ॥ ॥ श्री ॥

इदमोऽयं पुंसि सावित्यनुवर्तते सौ सइत्यतः सिलोपे अयम् पुंसि किम् इदम् नन्वत्र लुकि न तन्निमित्तमिति परिभाषया न भविष्यति सत्यं तस्या अनित्यत्व-
ज्ञापनार्थम् पुंसीति तेन प्रियतिसृ इत्यादि सिध्यति इदं दे: कमिनर्न लोप इति किम् मत्यये इदम् शब्दः दस्य मः त्यदादेर्दस्य मः स्यात् स्यादौ विभक्तौ स्यादौ
किम् अस्माप्यमेदमः अ...ती त्यदस्येति ननु हावित्यत्र कस्मान्मत्वं न अणुस्यादावितिदस्य विशेषणमयेव शाद्विभक्ति विपरिणामइत्युक्तत्वात्
स्यादि प्रत्ययस्येत्यर्थः येनाव्यवधानं तेन व्यवहितेपीत्युक्तत्वाद् कारव्यवधाने सति भवति न च द्विव्यवधाने क्वचिद्व्योगिति निर्देशाद्वा न त्यदाद्यत्वे॰

इदमोऽयम्पुंसि इदमः पुंसि सावयं भवति अयम् दस्य मः त्यदादेर्दकारस्य मत्वम्भवति स्यादौ इमौ इमे त्यदादेस्सम्बोधना
भावः इमम् इमौ इमान् अनटौसोः इदमोऽनादेशो भवति टौसोः परयोः अनेन स्मः सकारे भकारे च परे इदमोऽकारो भव
ति हल्त्वस्य अद्भिः आभ्याम् भिस भिस् इदमदसोर्भिसभिसेव भवति न भकारस्याकारः एभिः अस्मै अस्मात् अस्य अनयोः॰
एषाम् अस्मिन् अनयोः एषु ॥

॥ मत्वे औत्वे च इमौ त्यदादेः संबोधनं नास्तीत्युत्सर्गः प्रचुरप्रयोगादर्शनमेवात्र मूलं भाष्ये तु हे स इत्युक्त
म् अनटौसोः इदमोऽयमित्यतन इदमइत्यनुवर्तते टेनेतीनादेशे अनेन स्मः सश्च भश्च अनयोः समाहारः स्भ् तस्मिन् स्भिसकारभकारादौ स्यादौ इदम्
याद्स्य अः स्यात् स्भशितिसुवचं यतः सर्वस्य स्यात् अद्भीस्यात्वे आभ्यां भिस् भिस् इदमोः दसश्च भिस भिसेव भवति भिसो भिस् विधानं च्य इत्यत्व वा
धनार्थं एसीत्येत्वे एभिः अदसस्तु अमीभिः ॥ ॥ ःः ॥ ॥

इदमेतदोरन्वादेशे द्वितीयाटौस्स्वेनद्वावक्तव्यः द्वितीयायां टौसोश्च परतोऽन्वादेशे इदमेतदोरेवदादेशो भवति स्यात् अन्वादेशमाह किंचित्कार्यं विधातुमुपात्तस्य पुनस्तस्य शब्दस्य कार्यान्तरं विधातुं बोधयितुं पुनरुपादानं ग्रहणं सोऽन्वादेश उच्यते ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः एतमातं ङितं विद्याद्वाक्यस्मरणयोः तु ईषदर्थादिषु योऽन विधीयते किंत्वनूद्यते इति नानेनादेशः एवं नकंभीरुरयं त्वमेव तदिमं राधे गृहं प्रापय इत्यत्रापि भीरुत्वस्यानुवाद्यत्वं बोध्यम् यथा। अनेन पुरुषेण व्याकरणमधीतं पठितं एनं पुरुषं त्वं छन्दोऽध्यापय पाठय इति मांताः राजतेः इति राजा कनुष्ट्रषितक्षिराजिधन्विद्युमतिदिव इति कन् प्रत्ययः ॥

इदमेतदोरन्वादेशे द्वितीयाटौस्स्वेनत् एनम् एनौ एनान् एनेन एनयोः किञ्चित्कार्य्यं विधातुमुपात्तस्य कार्य्यान्तरं विधातुं पुनरुपादानमन्वादेशः यथाऽनेन व्याकरणमधीतम् एनं छन्दोऽध्यापय नोपधायाः नाम्नो नोलोपश्चाऽघौ राजा राजानौ राजानः हे राजन् अल्लोपस्स्वरेऽम्वयुक्तात् छसादौ सुलम् जञोर्ज्ञः जकारञकारयोर्योगे ज्ञो भवति राज्ञः राज्ञा। राजभ्याम् नलोपशिनविभक्तिकार्य्यम् पञ्चस्वितिज्ञापकात् राजभिः वेङ्योः राज्ञि राजनि राज्ञोः राजसु एवम्वृषादयः॥

यज्वनः यज्वना आत्मनः आत्मना मतिदिवा मतिदिवानौ ॥ एकवत्वात् नोपधायाः इत्युपधादीर्घः हसेपः इति सिलोपः ततो नाम्नो नोपशिनिनलोपः शसितु अल्लोपः स्वरे इत्यल्लोपे कृते सुतं जञोर्ज्ञः उभयोर्योगे ज्ञ इत्यक्षरं भवति राज्ञः नस्य लोपश्शिनविभक्तिकार्य्यं पंचस्विति ज्ञापकात् अतो [illegible] भिसवा इत्यैसादेशः राजभिरित्यत्र वध्य इत्यतं राजभ्य इत्यत्रैवैसभीस्त्वं च न वेङ्योरिति चोपधालोपे राज्ञि राजनि वृषादिर्नुः कन्तत्तः इत्ववानिति यज्वा [illegible] वसिपृडा इति वनिप्प्रत्ययः अम्वयुक्तादिसुक्तत्वान्नोपधालोपः यज्वनः अततीत्यात्मा अतेर्मनिण् इति मनिण्प्रत्ययः अम्वयुक्तादिसुक्तत्वान्नोपधालोपः आत्मनः सुष्ठु धर्मो यस्यासौ सुधर्मा धर्मादिच्सन् अम्वयुक्तादिसुक्तत्वान्नोपधालोपः सुधर्मणः मतिदीव्यतीति मतिदि

॥ सा० टी० ॥

॥ अल्लोपः स्वरे... कृते ग्वोर्विहसे रश्च वश्च अनयोः समाहारो र्व् तस्मिन् र्वि रेफवकारयोः परतः पदान्ते च धातोरिकारोकारयोर्दीर्घः स्यात् कीदृश
योः हसः परो ... हस परो तयोः हसपरयोः प्रतिदीव्नः नाम्नो न इति न लोपे प्रतिदिवभ्याम् श्वादेः श्वयुवमघोनां वड् स्यात् शसादौ स्वरे ङीपि प्रत्यये
ङीपि तु ... कारे च प्रातिपदिकग्रहणे लिंगाभिधायिन्या प्रत्ययविशिष्टस्यापि ग्रहणमिति परिभाषा विभक्तिनिमित्तेकार्ये न प्रवर्त्तते अतो युवतीः पञ्चस्यादौ
नोत्वं अकारसहितस्य वस्योत्वं श्वा कुकुरः युवा तरुणः युवन् शब्दे वस्योत्वे कृते दीर्घत्वम् ॥ यूनः ॥ मघवा इन्द्रः वस्योत्वे उत्वे च कृते मघोनः अर्व

अल्लोपकृते ग्वोर्विहसे धातोरिदुतोर्दीर्घो भवति रेफवकारयोर्हसपरयोः प्रतिदीव्नः प्रतिदीव्ना प्रतिदिवभ्याम्
श्वादेः श्वादेर्वडुत्वम् स्यान्नोनि शसादौ स्वरे ङ्यां कारे च शुनः शुना श्वभ्याम् यूनः यूना युवभ्याम् मघवा मघवानौ
मघवानः मघोनः मघोना अर्वणस्त्वसावनञः नञा रहितस्यार्वन्नित्यन्तस्य तृ त्रन्तादेशः स्यान्न तु सौ ॥ ※ ॥

अर्वणस्त्वसावनञः नतु ऋ धातोर्विप्रत्यये गुणे च अरिति रूपं तस्माद्वतु प्रत्यये अर्वतावित्यादि सिद्ध्यति ऋ धातोरेव वनिप् प्रत्यये त्वर्वैति सिद्ध्यति ॥
रूढिशब्दश्चायं वाजिवाहार्व गंधर्वहयसैंधवसप्तय इत्यमरोक्तत्वात्तत्त्वार्योऽपि न भिद्यते किमनेन सूत्रेणेति चेदुच्यते नान्तनान्तयोः सर्वत्र प्रयोगमाः
त्रैलोपेन सुपपदे च नान्तस्य प्रयोगो ऽन्यत्र तु तान्तस्य प्रयोगो भवतीति व्यवस्थार्थं सूत्रम् ॥ ॥ ॥ ॥ ॥

ञ्वितोनुम् उश्चऋश्च ववौवरावितौयस्यसञ्वित् तस्यञ्वितः उदित ऋदित स्त्वनुम् स्यात् सोनः पुंस इत्सनोमंडूकप्लुत्यापुंसइत्यनुवर्त्ततेतेन पुंसिपंच स्वित्यर्थः॥ धातोर्नलोपिनोऽचतेरेव अचेर्दीर्घश्चेत्यतोऽचेरित्यपकृष्यते नचैववाचेरितिविभज्य पंचस्वितितुमितिचानुवर्त्तते अचेरितिनिर्द्देशात् नलोपिनोग्रहणं धातोश्चेदुञ्वित्कार्यंतर्हि अंचतेरेवेतिनियमार्थमिदं तेनस्त्रंसादीनामीप नुमोन ऋदित्वान्नुम् अर्वतौ नञ्तत्पुरुषेतु न अर्वाअनर्वायज्ववत् इतोत्यच

ञ्वितोनुम् उकारानुबन्धस्यऋकारानुबन्धस्य च नुमागमोभवति पुंसिपञ्चसु अर्वन्तौ अर्वन्तः अर्वन्तम् अर्वन्तौ अर्वतः अर्वता अर्वद्भ्याम् अनञः किम् अनर्वाणौ असौकिम् अर्वा इतोऽत्यंचसु पथिन् मथिन् ऋभुक्षिन् शब्दानामिकार स्याकारादेशोभवति पुंसिपञ्चसुशौच थोनुट् पथिमथोस्यस्यनुट्स्यात्पुंसिपञ्चसुशौच आसौ पथिमथिऋभुक्षांटेरल्त भवतिसौ पन्थाः पन्थानौ पन्थानः हेपन्थाः पन्थानम् पथांटेः पथिमथिऋभुक्षांटेर्लोपोभवति शसादौस्वरे ईपीका रेच पथः पथा पथिषु एवमंथाऋभुक्षाः स्त्रियान्नान्तत्वादीप् सुपथी सुमथी अनृभुक्षीसेना क्लीबे शोभनः पन्थाप।

॥ स्विनवनेतत्सुपथिवनम् ॰ ॥ ॥ ॰

तु पथांटेरित्यतः पथामित्यनुवर्त्तं पन्थादेरितोऽत्स्यात् पुंसिपंचसुशौच शौसुपंथानि पुंसिकिं सुपथी पतस्यचेतिचादिन् प्रत्ययः पथिन् मंथतेः किन् प्रत्ययेमथिन् शब्दः ऋभुक्षः स्वर्गस्तद्योगान्तोऽस्त्यर्थेइन् प्रत्ययेऋभुक्षिन् थोनुट् पन्थादेस्यस्यनुट्स्यात् पुंसिपंचसुशौच थस्येतिकिम् ऋभुक्षाः पुंसि किम् सुपथि [illegible]पथांटेरितिपदद्वयमनुवर्त्तते पन्थादेष्टेरात्स्यात् सिप्रत्ययेसोकिं पथिभ्यां पथांटेः पन्थादेष्टेर्लोपःस्यात् शसादौस्वरेईपिईकारेच पथामिति॥

वहुवचनमाद्यर्थं स्त्रियां नणङ्गीप् ततष्टिलोपः सुष्टु पंथा यस्याः सा सुपथी रथ्या ऋक्पूरिति अप्रत्ययो न नपूजने इतिनिषेधात्समासांतवि
धेरनित्यत्वाच्च सुष्टु पंथा यस्यां सा सुपथी नगरी नविद्यते ऋभुक्षा इंद्रो यस्यां सा अनृभुक्षी नगरी क्लीवे सुष्टु पंथा यस्मिन् ततः सुपथि आत्वं स्वत्रन ॥
लुकिनतल्लिमित्तमितिनिषेधात् ॥ ॥ धोनपुंसकानांनस्यलोपोवा ॥ हेसुपथिइत्यत्र नलोपस्यासिद्धत्वात् ऋच्छणामितिगुणो न द्विवचने पथामिति टिलो
पः सुपथी शौलुः लेनुटि उपधादीर्घत्वे सुपंथानि किंच पंथानमात्मन इच्छतीति पथीयति ततः क्विप् ततइत्यस्य लोपः यवयोरितियलोपः एकदेशविकृ
तस्यानन्यत्वादासा विसात्वं योतुडिति नुट् पंथाः अत्वं तु नइतइतित परकरणात् य्वोर्धात्वोरितीप् पंथियौ एवं ऋभुक्षाः ऋभुक्षियौ इनांशौसौ ॥

धोनपुंसकानान्नस्यलोपोवा हेसुपथिन् हेसुपथि सुपथी सुपन्थानि इनांशौसौ इन् हन्॰
पूषन् अर्य्यमन् इत्येतेषां शौसौचाधौ परे उपधायादीर्घोभवतिनान्यत्र दण्डी हेदण्डिन् द
ण्डिनौ दण्डिनः एवंकलिन् हलिन् यशस्विन् वाग्मिन् प्रभृतयः वृत्रहा वृत्रहणौ वृत्रहणः

वहुवचनमाद्यर्थं अर्थवत्परिभाषाया अनित्यत्वादर्थवतो ऽनर्थकस्यापीनोग्रहणं उपधाया इत्यनुवर्त्तते अधाविति चनोपधाया इत्यनेनैव सिद्धे नि
यमार्थमिदं तदाह इनादीनामुपधायाः शावेव दीर्घः स्यान्नान्यत्रेति उपधादीर्घस्यैवायंनियमस्तेन वृत्रहे वाचरतीति वृत्रहा पत्ते २ कर्तुर्यङ्॰ इत्यत्रये
इतिदीर्घो भवत्येव वृत्रहणौ त्यत्र जमस्यक्विति रुसेइतियोदीर्घः सोपि नियमेन व्यावर्त्यते उपधादीर्घमात्रापेक्षया नियमविधानादिति सावितित
नुविध्यर्थम ॥ पूर्वेण नियमात् सावप्राप्ते योगविभागाभिप्रायेणैव सौसाविति निर्देशोस्ति अन्यथा शिस्योरित्येवावक्ष्यत ननु पंथा इवाचरतीति पथी
नतिक्विप् इत्यादौ अमांतस्यसुपधादीर्घो न प्राप्नोति पथ्यादीनामिन्नंतत्वात् इन्नादीनां शौसावेवेत्सुपधादीर्घस्य नियमादिति चे दुच्यते यत्र इनामि

नित्यत्वं प्रवर्त्ततेतत्रैवायं नियमः यथादंडीवाचरतीति दंडीनतिक्विप् वृत्रहणति पूषणति अर्यमणति इति दंडोस्यास्तीति दंडी मांतोपधादितीन् त्रीवहवोदंडिनः संतियेषांतानि बहुदंडीनि मुशलमस्यास्तीति मुशली हलमस्यास्तीति हली रेवतीरमणोरामः कामपालोहलायुध इत्यमरः यशोऽस्यास्तीति यशस्वी विन् वागस्यास्तीतिवाग्मी ग्मिन् वृत्रंहतवानिति ॥ ॥ वृत्रहा क्विबंतः वासवोवृत्रहावृषेत्यमरः अवकुप्वं तरेपीतिणत्वं वृत्रहणौ ॥ ॥हनोघ्न्न हनः घ्नेइतिछेदः आदेस्सरस्येत्यतोऽचीतीत्यनुवृत्तं ञितिणितिप्रत्ययेनकारेचपरे हंतेर्हस्यघस्स्यात्

हनोघ्न। हन्तेर्हकारस्यघोभवत्युपधालोपेनकारे ञिति णितिचपरे घसंयोगेणत्वन्न वृत्रघ्नः वृत्रघ्ना वृत्रहभ्याम् एवम्पूषन् अर्य्यमन् संख्याशब्दाः पञ्चन्प्रभृतयोबहुवचनान्तास्त्रिषुसरूपाः जश्शसोर्लुक् षकारनकारान्तसंख्यायाः परयोर्जश्शसोर्लुक् पञ्च २॥ पञ्चभिः पंचभ्यः २॥ ॥ ॥ ॥

अल्लोपःस्वरेइत्यल्लोपेपपलेचकृते अवकुप्वंतरेइतिणत्वेप्राप्ते आह घसंयोगेणत्वंन घकारात्परस्यनस्यणत्वंनभवति वृत्रघ्नः वृत्रघ्ना पूषास्वर्यः अर्यमाखिः जश्शसोर्लुक् संख्यायाइतिसूत्र इतिचानुवर्त्तते संख्यायाः किम् विप्रुषः पामानः इत्यइतिकिम् चत्वारः शतानिसहस्राणीत्यत्रसंनिपातपरिभाषयाजश्शसोर्लुग् नतयाहि संनिपतनंसंनिपातः आनंतर्यसंनिपातोलक्षणंकारणंयस्यस संनिपातलक्षणोविधिस्तद्विघातस्यकारणविघातस्यानिमित्तंनप्रयोजकः यमुपजीव्ययोविधिः प्रवृत्तः सतत्स्योपजीव्यस्यविरोधं नकरोतीतिपरिभाषार्थः शिमाश्रित्यप्रवृत्तोनुमशेर्विघा

सि॰चं॰प्र॰ टी॰सु॰ ५०

षाः षच नकाययोः समाहारः अतत्स्मात्संख्यायाइत्यनुवर्त्तते हमइति तस्य विशेषणं विशेषणे न तदंत विधिः संख्यायाइति किं त्रिषां पञ्चनां स्वट्
तिदिं विंशतां [?]शतां न लोपे नोपधायाइति दीर्घं च पंचानाम् प्राधान्ये परमाश्च ते पंच च [?] पंचानेषां गौणत्वे न लुग् नुटौ गौणे ह्मां त संख्या
याः जश्शसोर्लुक् नामिति नुट् न संख्यावाचित्वाभावात् प्रियाः पंच यस्य स प्रियपंचा आमि प्रियपञ्चानाम् नकारद्वयमध्ये च कारः अष्टनो दीर्घ अष्टन्
इत्येकवचनं तु नेति वत अष्टा पः स्वरे इत्यस्य प्रवृत्तिर्निमित्तं जश्शसोरित्यनुवर्त्तते वा ष्विति वा शब्द उभयत्र संबध्यते काकाक्षिगोलकन्याये

षाः षकारनकारान्तसंख्यायाः परस्य आमो नुडागमो भवति पञ्चानाम् परमपञ्चानाम् गौणत्वे न लुङ्नुटौ प्रियपञ्चा प्रिय
पञ्चानौ प्रियपञ्चानः प्रियपञ्चः प्रियपञ्चा एवं सप्तन् नवन् दशन् प्रभृतयः अष्टनो दीर्घा अष्टन्शब्दात्परयोर्जश्शसो
र्डौ भवति अष्टौ अष्ट अष्टौ अष्ट वा सु अष्टनस्सकारभकारादिषु विभक्तिषु वात्वम्भवति अष्टाभिः अष्टभिः अ
ष्टाभ्यः अष्टभ्यः २॥ अष्टानाम् प्रिया अष्टौ यस्य सो प्रियाष्टा प्रियाष्टानौ प्रियाष्टानः प्रियाष्टः प्रियाष्टा प्रियाष्टाभ्याम्॰
प्रियाष्टो राजवत्सर्वं हाहावच्चापरं हसे॥ ॥ ((नेति ननु षष्ठीनिर्दिष्टत्वादंतस्य डौ भवति न चानेकवर्णत्वात्सर्वादेशः स्यात् नानुबंधकृ
तमनेकवर्णत्वमित्युक्तत्वादुच्यते डित्वसामर्थ्यान्नोक्तदोषस्तथाहि अंत्यादेशस्तु जसि अष्टानाविति सिद्धः अष्टाविति प्राप्नोति तच्चांतरेण डित्वं सिद्धं
अतो डित्करणसामर्थ्यात् सर्वादेशः लुकोपवादोयमिति सर्वादेश इति वाडो शिति वा सु वचं डौत्वं हि लुग् नुटाविव प्राधान्ये एव भवति ननु गौणत्वे स राम॰
प्तभ्यांतुटचेत्यनेन सप्तन् अष्टन् शब्दो निष्पन्नो वा सुस्मीत्सपदत्रयेते तेन स्यादयो विशेष्यं ते वा ओ आ सु इति च्छेदः सकारभकारादौ स्यादौ परे अ ५०
ष्टन आत्वं वा भवतीति फलितोर्थः इत आरभ्य संख्याया इति निवृत्तम्॥ ॥

व्याख्यानात् तेन गौणत्वेपि स्यादात्वम् स्यादेवेतिकिं अष्टभार्याः अष्टसेवकः स्त्रीतिकिं प्रियाष्टानौ प्रधानेपरमाष्टौ गौणत्वे प्रियाः अष्टौयस्यसप्रिया ष्टा आत्वाभावेराजवत् शसि भस्याल्लोपः स्वरेइत्यकारलोपेकृते ष्टुभिष्टु रितिणत्वंप्राप्तमसिद्धं बहिरंगमन्तरंगेइतिपरिभाषयानशस्निमित्तकत्वेनबहिरं गस्याल्लोपस्यासिद्धत्वात् पूर्वंपूर्वमन्तरंगमितिस्वीकारात् आत्वपक्षेप्रथमैकवचनेप्रियाष्टाः हाहाशब्दवत् प्रियाष्टन्शब्दस्याऽऽत्वाभावपक्षेसर्वंरू पंराजवत् आत्वपक्षेतु हलादावपरंरूपंहाहावत् इतिनांताः॥ ॥सुष्ठुगणयतीतिसुगण् गणपतेर्विण्प्रत्ययः शसेहृतेना रिन्तिदुकिसुगणट्सु शसे चयस्येतिद्वितीये सुगण् ट्सु ट्नादितिधुटि सुगणट्त्सु क्विप्प्रत्ययेतु सुगण् जमस्याङ्क्वितिरुसेइतिदीर्घेकर्तव्ये अल्लोपञिलोपयोः स्थानिवद्भा

सुगण् सुगणौ सुगणः सुगणम् सुगणौ सुगणः सुगणट्सु भुत् भुद् बुधौ बुधः भुद्भ्याम् भुत्सु राक् राग् राघौ राघः राग्भ्या म् राक्षु सुककुप् सुककुब् सुककुभौ सुककुभः सुककुब्भ्याम् सुककुप्सु युजेऽसमासेनुम् नसमासेइतिच दिशाम् दिश् दृश् स्पृश् दधृष् ऋत्विज् क्रुञ्च् युज् सज् अञ्च् उस्निहादीनांकुत्वंस्यादौरसेपदान्तेच संयोगान्तस्यलोपः युङ् युञ्जौ

युञ्जः युञ्जम् युञ्जौ युजः युजा युग्भ्याम् समासेतु सुयुक् चोःकुः चवर्गस्यकवर्गोभवतिधातोर्भ्कसेनाम्नस्यरसेपदान्तेच वानशंक्यः दीर्घविधौतन्निषेधात् इतिणान्ताः बुध्यतेःक्विप् भ्रादिजवानामितिभःजवत्वचपत्वेभुत् भुद् जवत्वे भुद्भ्याम् चपत्वे भुत्सु इतिधां ताः राघ्नसामर्थ्येराघते इतिराक् क्विवंतः इतिघांताः सुष्ठुककुप् यस्मिन् ससुककुप् दिशस्तुककुभः काष्ठाइत्यमरः इतिभांताः युजेरसमासेनु मुन्समासे इतियुजिर्योगे इत्यस्य धातोः पंचसुसादिषुनुमस्यान्नतुसमासे इतिचनयया युजी कुलेयुजेरिति धातुपाठपठितेकारविशिष्टस्य ग्रहणंनतु धातूतंदर्शेपद्कृतस्यतेनेहनुमनयुज्यते समाधत्ते इतियुक् युजसमाधौदैवादिक आत्मनेपदी दिशांबहुवचनमाद्यर्थंतेनदिश् १

दृश २ स्पृश ३ दधृष ४ ऋत्विज ५ क्रुंच ६ युंज ७ स्रज ८ अंच ९ उष्णिह १० ॥ त्यं ते दिश दृश स्पृश दधृष् ऋत्विज् स्रजां षत्वे प्राप्ते क्रुंच युंज अं
चाम प्राप्ते उष्णिहो ढत्वे प्राप्ते अयं कुत्वविधिः कुरि त्यनुवर्त्तते चोः कुरित्यतः सुनक्तीति स्निलोपे संयोगांतलोपे च नस्य कुत्वेनानुनासिकोङः ।
कारः युङ् नश्चापदांते इति नुमो नुस्वारे परसवर्णः तस्यासिद्धत्वाच्चोः कुरिति कुत्वं न युङ्ङ्गौ समासे तु सुयुङ् सुयुनक्तीति क्विप् न नुम् चोः कुः रसे किम् ॥
त्वचौ नाम्नः किम् वच्मि [illegible] ते किं वाचि धातोरुसे यथा वक्ता रुसे किं वच्मि कुत्वे सुयुक् ॥ ॥ समाध्यर्थस्य युजेर्नुम्न युक् खंजतीति खजि

समाध्यर्थस्य तु न युक् खञ्न खंजौ खञ्भ्याम् खञ्सु छ्वशषराजादेः षः सम्राट् सम्राड् सम्राजौ सम्राजः देवेट्
देवेड् देवेजौ देवेजः परिमृट् परिमृड् परिमृजौ परिमृजः विश्वसृट् विश्वसृड् विश्वसृजौ विश्वस्य वसुराटो
दीर्घः विश्वावसुः विश्वाराट् विश्वाराजौ विश्वाराड्भ्याम् विश्वाराट्सु विश्वाराट्त्सु ॥ ॥ ॥ ॥

गतिवैकल्ये क्विबंतः संयोगांतलोपे खन् संराजते इति षत्वडत्वे जत्वत्वे च पत्वे च सम्राट् देवान् यजतीति क्विपि यजादित्वात्संप्रसारणे षत्वे च देवेट्
विश्वं सृजतीति विश्वसृट् क्विबन्तः दिशामिति कुत्वं न सृजिदृशोरिति सूत्रे रज्जुसृड्भ्यामिति भाष्यप्रयोगात् यद्वा सृजियज्योः कुत्वापवादः षत्ववि
धिरेवस्त्वग्लिकुशब्दयोस्तु दिशामित्यनेन कुत्वमेव परिमार्ष्टीति परिमृट् विश्वस्य वसुराटो दीर्घः विश्व शब्दस्य दीर्घः स्यात् वसुशब्दे राट्शब्दे च परे विश्वं
वसु द्रव्यं यस्य स विश्वावसुः राडिति डशब्दस्य स्वरूपोपलक्षणार्थमविवक्षितं च यत्वं विश्वेस्मिन् राजते इति विश्वाराट् ॥ ॥ ॥ ॥

स्कोरन्ते च ॥ आदिशब्दस्याऽवयववाचित्वेन ससंबंधित्वादवयव्याकांक्षायां संयोगे इति संबध्यते संयोगशब्दस्यापि हि समुदायवाचित्वादवयवा ऽर्थकत्वेनाऽवयव्याकांक्षायां नाम्नो धातोश्चेति संबध्यते संयोगान्त   लोपापवादः रुसेत्वं पूर्वो विधिः रुसे भ्रष्टा पदान्ते अवाभ्रट् आद्योः किं दंक्ष्य ति नक्ष्यति भज्जनीति क्विप् ग्रहामिति संप्रसारणं सोपभत्वात् षत्वे स्कोरिति सलोपे च सिलोपः भृट् सस्य चुत्वेन शः शस्य व्रश्चेजवाइति जः भृज्जौ वृक्ष वृश्चतीति क्विपि ग्रहामिति संप्रसारणं व्रश्चेति षत्वं स्कोरिति सलोपः जश्त्वचर्त्वे वृट् वृड् सुपि टनादिति धुट् तत्र षत्वं वृट्सु वृड्सु चातेषु वक्ष्यमाणः विशेषेण भ्राजते इति विभ्राट् षत्वविधौ राजिसाहचर्यात् टुभ्राजृ दीप्ताविति फणादिरेव गृह्यते यस्तु राजृ भ्राजृ दीप्ताविति तस्य कुत्व

स्कोरन्ते च । संयोगाद्योस्सकारककारयोर्लोपो भवति धातोर्झसे नाम्नश्च रसे पदान्ते च भृट् भृड् भृज्जौ भृज्जः वृक्ष व-
ट् वृट्वड् वृश्चौ विभ्राट् विभ्राजौ विभ्राड्भ्याम् विभ्राट्सु ऋत्विक् ऋत्विग् ऋत्विजौ ऋत्विक्षु ऊर्क् ऊर्जौ ।
ऊर्क्षु त्यः त्यदादेस्तस्य सत्वं भवति सौ परे स्यः त्यौ त्ये स्यः तौ ते परमस्यः संज्ञायां गौणत्वे चात्वसत्वे न स्यत् स्यदौ अ-
तिस्यत् अतिस्यदौ यः यौ ये एषः एतौ एते ॥ ॥ मेव विभ्राक् ग् विभ्राग्भ्यामित्यादि ऋतौ यजतीति ऋतावुपपदे यजेः क्विप् ॥

यजादित्वात्संप्रसारणं कुतम् ऋत्विक् ऊर्ज बलप्राणनयोः अस्माच्चुरादिण्यन्तात् क्विपि णिलोपः ऊर्जयतीति सभिन्नस्येति नियमात् न संयोगान्तलो पः ऊर्क् इत्यादि त्यः त्यदादेरित्यतः तदादेरिति सो सइत्यतः सइति सा विति चानुवर्तते त्यदादेः किम् तातः प्राधान्ये परमस्यः संज्ञायां गौण त्वे चात्वसत्वे न अत्वसत्वयोः सर्वादित्वं तयोर्णकार्यत्वादत्वं सत्वं च संज्ञायां गौणे च न प्रवर्त्तेते संज्ञायां स्यत् स्यदौ गौणे त्यमतिक्रान्तो ऽतिस्यत् इद-

सि॰चं॰पू॰ न्वादेशे एकदादेशः एनमित्यादि इति दंताः अग्निमंथतीति क्विपि नो लोपः इति न लोपः अग्निमत् इति थांताः प्रत्यंचतीत्यत्रांचे क्विपि कृते नो लोपः हसां
टी॰ सु॰ तस्येति किम् नीयते उपधाभूतस्येति किम् हन्यते पूजार्थांचतेर्न पूजार्थवाचिनोऽंचतेरुपधाभूतस्य नस्य लोपो न भवति कित् ङिति च निरुपपदात् क्रुंचेः
५२ क्विपि न निर्गतउपपदेभ्यः निरुपपदस्तस्मात् उपपदरहितस्य क्रुंचे रुपधाभूतस्य नस्य लोपो न भवति क्विपि क्रुंच कौटिल्याल्पीभावयोः अंचेः पुंसि पं
चसु नुम् गसर्वनाम्स्थाने चतेर्नुमागमः स्यात् पुंसि पंचसु नलोपे पुनर्नुमि कृते प्रत्यन्च् सि इति स्थिते संयोगांत लोपे सिलोपे च नुमो नकारस्य दिशामिति

न्वादेशे एनम्। एनौ। एनान्। एनेन। एनयोः। अग्निमत्। अग्निमथौ। अग्निमद्भ्याम्। अग्निमत्सु। प्रत्यञ्चतीति क्विपि
कृते नोलोपः धातोर्हसान्तस्योपधाभूतस्य नकारस्य लोपः क्ङिति च परे पूजार्थाञ्चतेर्न्न निरुपपदात् क्रुञ्चेः क्विपि
न क्रुङ् क्रुञ्चौ क्रुङ्भ्याम् क्रुङ्सु क्रुङ्षु क्रुङ्क्षु अंचेः पुंसि पञ्चसु नुम् दिशाम् प्रत्यङ् प्रत्यञ्चौ प्रत्यञ्चः ॥
प्रत्यञ्चम् प्रत्यञ्चौ अचेर्दीर्घश्च नलोपिनोऽञ्चतेरकारस्य लोपः पूर्वस्य च दीर्घः शसादौ स्वरे परे तद्धित यस्वरयोरीपि
कारे च प्रतीचः प्रतीचा प्रत्यग्भ्याम् प्रत्यक्षु तिर्यङ् तिर्यञ्चौ तिर्यञ्चः ॥ ॥

१ कुत्वेन ङकारः प्रत्यङ् अनुस्वारपरसवर्णौ ॥
प्रत्यञ्चौ अचेर्दीर्घश्च लुप्तनकारस्यांचतेरतो लोपो भवति ईपि ईकारे च प्रतीची तद्धित यस्वरयोः प्रतीच्यः प्रतीचीनः अचेरिति नाय मिकृमस्य ॥
किंतूच्चारणार्थो यमिकारः नलोपिनि र्देशो ज्ञापकः। इकः कित्वान्नलोपे कृतेऽचेरित्यस्य कार्येऽज्ञापनात् ननु पूर्वस्येति कस्मादत्र बंधं उच्यते दीर्घ श्रु
तोपस्थितः स्वरएवात्र स्थानी शसादौ स्वरे इति लोपदीर्घयोर्निमित्तं सप्तमी निर्देशात् पूर्वस्याऽव्यवहितस्य स्वरस्य दीर्घप्राप्ते येन नाव्यवधानं तेन व्यव राम॰
हितेपीति वचनप्रामाण्यात् चकारेण व्यवहितस्याप्यत्र दीर्घः अचेरिति लोपस्य विषयेऽन्तरंगोपि इयमिति यकारेण अकृतव्यूहा इति परिभाषया प्र ५२

तिरश्चादयः सिद्धरूपनिर्देशो निपातनं एतेनिपात्यंते ईपिईकारे च तिरश्चो तद्धितयस्वरे यकारे च तिरश्चीनः उदीचः तिरश्चादिरिति सूत्रं वर्णनीयम् आदि शब्दादुदीच इति बहुवचनं तु व्यर्थं तृतीयस्याभावात् पदादयः षोडशादेशाः ननु मयकुशब्दा इति पक्षाश्रयणे तु बहुवचनस्य सार्थक्यं वो ध्यम् उदंच तीति उदङ् अनोदीर्घो न अकारस्य दीर्घो न भवति लुप्ताकारनकारे ऽचतौ परेपि अचः सहांचतीति सहादेर्‌ भ्रिः इति सहस्य सध्रिः सध्र्यङ् समंचतीति सह देरिति सम सभिः सम्यङ् प्रकर्षेणांचतीति प्राङ् पूजार्थस्यांचतेस्तु प्रत्यंचति पूजयतीति क्विपि पूजार्थांचतेरिति नलोपाभावः अत एव नु मून ॥

तिरश्चादयः तिरश्चादयो निपात्यन्ते शसादौ स्वरे तद्धितयस्वरे योरीपीकारे च तिरश्चः तिरश्चा तिर्यग्भ्याम् तिर्यक्षु उदीचः = उदग्भ्याम् उदक्षु पितरमञ्चतीति पित्र्यङ् पित्र्यञ्चौ अनोदीर्घो न पितृचः पित्र्यग्भ्याम् पित्र्यग्भिः पित्र्यक्षु सध्र्यङ् सध्रीचः सम्यङ् समीचः प्राङ् प्राचः पूजायां तु प्रत्यञ्चः प्रत्यञ्चा प्रत्यङ्भ्याम् प्रत्यंक्षु ॥ प्रत्यङ्षु प्रत्यङ्ख्षु उदञ्चः उदङ्भ्याम् तिर्यञ्चः तिर्यङ्भ्याम् सम्यञ्चः सध्र्यञ्चः प्राञ्चः प्राञ्चा सहादेस्सादिः अमुमञ्चतीति अमुमुय

प्रत्यङ् शसि नलोपाभावाद् [illegible]कार लोपो न प्रत्यंचः सुपि प्रत्यंच् सु इति स्थिते दिशामिति कुत्वात् प्राक् संयोगांतस्येति चलोपेन सकुत्वेन ङकारे चकते शसेङ् [illegible]गारिति कुक् पक्षे प्रत्यङ्क्षु शसेव पक्षे ति पक्षे खकारः प्रत्यङ्ख्षु कुगभावे प्रत्यङ्षु एवं पूजार्थे तिर्यङादयः विष्वग देवयोश्च देर द्र्यंचतौ वप्रत्यये चादद सोग्रहणं [illegible]योरदसश्च टेरद्र्यादेशः स्यात् वप्रत्ययांते चंतौ परे अमुमंचतीति विग्रहे अदस अव इति स्थिते अद्र्यादेशे अ दद्रि अद्रु इति पक्षे अदसोसेर्दादु दो मः असेरिति इकार उच्चारणार्थः असकारांतस्यादसो दात्परस्य उदूतौ भवतः दस्य मश्च उ इति ह्रस्वदीर्घयोः स

धीरस्त्यस्येति धीमान् अस्त्यर्थे मतुः इति मतुः मघशब्दाद्धेतुमत्सये मघवच्छब्दः उपधादीर्घादिभागवत् हविर्जक्षितिनिः शंको मखे शुमघवान् सावित्ति
महिः कृत्वंतत्वाभावे महेहस्य घोवुगागमः कन्मस्य श्वेत्यतत्त्वितत्वे निपातनात्कृते मघवन् शब्दः श्वादेरित्यचोक्त एव इति तांताः गोपायतीति।
गुप् क्विपंतः आयादयो न्यपीनिवैकल्पिकत्वादिहायप्रत्ययाभावः आयप्रत्ययपक्षे तु यत्तदृत्यहलोपेयलोपेच गोपाइतिरूपंबोध्यमितिपांताः॥
तमिवपश्यतीति दृशे टक् सकाविति च कारात् क्विप् आसर्वादेरित्यात्वे दिशामिति कुत्वं तादृक् नशेः नशेः कवर्गान्तादेशो वास्यात् स्यादौ झलि पर

धीमान् हे धीमन् धीमन्तौ मघवान् मघवन्तौ मघवद्भ्याम् गुप् गुब् गुपौ गुपः गुब्भ्याम् तादृक् तादृशौ तादृशः तादृ
क्षु एवं यादृगादयः नशेऽङ्कोवापदान्तेस्यादौ झसे च नक् नग् नट् नड् नशौ नशः नग्भ्याम् नड्भ्याम् नक्षु नट्सु विट्।
विड् विशौ विशः स्पृक् स्पृग् स्पृशौ स्पृशः घृतस्पृक् उदकपूर्वस्य न कुत्वम् उदकस्पृट् उदकस्पृशौ दधृक् दधृग्
दधृषौ दधृक्षु रत्नमुट् रत्नमुड् रत्नमुषौ रत्नमुड्भ्यां षष् शब्दो नित्यम्बहुवचनान्तस्त्रिषु सरूपः जश्शसोर्लुक्॥
षट् षड् ष्णः षकारस्य णो भवति नामि परे षण्णाम् षट्सु षट्त्सु परमषट् परमषण्णाम्॥ ॥ ॥ ॥

शांतेच नश अदर्शने क्विप् षत्वं जश्त्वं च पक्षे नट् नड् कत्वे तु नक् नग् विश प्रवेशने क्विप् षत्वं जश्त्वं च पक्षे विट् विड् घृतं घृते न वा स्पृश् स्पर्शने एम॰
तीति घृतस्पृक् उदकपूर्वस्य न कुत्वं उदकपूर्वस्य स्पृशेस्तु दिशामिति कुत्वं न उदकं स्पृशतीति षत्वं उदकस्पृट् इति शांताः ञिधृषा प्रागल्भे॥ ५५
अस्मात् क्वि १ हित्वं निपातनात् दिशामिति कुत्वे धृष्णोतीति दधृक् मुष स्तेये रत्नानि मुष्णातीति रत्नमुट् ड जश्शसोरिति जश्शसोर्लुक् झत्वम्॥
जश्त्वं च पक्षे षट् षड् ष्टुत्वे षड्भिः अमिह इति तु दिहृते षस्य डत्वं न स्य च ष्टुत्वं॥ ष्णः॥ डकारस्य च पे षनं तभूतत्वात् पदांतत्वाच्च न मे न माव स्यस्याः प्राप्ते

एवं पृ पालनपूरणयोः पोरुत्पुरः पूः धुर्वी हिंसायां क्विपि य्वयोरिति वलोपः धूः त्रिचतुरोरिति चतस्रादेशः नतिस्त्वतस्रोरिति न दीर्घः चतसृणां प्रियाश्च
त्वारो यस्याः सेति पदार्थस्त्रियां मुख्या विशेषकत्वान्न चतस्रादेशः चतुरमित्याम् प्रियचत्वाः धावमित्यम् हेप्रियचत्वः इयं स्त्रियाम् इदमोयमित्यत्र ॥ इद

एवमपुर धुरादयः। चतस्रः। प्रियचत्वाः प्रियचत्वारौ प्रियचारः हेप्रियचत्वः इयं स्त्रियाम् इदमः स्त्रियामियं सौ इयम्।
इमे इमाः अनया आभ्याम् आभिः अस्यै अस्याः अनयोः आसाम् अस्याम् आसु अन्वादेशे एनाम् एने एनाः
एनया एनयोः स्रक् स्रजौ स्रग्भ्याम् स्रक्षु समित् समिद् समिधौ समिधः समिद्भ्याम् समित्सु सा ते ताः एवमेतद्।
यद् एतद् किम् वाक् वाचौ वाग्भ्याम् वाक्षु ककुप् ककुभौ ककुब्भ्याम् ककुप्सु त्वक् त्वग् त्वचौ त्वचः त्वचम् त्वग्भ्याम्।
ऋक् ऋचौ ऋचः ऋचम् ऋग्भ्याम् ऋक्षु अप्शब्दो नित्यं बहुवचनान्तः आपः अपः भिदपाम् अप्शब्दस्य दत्व
भवति भकारादौ विभक्तौ अद्भिः अद्भ्यः अद्भ्यः अपाम् अप्सु दिक् दिग् दिशौ दिशः दिग्भ्याम् दिक्षु त्विट् त्विड्
त्विषौ त्विषः दृक् दृग् दृशौ दृशः सहजुषत इति सजूः सजुषौ सजुषः सजूर्भ्याम् सजूःषु आशीः आशिषौ आशीर्भ्या
म् आशीःषु असौ अमू अमूः अमूम् अमूः अमुया अमूभ्याम् अमूभिः अमुष्यै अमुष्याः अमूषाम् अमुष्याम् अमूषु

मस्यानुवर्तते सोमदस्यतः सावितिच त्यदाद्यत्वे आप् मत्वं औरितीत्वं इमे अनटोसोरित्यनादेशः टौसेमिल्येत्वं अनया स्यदस्त्वं आभ्यामन्वादेशे इद
एतदोरित्येनत् शेषं सर्वं चतत सृजेः क्विप् अमागमश्च निपातितः दिग्रामिति कुत्वं स्वकृ ग इन्ध मेधः समित् स्त्रियामित्यमरः त्यदाद्यत्वे आप् तदिति सः॥

सयङः तस्यशौतुमन सम्रयङ्घसमहौ सयङावंतेयस्ससयङःतस्तस्मसयङः तस्यवान्नोनुमूनशो परे वेभिदि चेछिद्यते इतिचेछित शौचेछिदिसप्तम्यांत स्वशौपिपदिपिजांयंतेनवस्रौतया भिचनवम्यान भिसभ्यांसंगमेषट् संख्यानिनवैवसुप्पयजसिद्धीत्येवतह छभि चत्वार्यस्यवचस सुकस्यविबुधाः शब्दस्य रूपाणितन्धानंतुमतिभाति चेन्निगदितुं षाएमासिकोवावधिः १ राजसभायामितिश्लोकः केनचित्कविनोक्तस्तदाकश्चित्पंडितः श्लोकद्वयेन तदुत्तरमा ह श्लोकः गवाक्शब्दस्यरूपाणि क्लीवेऽर्चागतिभेदतः असंध्यगागमाद्वोपैर्नवाधिकशतंमतं १ व्याख्या गवाक्शब्दस्यरूपाणि अर्चागतिभेदतः पूजागत्य

सयङःतस्यशौतुमन चेछित चेछिदौ चेछिदि गवाक् शब्दस्य रूपाणि क्लीवेर्चागतिभेदतः असन्ध्यगागमाद्वोपैर्नवा धिकशतम्मतम् स्यमसुप सु नवषट् भादौ षट् केसु त्रीणि जश्शसोः चत्वारि शेषे दश केरूपाणीतिविभावय गवाक् गवाग् गोअक् गोअग् गोक् गोग् गवाङ् गोअङ् गोङ् गोची गवाञ्ची गोअंची गोञ्ची गवाञ्चि गोअञ्चि गोञ्चि गवासु गोअसु गोसु गवाङ्सु गोअङ्क्ष गोङ्सु गवाङ्षु गोअङ्षु गोङ्षु गवाङ्ख्षु गोअङ्ख्षु गोङ्ख्षु ॥ ॥

र्चभेदेननवाधिकशतंबोध्यानि विंशत्याद्याः सदैकत्वेसंख्याः संख्येयसंख्ययोरिसुक्तत्वादेकत्वंशते अंचेर्गतौनस्यलोपः पूजायांतुनेत्याशयः कीदृ शं असंध्यगागमाद्वोपैर्मतं गोरवेत्यगागमेनगो वेतिप्रकृतिभावाद्वोपाभ्यांवाचार्याणां मननविषयीभूतं उक्तंसंख्यामाह प्रत्येकंस्यम् सुप्सुनवरूपा
णिसुः भादौ षट्के षट्जश्शसोस्त्रीणिशेषेदशकेप्रत्येकंचात्वारि इतिनवाधिकशतं रूपाणित्वंविभावय जानीहि शसेचपस्येति वार्तिकमनाश्रि।
त्योक्तं मन्यथाचत्वारिरूपाणिवर्द्धन्तेइत्यर्थः ३ गामंचतीति विग्रहे क्विप् गतौनलोपः इतिनलोपः गोअच् सि इतिस्थिते ऽगागमे चोःकुरिति कुत्वम्

गवाक् १ गवाग् २ प्रकृतिभावे गोअक् ३ गोअग् ४ अल्लोपे गोक् ५ गोग् ६ पूजायांनस्यकुत्वेनङः अक् गवाङ् ७ प्रकृतिभावे गोअङ् ८ लोपे।
गोङ् ९ अप्ययेतानिरूपाणि औपरतः अचेरित्यल्लोपे गोची पूजायांतु गवांची गोअंची ३ गोंची ४ श्रोनुमय इतिनुम् गतिपूजनयोस्त्वी।।
गोपवत्साहभ्यात गवांचि गोअंचि २ गोंचि ३ टापरतः अचेरित्यल्लोपः गोचा १ पूजायाम् गवांचा २ गोअंचा ३ गोंचा ४ भ्यामि गवाग्भ्याम् १ गोअ
गभ्यां २ गोगभ्याम ३ पूजायां गवाङ्भ्याम् ४ गोअङ्भ्याम् ५ गोङ्भ्याम् ६ भिस्यपरे गवाग्भिः १ गोअगभिः २ गोगभिः ३ पूजायां गवाङ्भिः।
४ गोअङ्भिः ५ गोङ्भिः ६ ङेपरतः अचेरित्यल्लोपः गोचे १ पूजायां गवांचे २ गोअंचे ३ गोंचे ४ भ्यामि प्राग्वत् भ्यसि गवागभ्यः १ गोअगभ्यः २
गोगभ्यः ३ पूजायां गवाङ्भ्यः ४ गोअङ्भ्यः ५ गोङ्भ्यः ङसौ गोचः १ पूजायां गवांचः २ गोअंचः ३ गोंचः ४ भ्यामिभ्यसिच प्राग्वत् ङस्परतोङ
सिवत् ओसि गोचोः १ पूजायां गवांचोः २ गोअंचोः ३ गोंचोः ४ आमि गोचाम् १ पूजायाम् गवांचाम गोअंचाम ३ गोंचाम ४ ङौ गोचि १
पूजायां गवांचि २ गोअंचि ३ गोंचि ४ ओसिच गोचोः १ पूजायाम गवांचोः २ गोअंचोः ३ गोंचोः ४ सुपि गवाक्षु १ गोअक्षु २ गोक्षु ३ पूजायाम
प्रसेङ्णा णोनित्ति ज्ञातानांकुक्पसे गवाङ्सु ४ गोअङ्सु ५ गोङ्सु ६ कुगभावे गवाङ्षु ७ गोअङ्षु गोअङ्षु ८ एवंनवाधिकशतंरूपाणिकु
कृपसेशते च पत्स्यति ककारस्यस्वरव्याकरणत्रयाणामाधिकंज्ञेयम अन्यत्रतु कुत्वस्यासिद्धत्वान्नखकारः एवंद्वादशाधिकम् ।। ।।तिरोंचतीतितिरोलो
पः इतिनलोपः चोःकुरितिकुः तिर्यक् सहादित्वात्तिरिः औपरतः तिरश्चादयः इतितिरश्च तिरश्ची श्रोनुमयम इतिनुम् तिर्यंचि पूजायां तिर्यङ्।।
यत्कालखंड शकृत पुरीषं गूथं शशादोपादर्दतेतिपकन शकन्नादेशोवा ददादितिपुंल्लिंगेउक्तएव द्विरुक्तानांजसादीनांचेतिवानुम ।। ।।

सि॰चं॰पू॰
टी॰सु॰
५९

ददंति ददति वादीपोः शतुः वा आत् ईपोरिति पदच्छेदः आदिति पंचमी ननु तपरत्वं ईश्च ईप् च ई पो तयोः शतुरित्यवयव षष्ठी ननु तुदती इत्यत्र
क्षिति चतुर्वदित्यनेन कृतस्य तुदादेरित्यः प्रत्ययस्यादेङ् इत्यनेनांतरंगत्वाल्लोपे कृते ऽवर्णात्परत्वाभावान्नुम् नस्यात् उच्यते प्रत्ययलक्षणेन तत् परत्व
मस्त्येव नचैवं घ्नंतीत्यादावतिप्रसंगः लुकि नतन्निमित्तमित्यनेन प्रत्ययलक्षणप्रतिषेधात् भातीति भात् भादीप्तौ शत् प्रत्यये शित्वादप् अदादित्वाद

तिर्यक् तिरश्ची तिर्यंचि तिर्यङ् तिर्यंचौ तिर्यञ्चि यकृत् यकृती यकृन्ति यकानि यक्ना यकृता यकभ्याम् यकृद्भ्या
म् एवं शकृत् ददत् ददती ददति ददन्ति एवं जाग्रदादयः तुदत् वा ईपो श्शतुः अवर्णान्तात्परस्य शतुर्वा नुमी का
रे ईपि च तुदती तुदन्ती तुदन्ति भात् भाती भान्ती भान्ति अप्श्यनोर्नित्यम् अप्प्रत्यय यप्रत्ययसंबन्धिनो ऽवर्णात्पर
स्य शतुर्नुम् नित्यमीकारे ईपि च पचत् पचन्ती पचंति दीव्यत् दीव्यन्ती दीव्यन्ति स्वप् स्वब् स्वपी स्वम्महत इति दीर्घः

पाल्लुक् अप्श्यनोर्नित्यम् वाईपोरित्यतईपोरित्यनुवृत्तं विकल्पे प्राप्ते नित्य विधानार्थमिदं अप्च यश्च श्यौ तयोरात्परस्य शतुर्नित्यं नुम् भवति ईईपोः ननु
अप्श्यनोरित्यत्र चपा ऽश्च इति जवत्वं वक्तुं युक्तम् उच्यते ज्ञापनार्थमेवं निर्देशः प्रत्ययेपरतः क्वचित्पदत्वं नेति तेन तडित्वानित्यादि सिद्धम् पचतीति पचत् अप्
कर्तरीत्यप् अदेङ् इत्यल्लोपः दीव्यतीति दीव्यत् दिवादेरिति यः सुपु ऽप्राप्यो ऽस्मिन् सरस्मिन् तत्स्वप् ऋकृपूरित्य प्रत्ययो ननपूजने इति निषेधात् श्रोनित्या

एम॰
५९

स्वांपि तदंतेदीर्घो ऽ स्यनेसेके स्वंपि अर्ति दृवपि यजितनिधनितपिभ्यउसितिसोणादिकः धनेरुस धनुः शौन सम्महतइतिदीर्घः विसर्गनुमितिषत्वं
नश्पूर्वस्यशोदीर्घः नसम्महतइत्यस्यैवप्रपंचः धनूंषि धनुर्भ्यामत्रघ्वोर्विहस्यइतिनदीर्घो ऽ धातुत्वात् अर्चिशुचिहुसृपीत्यादिनाजुहोतेरिसह
विः पिपठिषतेः क्विप् घ्वोर्विहसेइत्यनेनदीर्घत्वं पिपठी: सुष्टुपुमांसोयस्मिन् तत सुपुम् शौपुंसोम्सु डि. स्यर्वासुडू लुप्यम इतिनुम् नसम्महत
इतिदीर्घः सुपुमांसि सदाद्यंतंविभक्तिकार्य्यमस्त्वोते अमू शौनुम्दीर्घौ अमूनि शेषंपुंवत् ॥ ॥इतिहसांतानपुंसकलिंगाः॥ ॥ई॥ ॥

स्वांपि दीर्घोनेस्येके स्वंपि स्वया भिरयाम् स्वद्भ्याम् स्वद्भिः जगत् जगती जगन्ति महत् महती महान्ति धनुः धनु
षी नपूर्वस्यशौदीर्घः धनूंषि हविः हविषी हवींषि पयः पयसी पयांसि तेजः तेजसी तेजांसि वचः वचसी वचांसि
पिपठीः पिपठीषी सपडन्तस्यशौनुम्न पिपठिषि सुपुम् सुपुंसी सुपुमांसि अदः अमू अमूनि शेषंपुम्वत् ॥ इतिहसा०
न्तानपुंसकलिङ्गाः ॥त्वमहंसिना सिनासहितयोर्युष्मदस्मदोस्त्वमह मित्येतावादेशौभवतोयथासंख्येन त्वम् अ

समात्रेयपटलिंगयात्वा त्वमहंसिना युष्मदस्मदोः स्थानेत्व महमित्येतौ यथाक्रमंस्तः सिनेतिसहार्थेयोगेतृतीयासिप्रत्ययेन सहितयोरित्यर्थः नत्र
त्वमहमोर्हसांतत्वादेवसिलोपसिद्धेसाविति वाच्यं व्यर्थं सिनेतिउच्यतेमां तत्वस्यनयातकारोच्चारणसंयोगेने ऽ तित्व मित्यादौचरितार्थत्वात् सिलोपात्परत्वा
त्यदादेरिसात्वं तत्र आम् स्यावित्याले तद्इतितकारस्यसत्वंनस्यात् अतः सिनेसुक्तं इहतदंतविधिरपिइष्टोस्तिपरमत्वं परमाहं गौणत्वेतु त्वांमांयुवामा।
वांयुष्मान् अस्मान् वा ऽ ति क्रांतइत्यत्रापि अतित्वम् सहमित्येव इहयुष्मदस्मदोर्नलिंगसंख्यावाचिनां चालिंगत्वमेवाऽखिंगेयुष्मदस्मदोर्दुस्तुल्कत्वात्

अतएवत्रिषुलिंगेष्वेषांसमानंरूपंलिंगनिमित्तमावीवादिकमनयोर्नालिंगत्वात् त्वंब्राह्मणः अहंब्राह्मणः त्वंब्राह्मणी अहंब्राह्मणी त्वंब्राह्मणकुलम् अहं ब्राह्मणकुलमिति॥ ॥युवावौद्विवचने द्वयोर्योऽर्थः द्व्यर्थवक्त इतिद्व्यर्थवाचिनौ तयोर्युष्मदस्मदोर्युवावौस्तः स्यादौविभक्तौ त्यदादेशेत्यनःस्यादावित्यपक्ष्यानेद्वौवक्त इतिद्विवचनेकर्त्तरि लुट् किंच द्विवचनेइतिप्रत्ययविशेषणेकृतेपियुवावौसिद्ध्यतः तथापि युवामतिक्रान्तान् अतियुवानित्यादौयुवावयो रप्रसंगवारणायप्रकृत्यर्थविशेषणंकृतं आमौ आभ्यामो आम् स्यात् अत्रयोगविभागाभिप्रायेणविपरीतनिर्देशोबोध्यः विपरीतनिर्देशात् सुडामइतिसुट् नप्रवर्तते इतिकेचित गौणत्वेपियुष्मदस्मदोस्त्यदाद्यत्वंभवति इत्येतदर्थव्याख्यानांतरंक्रियते अत्रअअम औइतिच्छेदः अइतियोगविभागःकर्तव्यः लोपःअ

युवावौद्विवचने द्व्यर्थवाचिनोर्युष्मदस्मदोर्युवावादेशौभवतोविभक्तौ आमौ युष्मदस्मद्भ्यांपरऔरम्भवति युवाम् ॥

आवाम् यूयंवयंजसा जसासहितयोर्युष्मदस्मदोर्यूयम्वयंभवतः यूयम् वयम् ॥ ॥ ❀ ॥ ॥ छ् ॥ ॥

तःयुष्मदस्मदोरिति पदत्रयंचानुवर्तनीयं युष्मदस्मदोरकारांतादेशेऽकारात्परस्याऽकारस्यलोपश्चस्यादित्येकोयोगः युष्मदस्मद्भ्यांपरऔकारेऽम्स्यादितिद्वितीयः औकारस्यामिकृते आम् स्यादित्यात्व यद्वा सवर्णेदीर्घः नचाम् शसोरितिलोपः अकारोच्चारणसामर्थ्यात् इतिलघुभाष्ये युवामावांतदंते परमयुवां परमावां गौणत्वेतुत्यदादेरितिपत्वंनभवति संज्ञोपसर्जनयोर्नात्वमित्युक्तत्वात् किंतर्हि आमावित्यत्रयोगविभागेनाऽ नयोरंतस्याकारेऽन्तोलोपश्च औकारस्य अमिकृते आम् स्यादित्यात्वं अतित्वां अतिमां अतियुवां अत्यावां अतियुष्मां अत्यस्माम् यूयं वयं जसा तदंतेपरम यूयम् परमवयम् गौणत्वेऽतियूयं अतिवयम् ॥ ॥ ❀ ॥ ॥ पूं ॥ ॥

त्वमावेकवचने । एकत्वेगम्ये एकस्यभावः एकत्वं तस्मिन् गम्यमाने ज्ञायमाने सति युष्मदस्मदोस्त्वमदावादेशौस्तः स्यादावित्यत्र न संबध्यते तेनेन त्वत्पुत्र इति ।
त्वत्पुत्रः तवापत्यमिति त्वादः त्वंपुत्रोयस्यसः त्वत्पुत्रः इत्यादौ विभक्त्यभावेपि त्वमदौ भवतः नचांतर्वर्तिनीं विभक्तिमाश्रित्य स्यात्राप्येतौ स्यातामिति वाच्यं
युवयोः पुत्र इति युष्मत्पुत्र इत्यादौ युवावयोरपि प्रसंगात् लुकि न तन्निमित्तमिति निषेधाच्च दांतादेशावेतौ तेन त्वादयति मादयति त्वदीयं मदीयमि
त्यादिरूपसिद्धिः सत्येवावसाने इति पाक्षिकतकारे कृते ममेममावेति अमत्वं कथं [illegible] तेनेत्यवबोध्यं [illegible]
विधयस्त्वमदौ बाधंते परत्वात्तदंते परमत्वाम् परममाम् गौणत्वे तु अतित्वामतिमाम् आम् स्यौ आ अम् इतिच्छेदः युष्मदस्मदोरेषात्वं स्यादमि सका

त्वमावेकवचने युष्मदस्मदोस्त्वमदौ भवत एकत्वे गम्यमाने आम्सौ युष्मदस्मदोरेत्वम्भवति अमि सकारे भिभि च परे
त्वाम् माम् युवाम् आवाम् त्वदादयस्ते शसीति दीर्घः शसोनोवक्तव्यः युष्मान् अस्मान् त्वमदादेशे कृते ॥ ॥ ९ ॥

रेभिभि च अम् च स च भिश्च तेषां समाहारः स्भित् तस्मिन् आगमजस्यानित्यत्वान्नतुम्भावः भौत्येकदेशद्वारा समुदायानुकरणं अत्र माधव आह रेरिति ।
नानुवर्तनीयं प्रयोजनाभावात् षष्ठी निर्दिष्टत्वादंत्यस्यात्वे सवर्णदीर्घे च त्वांमामिति रूपसिद्धेः युष्मदस्मदोरंत्यं नयोः क्विपि युष्म् अस्मि इति रूपं आभ्या
ममिशसि च युषां असां युषान् अस्मानित्यं त्यस्य मस्यात्वे सिध्यति अन्यथा नस्य अतियुष्माभ्यामित्यादावात्वं केन भवति गौणत्वे त्वदाद्यत्वाभावात्
उच्यते आमावित्यत्र योगविभागेनात्वे कृते रूपसिद्धिरिति तदा युष्मस्मोरपि योगविभागेनात्वे कृते पश्चाद्दीर्घत्वे च अमि शसि च युषाम् असां युषान् अ
स्मानिति सिद्धांत एव किं माधवोक्तेनेति शसोनोवक्तव्यः सोनः पुंस इत्यत्र सोन इति योगविभागेनायमर्थो लभ्यत इत्यर्थः ॥ ॥ ९ ॥ ॥ ५ ॥

एटाङ्क्योः अत्वेरित्यनुवर्तते अनयोः षष्ठेरत्वं स्यात् टाङ्ङिस्वटाङ्ङेरनयोः परतः इदंतत्वात् ङेः पूर्वनिपाते प्राप्तेनस्यानित्यत्वज्ञापनार्थं परनिपातः किंचपर
त्वाद्यदादेशित्वेमात्रेपि आदेरेटाङ्क्योरित्यत्र मदृशितिरेवन्याय्या कृताकृतप्रसंगित्वेन तस्य नित्यत्वात् टेरत्वे कृते अपादेशे च त्वया मयेति अ
त्रहि युष्मदस्मदोर्म्पर्यंतयोः क्विपि युष्म अस्म इति टाङि ओसपरतः युष्मा अस्मा युष्मि अस्मि युष्मोः अस्मोरिति रूपाणि ततः सिद्ध्यर्थं व्याख्यानांत
रंक्रियते अनेकारात् परोयव योर्वसि हकारे चेत्यनेन लुप्तो यकारो ज्ञातव्यः तेनायमर्थः अदंतयोरनयोरत्वं हसंतयोर्यत्वं च न भवति एटाङ्क्योरि
ति टाङ्ङि ओसो युष्मस्य मांको निर्देशः एषु परतः इति तुभ्यंमह्यं ङया तदंते परम तुभ्यं परममह्यं गौणत्वेतु अतितुभ्यं अतिमह्यम् भ्य श्भ्यम्॰

एटाङ्क्योः युष्मदस्मदोः ष्टेरत्वं भवति टाङ्क्योः त्वया मया युवाभ्याम् आवाभ्यां युष्माभिः अस्माभिः तुभ्यंमह्यं ङया ङेः सहित
यो र्युष्मदस्मदोस्तुभ्यंमह्यमेतौ भवतः तुभ्यम् मह्यम् भ्य श्भ्यम् युष्मदस्मद्भ्यां भ्यसो भ्यः श्भ्यम्भवति शकारो भकारादि
त्वव्याहत्यर्थः तेनात्वैत्वेन भवतः युष्मभ्यम् अस्मभ्यम् ङसिभ्यसोः श्तुः ङसिसाहचर्यात्पंचम्या भ्यस् गृह्यते त्वत्
मत् युवाभ्याम् आवाभ्याम् युष्मत् अस्मत् ॰ ॥ ॥ अत्र भ्यस् चतुर्थी बहुवचनं आभ्यां भ्यस् श्भ्यं स्यात् शकारेण सर्वादेशार्थः भ्यमो
गुर्वादेशत्वात् नहि किमर्थः भकारादित्ववारणार्थः सति शकारे भकारस्यादित्वाभावात् भादिनिमित्तमेत्त्वीत्वे अद्गीत्यात्वं च न आदेर्भाव।
आदित्वं भकारस्यादित्वं भकारादित्वं भकारादित्वस्य व्याहतिर्निषेधः भकारादित्वव्याहतिः भकारादित्वव्याहतिरर्थः प्रयोजनं यस्य सः ङसिभ्यसोः
श्तुः युष्मदस्मद्भ्यां परयोर्ङसिभ्यसोः श्तुरादेशः स्यात् शित्वात्सर्वादेशः उकारउच्चारणार्थः अत्र ङसि साहचर्यात्पंचम्या एव भ्यस् गृह्यते ॥ किंच॥
अत्र माघवः ङसिभ्यसः अः श्तुरिति पदच्छेदः कर्तव्यः ततश्च युष्मदस्मद्भ्यां ङसिभ्यसोः श्तुर्भवति युष्मदस्मदोरंत्यस्याकारादेशो भवति तेनत्वंतयो।

युष्मऽस्मोर्युवत् असत् अपमेवाकारेभ्यस् स्यम् सामाकमित्यत्राप्यनुवर्त्ततेतेनयुषभ्यमसभ्यं युष्माकं असाकमितिसिद्यतीतिवदति आमाविस्यत्रयोगवि
भागेनात्तेयुषदऽस्मदित्यादिमिद्यत्येवकिंतम्मयासेन॥ ॥तवममङःसा तदंते परमतव परममम गौणत्वे अतितव अतिमम सामाकं अत्रतंत्रैकशेषाऽऽ
हत्तिभिः साम्मिति हृयंबोधंसहृद्युचारितः शब्दोऽनेकार्थगमको भवतीतितंत्रं सरूपाणामित्येकशेषः द्विरुच्चारणमावृत्तिः एकस्यसुटासह आम् साम्।
द्वितीयस्यतु आमासहसाम् इत्यर्थः ततःसुट्सहितआम् केवल आम् चकं युष्मदस्मदोरंत्यस्याकारश्चभवतीत्यर्थः तेनातियुष्माकं अस्माकमि
त्यादि सिद्यतीतिलघुभाष्यकर्तुरपिमयासाव्यर्थएव। योगविभागेनात्वेहृतेसुडाम इतिसुटोपि सर्वादिकार्यत्वाद्दौणेऽप्रवृत्तेः तंत्रादिनासामित्यस्य

तवममङःसा ङःसासहितयोर्युष्मदस्मदोस्तवममौभवतः तव मम युवयोः आवयोः सुडामः सामाकम् युष्मदस्म
द्भ्यांपरस्सामाकम्भवति युष्माकम् अस्माकम् त्वयि मयि युवयोः आवयोः युष्मासु अस्मासु समस्यमाने द्व्येकत्व
वाचिनौ युष्मदस्मदौ समासार्थोऽन्यसङ्ख्यश्चेद्युवावौ त्वन्मदावपि ॥ १ ॥ ॐनमःपरमात्मने ॥ १ ॥ ॥

द्विरुच्चारणात् केवलस्याप्याम आकमिचविहितेरूपसिद्धेः ।समस्यमाने द्व्येकत्ववाचिनौ युष्मदस्मदौ सामासार्थोन्यसंख्यश्चेद्युवावौ त्वन्मदावपि १
युवावौ द्विवचनेत्वन्मदेकत्वे इतिसत्रद्वये द्विवचनैकत्वशब्दोप्रकृत्यर्थपरौनतु प्रत्ययपरावितिव्याख्यातं ।।तत्फलंजातिलिंगव्यक्तिसंख्याकारकात्मकः ॥
पंचकोनामार्थ इतिपक्षाभिप्रायेणदर्शयतिचेद्यदियुष्मच्चास्माच्चयुष्मदस्मदौशब्दरूपेसमस्येते इतिसमस्यमाने समासविषयीक्रियमाणे द्वौचएकश्चद्व्ये
कयोर्भावः द्व्येकत्वं द्व्येकत्वंवक्तृ इतिद्व्येकत्ववाचिनौस्तः ।समासस्यार्थः ।समासार्थः विग्रहः अन्यसंख्योऽन्यस्मान्यस्यपदार्थस्यसंख्यायस्मिन्सोन्यसंख्यो
युष्मदस्मदर्थगतसंख्येतरसंख्यायुक्तोभवतीत्यर्थः ।तदायुष्मदस्मदोःस्थानेयुवावौत्वन्मदावप्यादेशौभवतः द्विवचनैकत्वयोःप्रत्ययविशेषणत्वेतुनस्या

स्मिन्नस ङे ङ स्सु परतः आदेशाः सुः सदैवते त्वाहौ यूयवयौ तुभ्यम ह्यौतवममावपि २ नन्वेवंस्मिजस ङे ङ स्स्वपियुष्मदस्मदोर्द्व्यर्थत्वेयुवावौस्यातामेकार्थ
त्वेतुत्वन्मदावित्याशंकायामाह ॥ एतासु विभक्तिषु परतो युष्मदस्मदोः स्थानेते आदेशाः सदैवसुः केते आदेशाइत्यत आह त्वाहौ यूयवया वित्यादि
२ एतेपरत्वाद्वाधंतेयुवावौ विषयेस्वके त्वन्मदावपिवाधंते पूर्ववद्विषयेस्वतः ३ एतेत्वमहं यूयंवयं तुभ्यं मह्यंतवममेत्यादेशाः स्वकेविषयेस्वे।
आत्मीयस्थानेयुवावौवाधंते कस्मात्परत्वाद्विप्रतिषेधेपरंकार्यमितिन्यायात् उभयोस्तुल्यवलविरोधे सतिस्वत्राप्रसक्त्याऽत्वमादयः परेतएवभवंती।

स्मिन्नस ङे ङ स्सु परत आदेशाः सुस्सदैवते त्वाहौ यूयवयौ तुभ्यमह्यौतवममावपि २ ॥
एतेपरत्वाद्वाधन्तेयुवावौविषयेस्वके त्वन्मदावपिवाधन्ते पूर्ववद्विषयेस्वतः ३ द्व्येकसंख्य
समासार्थोवह्वर्थेयुष्मदस्मदी तयोरद्व्येकतार्थत्वाद्युवावौत्वन्मदौनच ४ ॥ ॥

त्यर्थः ॥ एतेत्वमादयः स्वतोविषयेत्वन्मदावपिवाधंते पूर्ववत् उक्तन्यायेनस्वतइत्यत्रतसप्रत्ययःसप्तम्यर्थेतस ३ द्व्येकसंख्यः समासार्थोवह्वर्थेयुष्मदस्मदी तयोर
द्व्येकतार्थत्वात् युवावौत्वन्मदौनच ४ यत्रयुष्मदस्मदीवह्वर्थेवहूनामर्थेयपयोस्तेवह्वर्थेभवतः समासार्थोविग्रहः द्वौचएकश्चद्व्येकौद्व्येकयोःसंख्याय।
स्मिन्सद्व्येकसंख्योभवति तदायुष्मदस्मदोः स्थानेयुवावौत्वन्मदावपिनस्तः कस्मात्तयोर्युष्मदस्मदोः द्वौचएकश्चद्व्येकौद्व्येकयोर्भावः द्व्येकताद्व्येक
तायाअर्थद्व्येकतार्थः द्व्येकतार्थस्यभावोद्व्येकतार्थत्वंनद्व्येकतार्थत्वमद्व्येकतार्थत्वंतस्मात् द्व्येकतार्थत्वस्याऽभावात् ४ ॥ ॥ ४ ॥ ॥

त्वांमांवातिक्रांत इतिविग्रहे अपवादो अतित्वं अत्यहंत्वांमांवातिक्रांतावितिविग्रहे उत्सर्गतः त्वन्मदादेशेकृतेगौणत्वेपियुष्मदस्मदोस्त्यदाद्यत्वंभवति आमावित्यत्रयोगविभागेनयथाव्याख्यानांतरंकृतंतस्यायंनिःकर्षोस्तिगौणत्वेप्यनयोस्त्यदाद्यत्वंभवतीत्यर्थः इत्यनेनात्वेनलोपे औविभक्तेरमिचकृतेसव र्णेदीर्घः अतित्वां अतिमां त्वांमांवातिक्रांताइतिविग्रहे अपवादो अतियूयमतिवयं एवमग्रेप्यूह्यम् १ अत्वेआम् स्माविन्यात्वेच अम्शसोरित्य लोपः अतित्वां अतिमां अतित्वां अतिमां शसि अत्वेकृते अम्शसोरित्यल्लोपः शसीतिदीर्घः शसोनइतिनत्वं अतित्वान् अतिमान्

त्वांमांवाऽतिक्रान्तइतिविग्रहे अतित्वम् अत्यहम् गौणत्वेयुष्मदस्मदोस्त्यदाद्यत्वम्भवति अतित्वाम् अतिमाम् अ तियूयम् अतिवयम् अतित्वाम् अतिमाम् त्वन्मदेकत्वे ग्रामस्मौ अतित्वाम् अतिमाम् अतित्वाम् अतिमाम्। अतित्वया अतिमया अतित्वाभ्याम् अतिमाभ्याम् अतित्वाभिः अतिमाभिः अतितुभ्यम् अतिमह्यम् अतित्वाभ्याम् अतिमाभ्याम् अतित्वभ्यम् अतिमभ्यम् अतित्वत् अतिमत् अतितव अतिमम अतित्वयोः अतिमयोः अतित्वाक म् अतिमाकम् अतित्वयि अतिमयि अतित्वासु अतिमासु॰ ॥१॥० ११२ अत्वेकृते एटाड्योरित्येत्वे ऽयादेशेच अतित्वया अतिमया अत्वेअड्डीत्यात्वेच अतित्वाभ्यां अतिमाभ्यां आमस्माविल्यात्वं अतित्वाभिः अतिमाभिः ३ अपवादो अतितुभ्यम् अतिमह्यम् अति त्वाभ्यां अतिमाभ्यां अत्वेभ्यमिच अतित्वभ्यं अतिमभ्यम् ४ अत्वेसु आदेशेच अतित्वत् अतिमत् अतित्वाभ्यां अतिमाभ्यां अतित्वत् अ तिमत् ५ अपवादो अतितव अतिमम अत्वेओसीत्येच अतित्वयोः अतिमयोः अत्वेसुउभावेपिप्रागुक्तरीत्या आकमिव अतित्वाकं अतिमाकम् ६ अत्वेकृते एटाड्योरित्येत्वे अयादेशः अतित्वयि अतिमयि अतित्वयोः अतिमयोः अत्वेआत्वेच अतित्वासु अतिमासु ७ गुणीभूतयोर्युष्म॥

स्मदोरेकार्थत्वेउदाहरणान्युक्त्वासंप्रतिद्व्यर्थबाचित्वेउदाहरंति॥ ॥युवामावांवाऽतिक्रांतः॥अतिक्रांतौ अतिक्रांतावा इतिविग्रहे अतित्वम्
त्यहम् अतियुवामत्यावाम् अतियूयमतिवयम् १ अतियुवां अत्यावां अतियुवां अत्यावां अतियुवान् अत्यावान् २ अतियुवया अत्यावया अ
तियुवाभ्यां अत्यावाभ्यां अतियुवाभिः अत्यावाभिः ३ अतितुभ्यम् अतिमह्यम् अतियुवाभ्याम् अत्यावाभ्याम् अतियुवभ्यं अत्यावभ्यं ४ अति

युवामावाम्वाऽतिक्रान्तइतिविग्रहे सिजसङेङस्सुप्राग्वत् अम्यत्रयुवावौ अतित्वम् अत्यहम् अतियुवाम् अत्यावाम्
अतियूयम् अतिवयम् अतियुवाम् अत्यावाम् अतियुवाम् अत्यावाम् अतियुवान् अत्यावान् अतियुवया अत्या
वया अतितुभ्यम् अतिमह्यम् अतियुवाभ्याम् अत्यावाभ्याम् अतियुवभ्यम् अत्यावभ्यम् अतियुवत् अत्याव
त् अतियुवाभ्याम् अत्यावाभ्याम् अतियुवत् अत्यावत् अतितव अतिमम अतियुवयोः अत्यावयोः अतियु
वाकम् अत्यावाकम् अतियुवयि अत्यावयि अतियुवासु अत्यावासु युष्मान्स्मान्वाऽतिक्रान्तइतिविग्रहे अ
तित्वम् अत्यहम् अतियुष्माम् अत्यस्माम् अतियूयम् अतिवयम् ॥ ०युवत् अत्यावत् अतियुवाभ्यां अत्यावाभ्यां अति

युवत् अत्यावत् ५ अतितव अतिमम अतियुवयोः अत्यावयोः अतियुवाकं अत्यावाकम् ६ अतियुवयि अत्यावयि अतियुवयोः अत्यावयोः
अतियुवासु अत्यावासु ७ बहूर्थयोस्तूदाहरणि युष्मानस्मान्वाऽतिक्रांत अतिक्रांतौ अतिक्रांतावेतिविग्रहे अतित्वं अत्यहं अतियुष्माम् अत्य
स्माम् अतियूयं अतिवयम् ० ॥ ० ॥ ० ॥ ० ॥ ० ॥ ० ॥

अतियुष्मां अत्यस्मां अतियुष्मां अत्यस्मां अतियुष्मान् अत्यस्मान् २ अतियुष्मया अत्यस्मया अतियुष्माभ्यां अत्यस्माभ्यां अतियुष्माभिः अ
त्यस्माभिः ३ अतितुभ्यं अतिमह्यं अतियुष्माभ्यां अत्यस्माभ्यां अतियुष्मभ्यं अत्यस्मभ्यं ४ अतियुष्मत् अत्यस्मत् अतियुष्माभ्यां अत्य
स्माभ्यां अतियुष्मत् अत्यस्मत् ५ अतितव अतिमम अतियुवयोः अत्यावयोः अतियुष्माकं अत्यस्माकं ६ अतियुष्मयि अत्यस्म
यि अतियुष्मयोः अत्यस्मयोः अतियुष्मासु अत्यस्मासु पुनर्गौणे रूपांतरं युष्मानस्मान्वा करोतीति णौ युष्मयति अस्मयति ततः क्विप् णेरिति

क्विजसडेङ्ङसुप्राग्वत् अतियुष्माम् अत्यस्माम् अतियुष्माम् अत्यस्माम् अतियुष्मान् अत्यस्मान् अतियु
ष्मया अत्यस्मया अतियुष्माभ्याम् अत्यस्माभ्याम् अतियुष्माभिः अत्यस्माभिः अतितुभ्यम् अतिमह्यम् ॥
अतियुष्मत् अत्यस्मत् अतियुष्माभ्यम् अत्यस्माभ्यम् अतियुष्मत् अत्यस्मत् अतितव अतिमम अति
युष्माकम् अत्यस्माकम् अतियुष्मयि अत्यस्मयि अतियुष्मासु अत्यस्मासु ॥ ॥ श्रीकृष्णाय० ॥ ॥

त्रिलोपे कृते युष्म अस्म इति जाते स्यादिषु युष्मस्मोपित्वमहमाद्यः आदेशा भवंति एकदेशविकृतमनन्यवदितियुक्तत्वात् त्वं अहं ओविभ।
क्यादिषु गौणत्वेपि टाङि ङसि विभक्तौ वर्ज्जं पित्वा सर्वत्रात्वे कृते आत्वे युष्मा अस्मा यूयं वयं १ युष्मां अस्मां युष्मां अस्मां युष्मान् अस्मान् २ एटा।
ङ्योर्भिस्सस्य व्याख्यानांतेयां तस्य पत्वे युष्मा अस्मा युष्माभ्यां अस्माभ्यां युष्माभिः अस्माभिः ३ तुभ्यं मह्यं युष्माभ्यां अस्माभ्यां युष्मभ्यं अस्मभ्यं ४
युष्मत् अस्मत् युष्माभ्यां अस्माभ्यां युष्मत् अस्मत् ५ तव मम अंतस्य पत्वे युष्मोः अस्मोः युष्माकं अस्माकं ६ पत्वे युष्मि अस्मि युष्मोः अ

युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयाभिस्तेमेवांनौवसनसौ षष्ठी च चतुर्थी च द्वितीया च षष्ठीचतुर्थीद्वितीयास्ताभिः अल्पस्वरत्वात् षष्ठीत्यस्य पूर्वनिपातः सहयोगे तृतीया तया साहित्यं बोध्यते तत् किं साहित्यं श्रूयमाणविभक्तिकयोरेवादेशा भवन्ति नलुप्तविभक्तिकयोरिति तेन स मासे युष्माकं पुत्र इति युष्मत् पुत्रो ब्रवीति ॥ अस्माकं पुत्र इत्यस्मत्पुत्रो ब्रवीतीत्यत्र प्रत्ययलक्षणेन प्राप्तं तयोर्युष्मदस्मदोर्वस्नसौ न त्वामा मा ते मयोरप्यवादोऽयं षष्ठीवहुवचनस्यामोऽत्र ग्रहणं न व्याख्यानात् व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणमिति भावः श्रीशस्त्वावतु मापीह दत्तात्ते मेपि शर्म सः स्वामी ते मेपि स हरिः पातु वामपि नौ विभुः १ सु

युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयाभिस्तेमेवांनौवसनसौ युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयासहितयोर्यथा संख्येनामी आदेशा भवन्ति नैकवचनेन सहते मे द्विवचनेन वां नौ वहुवचनेन वस् नसौ त्वामा मा अमा सहितयोर्युष्मदस्मदोस्त्वामा एतौ भवतः श्रीशस्त्वावतु मापीह दत्तात्ते मेऽपि शर्म सः स्वामी ते मेऽपि स हरिः पातु वामपि नौ विभुः १ सुखम्वां नौ ददात्वीशः पतिर्वामपि नौ हरिः सोऽव्याद्वो नः शिवम्वो नो दद्यात्सेव्योऽत्र वस्सनः २ एकवाक्ये युष्मदस्मदादेशा वक्तव्याः एकवाक्यात्म्वाक्यम् तेनेह न ओदनम्पच तव भविष्यति इह तु स्यादेव शालीनामोदनन्ते दास्यामि अनन्वादेशे वा धातोस्तेनववाभक्तोस्ति ॥

सुखंवां नौ ददात्वीशः पतिर्वामपि नौ हरिः सोव्याद्वो नः शिवं वो नो दद्यात्सेव्योत्र वः सनः २ उक्तानादेशान् वचनक्रमेणोदाहरति द्वितीयैकवचने यथा श्रियई शः श्रीशो हरिरिह जगति त्वा त्वां मा मामपि अवतु रक्षतात् चतुर्थ्येकवचने यथा स हरिस्ते तुभ्यं मे मह्यमपि शर्म सुखं दत्तात् दानपात्रे चतुर्थी षष्ठ्येकवचने यथा स हरिस्ते तव मे मम मापि स्वामी वर्त्तते स्वाम्यादियोगे इति षष्ठी सप्तम्यः विधानात् द्वितीयाद्विवचने यथा विभुर्विष्णुर्वां युवां नौ अपि आवाम्।

स्तु चतुर्थीद्विवचने यथा ईशः। शंभुर्वां युवाभ्यां नौ आवाभ्यां सुखं ददातु षष्ठी द्विवचने यथा हरिर्वां युवयोः नावपि आवयोरपि पातिरक्षतीति पतिः॥ द्वितीयाबहुवचने यथा सहरिर्वो युष्मान् नोऽस्मानव्यात् रक्षतु चतुर्थीबहुवचने यथा सर्वो युष्मभ्यं नोऽस्मभ्यं शिवं कल्याणं दद्यात् षष्ठीबहुवचने यथा सहरिर्वो युष्माकं नोऽस्माकमत्र लोके सेवितुमर्हः सेव्यः ऋहलोर्ण्यदिति कर्मणि ण्यत् कृत्यानां कर्तरि वेति षष्ठी। एकवाक्ये युष्मदस्मदादेशा वक्तव्याः एकवाक्ये एकाऽनयोः स्थाने उक्ता आदेशा भवंति एकमाख्यातं यत्र तदिति बहुव्रीहिः एकाख्यातं वाक्यमुच्यते ननु पश्य मृगो धावति इत्यादावेकवाक्यत्वव्यवहारोनस्यात् सत्यं एकाख्यातमित्यत्राख्यातं विशेष्यसमर्पकं विवक्षितं ततश्च पश्य मृगो धावतीत्यत्राख्यातद्वयेसत्यपि

॥ अन्वादेशे नित्यम् तस्मै तेनमः नादौ वाक्यादौ पादादौ च वर्त्तमानयो

॥ र्युष्मदस्मदोर्नेति त्वाम्पातु वेदैरशेषैस्सम्वेद्योऽस्मान्कृष्णस्सर्वदावतु

पश्येत्यस्यैव विशेष्यसमर्पकत्वान्नो क्तदोषः तथा च वार्तिककारः आख्यातं सविशेषणं वाक्यमित्याहत्वमोदनं पचत वौदनं भविष्यति अत्रते इत्यादेशो न वाक्यद्वयत्वात् एकवाक्ये यथा अहं ते तुभ्यमोदनं दास्यामि कीदृशं शालेरयं शालीनस्त एतेते मया देय आदेशा अनन्वादेशे वावक्तव्यो युष्मदस्मदोः स्थानेऽनन्वादेशे ऽर्थे एते आदेशा विकल्पेन भवंति॥ ॥अन्वादेशे नित्यं युष्मदस्मदोः स्थानेऽन्वादेशेऽर्थे एते आदेशा नित्यं स्युः। अन्वादेशेऽर्थे धातावर्थस्यानिभक्तस्य वभक्तोऽस्तीति वा अन्वादेशे तस्मै पूर्वोक्ताय ते तुभ्यं विश्वेश्वरेन मोस्तु नादौ वाक्यादौ माभूत् यथा त्वां पातु पादादावपि माभूत् यथा कृष्णोऽस्मान् सर्वं समस्मिन्काले ऽवतु पातु कीदृशः अशेषैः समस्तैर्वेदैः कृत्वा संवेद्यो ज्ञायमानः संवेत्तुं योग्यः संवेद्यः

सि॰चं॰सु॰
टी॰सु॰
६५

मेवांनौव

विशेष्यपूर्वसंवोधनेतरपूर्वसं... हित्वाऽन्यस्मात्संवोधनात्परयोर्नैते संवोधनात्परयोर्युष्मदस्मदोः स्थाने एते आदेशा न भवंति किं कृत्वा विशेष्यपूर्वं । यस्य तत् एतादृशं विशेषणात्मक... धनं त्यक्त्वा च पुनः संवोधनादितरत् पदं पूर्वं यस्य तत् एतादृशं संवोधनं त्यक्त्वा विशेष्यपूर्वात् संवोधनेतरपूर्वाच्च सं वोधनात् परयोर्युष्मदस्मदोः स्थाने एते आदेशा भवंतीत्यर्थः हे देव त्वमस्मान् पाहि रक्षेत्यर्थः हे नरसिंहावतार हे विष्णो त्वमस्मान् रक्ष पालयेत्यत्र संवोधनात्परस्यास्मानित्यस्य नसा... देशो न जातः विशेष्यपूर्वात्संवोधनात्तु सुरेव यथा हे हरे कृपास्यास्ति कृपालुस्तस्य संवोधनं हे कृपालो त्वं नोऽस्मा न्पाहि हे हरे इति विशेष्यं कृपालो इति विशेषणं संवोधनेतरपूर्वात्संवोधनात्तु यथा हे देव त्वं नोऽस्मान् सर्वस्मिन्काले रक्षेत्यत्र देवेति संवोधनस्य स

विशेष्यपूर्वं संबोधनं संबोधनेतरपूर्वं संबोधनं च हित्वाऽन्यस्मात्संवोधनात्परयोर्नैते देवास्मान् पाहि त्वहरे विष्णोऽस्मान् रक्ष सर्वदा विशेष्यपूर्वात्तु हरे कृपालो नः पाहि सर्वदा रक्ष देव नः चादिभिश्च च वा ह अह एव ए भिर्योगे नैते आवयोस्युवयोश्च शो हरिर्ममैव रक्षतु अचाक्षुषज्ञानार्थधातुभिर्योगे न च चेतसा त्वां समीक्षते भक्ता स्तव रूपं ध्यायति चाक्षुषज्ञाने तु भक्तास्त्वा पश्यंति चक्षुषा ॥ एत्वेषितत्तः प्राचीनं रक्षेत्यादि यत्रादेशः चादिभिश्च चादिग ण स्थाः पंचैव चादयो ग्राह्या न त्वधिकाः लक्ष्यानुरोधात् सहयोगे तृतीया तया साक्षात्संवंधो गृह्यते न तु परंपरासंवंधः ॥ यत्र युष्मदस्मदर्थगतान्स मुच्चयादीन् चादयो द्योतयंति तत्र चादिभिः सहार्थद्वारा युष्मदस्मदोः साक्षात्संवंधस्तत्रायं निषेध इत्यर्थः यथा आवयोर्हे योर्युवयोर्हे योश्च समुच्चये । हरिरीशः स्वामीत्यर्थः वा विकल्पे प्रसिद्धो अह पूजायां एतावधारणे परंपरासंवंधे तु सुरेव यथा हरो हरिश्च मे स्वामीत्यत्र चशब्दो हर हरिगतं समुच्चयं । नाम॰
व क्ति हरिहराभ्यां सहास्मदः संवंधो न तु समुच्चयेन किंतु परंपरासंवंधोस्ति लक्षणं तु समुच्चीयमानाद्यर्थांतरसंवंधः परंपरासंवंधः अचाक्षुषज्ञा ६५

नार्थधातुभिर्योगे चन अचाक्षुषज्ञानमर्थोयेषांते अचाक्षुषज्ञानार्था अचाक्षुषज्ञानार्थाश्चते धातवश्च अचाक्षुषज्ञानार्थधातवस्तैर्योगे नैतेआदे।
शाभवंति यथासभक्तः चेतसाचिंतसंबंधिध्यानेनत्वांसमीक्षते पश्यतीत्यर्थः परंपरासंबंधेऽपिनिषेधः यथाभक्तस्तवरूपं ध्यायति॥ ॥विद्यमा
नपूर्वात्प्रथमांतात्परयोरन्वादेशेऽप्येतेवाविद्यमानंपदंपूर्वंयस्यस विद्यमानपूर्वस्तस्मात् प्रथमांतात्परयोर्युष्मदस्मदोरन्वादेशेऽर्थेपिवादेशाभवं
ति अन्वादेशेनित्यमित्यस्यविशेषोऽन्नयानित्यत्वेप्राप्तेविकल्पार्थमिदंवचनं यथात्वंभक्तोऽहमपिभक्तस्तेनहरिस्त्वांमांत्रायतेपालयतीत्यर्थः॥अत्र
त्वेनेतिपूर्वंविद्यमानंपदं ततोहरिरितिप्रथमांतं ततःपरस्ययुष्मच्छब्दस्यत्वादेशउत्तरत्रायते इतिविद्यमानंपदं ततः स्वइतिप्रथमांतं ततःपरस्या

विद्यमानपूर्वात्प्रथमान्तात्परयोरन्वादेशेऽप्येतेवा भक्तस्त्वमप्यहन्तेनहरिस्त्वांत्रायतेसमां
त्वामेतिवा चादिर्निपातः च·वा·ह·अह·एव·एवम् नूनम् पृथक् शश्वत् युगपत् भूयस् नह
इत्तो·बिना नाना स्वस्ति अस्ति दोषा नक्तम् मृषा मिथ्या मिथस् इ॥ ॥ श्रीराम॥ ॥

स्मच्छब्दस्यवादेशोवाच्यः॥ ॥इतियुष्मदस्मन्निरूपणम्॥चादिर्निपातः॥चआदिर्यस्यसचादिः निश्चयेनपतत्यनेकेष्वर्थेषुद्योतकत्वादितिनिपातः॥
पतत्पतते।अस्माज्ज्वलादेर्णइतिणप्रत्ययः असत्ववाचिनामेवचादीनांनिपातसंज्ञा अव्ययसंज्ञाचभवति स्वरादीनांतुसत्ववाचिनामसत्ववाचिनांचा
व्ययसंज्ञैव ननिपातसंज्ञा स्वस्तिवाचयतिस्वः पश्यतिस्वः पततीत्यादौकर्मादिकारकयोगेनसत्ववाचकत्वं स्वरादीनांह्यस्त्येव एकस्वराणांनि
पातानांसंधिर्नभवतीतिनिपातसंज्ञाफलम्॥एकस्वराणांस्वरादीनांतुसंधिर्भवत्येव तेषांनिपातसंज्ञाभावात् चेतिसमुच्चयान्वाचयेतरेतरयोगस
माहारेषु वास्याद्विकल्पोपमयोरिवार्थेऽपि समुच्चये हेतिप्रसिद्धौ अहेति पूजायां एवेत्यवधारणे अनवक्लृप्तौच एवमित्युक्तपरामर्शे नूनमितिनि

सि·चं·पू·
टी·मु·
६६

श्वे वितर्के च एषमितिभिन्नार्थेशश्वदिति पौनः पुन्येनित्येसहार्थे च युगपदित्येककाले भूयसिति पुनरर्थे आधिक्ये च नहेतिप्रत्यारंभेहंतेतिहर्षे० विषादे अनुकंपायांवाक्यारंभेच विनेति [illegible] ने नानेत्यनेकविनार्थयोः स्वस्तीतिमंगले अस्तीति सत्तार्थे दोषेतिरात्रौ वृथेतिव्यर्थे मृषेति वितथे नक्तमितिरात्रौ मिथ्येति वितथे मिथ्यसिति रहस्सहार्थयोः॥ ॥अथेति मंगलाऽनंतराऽऽरंभप्रश्नकात्स्न्याऽधिकारप्रतिज्ञासमुच्चयेषु अथो इत्य प्यवत् अहो इतिविकल्पे चेदर्थे [illegible] ह्यसिति अतीतेह्नि श्वसिति अनागतेदिने उच्चैसितिमहति नीचैसिति अल्पे थे शनैसिति क्रियामांद्ये ऋधगि तिसत्ये वियोगशीघ्रसामीप्य[illegible]घवेष्वित्यन्ये ऋतेवर्जने आरादिति दूरसमीपयोः दिवेति दिवसे रात्राविति निशि सायमितिनिशामुखे चिरमिति

अथ·अहो·अहोह्यस्·श्वस्·उच्चैस्·नीचैस्·शनैस्·ऋधक्·ऋते·आरात्·दिवा·रात्रौ।सायम्·चिरम्·मनाक्·
ईषत्·जोषम्·तूष्णीम्·बहिस्·अवस्·समया·निकषा·अद्धा·वत·सामि·सना·सनत्·सनात्·तिरस्·अन्तरा·अन्तरे
मुधा
ण·सहसा·अलम्·वषट्·क्षमा·विहायसा·पुरा·मिथो·प्रायस्·मुहुस्·साहम्·साकम्·समम्·नमस्·हिरुक्·धिक्·

बहुकाले मनाक् ईषत् इमावल्पे जोषमिति सुखेमौनेच तूष्णीमितिमौने बहिस् अवस् इमौबाह्ये समयेति समीपमध्येच निकषेति समीपे अद्धेति॥ स्फुटावधारणयोः तद्धाऽतिशययोरित्यन्ये इहेति प्राकाश्येवत् वतुल्ये इत्यादिना विहितोयोवत्प्रत्ययः सइहगृह्यते प्रत्ययमात्रस्य संज्ञाप्रयोजनाऽभावा त् प्रत्ययांतंगृहीतव्यं यथा ब्राह्मणवत् क्षत्रियवत् उपधेतिभेदे सामीत्यर्द्धे जुगुप्सितयोः सना सनत् सनात् एतेत्रयो नित्ये तिरसिति अंतर्द्धौ तिर्य राम०
गर्थेपरिभवेच अंतरेति मध्येविनार्थेच अंतरेणेतिवर्जने सहसेति आकस्मिकाविमर्शयोः अलमिति भूषणपर्याप्तिशक्तिवारणनिषेधेषु वषडि ६६
ति हविर्दाने स्वमेतिक्षांतौ विहायसेति विपदर्थेमुधेतिव्यर्थेपुरेति अविरतेचिरातीतेभविष्यदासन्नेच मिथोइतिरहस्सहार्थयोः प्रायसिति

वाहुल्ये मुहुरिति पुनरर्थे साकंसार्द्धमेतौसहार्थे नमस्सितिननतौ हिरुगितिवर्ज्जने धिगितिनिंदाभर्त्सनयोः॥ ॥ मा माङ्·एतौनिषेधाशंकयोः अमिति शीघ्रेऽल्पेच आमिति अंगीकारे नेदिति शंकायांप्रतिषेधविचारसमुच्चयेषु च चेदितियद्यर्थे क्वचिदितीष्टप्रश्ने चणितिचेदर्थे समुच्चयादौत्वननुवं धकः उञ्जितिसंतर्कसंबोधनपूरणेषु यदीतिपक्षांतरे सत्यमितिप्रश्नप्रतिषेधसत्येषु जात्विति कदाचिदर्थेक मितिवारि मूर्द्ध निंदासुखेषु शमिति सुखे ज्योगिति कालभूयस्त्वप्रश्नेशीघ्रार्थेसंप्रत्यर्थेच रहसीत्येकांते अभीक्ष्णमितिपौनः पुन्ये हाइतिविस्मयविषादशोकजुगुप्सार्त्तिषु आहूति क्षणप्रश्नयोः आदितिशंकायां तुविशेषवितर्कयोः हैवितर्के रैदाने अनादरे चरैं करोति ददातीत्यर्थः रैत्वंकिंवदसीतिकिमितिपृच्छाजुगुप्सेष

मा·माङ्·स्वर·अन्तर·प्रातर·पुनर·सनुतर·यावत·तावत·स्वाहा·
स्वधा·तथाहि·खलु·किल·सुष्टु·दुष्टु·आदह·०॥ ॥ ॥

दर्शविशेषेषु यदितिपक्षांतरे तदितिहेतौ इतीतिहेतुप्रकारप्रकर्षेवमर्थेऽव्ययस्यास्वरूपविवक्षानियमसमाप्तिप्रकृतवक्ष्यमाणपरामर्शमतेषु ॥ एवेत्युपमायां हंहोइतिविचारे स्वरिति स्वर्गेपरलोकेच अंतरितिमध्ये प्रातरितिप्रत्यूषे ॥पुनरित्यप्रथमेविशेषेच सनुतरित्यंतर्द्धाने स्वराद्याः पंचस्वरांताः यावत्तावदेतौसाकल्यावधिमानावधारणेषु साकल्येयावत्कार्य्यंतावत्कृतं अवधौ यावद्गृहंतावद्गंतावत्तिष्ठामि माने यावद्दत्तं तावद्भुक्तं अवधारणे यावदमत्रं तावद्ब्राह्मणानामंत्रयस्वेति स्वाहेति देवताभ्योदाने तथाहीति निदर्शने खल्विति निषेधवाक्यालंकारनिश्चयेषु ·किलेति ० = = वार्त्तायामलीकेच नुवितर्के ननु इतिप्रश्नावधारणानुज्ञामंत्रेषु वाक्यारंभादावपि सुष्टुप्रशंसायां दुष्टुनिकृष्टार्थे आदहेतुप्रक्रमहिंसाकुत्सनेष्व

उपसर्गप्रतिरूपकोयथा अवदत्तमिति दोदत्तीति दथादेशः इहश्चवस्मानुपसर्गत्वात्स्वगतोवेति नकारेणनभवति स्वरप्रतिरूपकोयथा अआइत्यादि
विभक्तिप्रतिरूपकोयथा अहंयुः अहमिति सिवंतप्रतिरूपकमहंकारे वर्त्तते ऊर्णाहंशुभंभ्योयुस्तिसुः यदास्मच्छब्दान्नित्यप्रत्ययः
स्मात्प्रत्ययः क्रियेतनतर्हिसमासप्रत्ययपाठितिलुकि सति अस्मद्युइतिस्थिते मदीय इत्यत्रइवमदादेशे मद्युरिति स्यादितिभावः हेतौविधि·
निमित्ते स्वयमित्यात्मनेत्यर्थे इतेतिविकल्पेन त्रितिनिषेधे षदर्थविस्मयेषु नदन्यतर्हिरुद्र तदभावेषुच स्वधेति पितृभ्योदाने सोत्पत्ती
तेपादपूरणेच। अस्मीत्यहमित्यर्थे वैपादपूरणेविशेषेपि शंवदित्यतः करणे आभिमुख्येच नोनिषेधे दिष्ट्याइत्यानंदे सद्धजनदर्शनप्राप्तिलो।

उपसर्गास्वरविभक्तिप्रतिरूपकाश्च॥ अवदत्तम॥ अहंयुः हेतौ· अ· आ· इ· ई· उ· ऊ· ए· ऐ· ओ· औ· पशु· सुकम· ॲ
यथा· कथाच· पाट· प्याट· अङ्ग· हे· है· भोः। अये· द्य· व· विषु रे अरे एकपदे द्राक् मंजु मंक्षु युत आतः श्रौषट् वौषट् इं हि

ग्येषितस्ये अइतिसंबोधनेः धिक्सेपनिषेधेच आइतिवाक्य स्मरणयोः इइतिसंबोधनजुगुप्साविस्मयेषु ईभत्स्ये उऊदुःखवितर्कयोः ऋ ऋ ऌ ॡ
गानसमूहे एसंबोधने ऐआश्चर्ये ओसंबोधने औअंगीकारे पशुसम्यगर्थे सुक शैघ्र्ये यथाकथाचेत्यनादरे पाट प्याट अंग हे है भोः अयिएतेस
त्तसंबोधके द्येति हिंसाप्रातिलोम्यपादपूरणेषु विषुइतिनानार्थे रे अरे एतौनीचामंत्रणे एकपदे इत्यकस्मादित्यर्थे द्राक् मंक्षु एतौ शैघ्र्ये युत०
इतिकुत्सायां आतः इतीतोपीत्यर्थे श्रौषट् वौषट् एतौहविर्दाने अन्येपिसंति तथाहि कामंस्वाच्छंद्ये प्रकाममित्यतिशय सांप्रतमिति॥
न्याय्ये परमिति किंत्वर्थे साक्षादिति प्रत्यक्षेसाचीतितीर्यगर्थे संवदितिवर्षे अवश्यमितिनिश्चये उषेतिरात्रौ ओमिति अंगीकारे ब्रह्मणिच भूरि
तिपृथिव्यां भुवइत्यंतरिक्षे कुकुत्सितेषदर्थयोः अंजसेतितत्त्वशीघ्रार्थयोः मिथुइतिद्वाविपर्यर्थे अस्तमितिविनाशे स्थाने इतियुक्ते वरमिति॥

देषदुत्कर्षे सुदीति शुक्लपक्षे वदीति कृष्णपक्षे तुमिति तुंकारे आहेति उवाचेत्यर्थे आसेति बभूवेत्यर्थे आर्येति प्रतिबंधे असीनित्वमित्यर्थे वाक्यालं
कारयोः ब्रूहीति प्रेषानुज्ञा वमरेष वामिति युवामित्यर्थे चटु चाटु एतौ प्रियवाक्ये एवमन्येप्यूह्याः ॥ ॥ तत्रादिर्विभक्त्यर्थे आदिशब्दः ॥
प्रकारवचने तेगणाभावात् विभक्तिनामर्थोऽभिधेयापादानादि तस्मिन्नर्थे तत्रादिर्निपात्यते तत्र आदिर्यस्य स तत्रादिः शब्दसमूह इत्यर्थः त
स्मिन्निति तत्र एतस्मिन्नित्यत्र यस्मिन्निति यत्र कस्मिन्निति कुत्र क्व येन प्रकारेण यथा सर्वेण प्रकारेणेति सर्वथा केन प्रकारेणेति कथम् अ
नेन प्रकारेण एतेन प्रकारेण वेतीत्थं तस्मात्तस्या वेति ततः यस्मात् यस्या वेति यतः कस्मात् कस्या वेति कुतः सर्वस्मात् सर्वस्या वेति सर्वतः बहोरि

तत्रादिर्विभक्त्यर्थे निपात्यते। तस्मिन्निति तत्र। अस्मिन्निति अत्र। यस्मिन्निति यत्र कस्मिन्निति कुत्र। क्व। कुह तेन प्रकारेण त
था। सर्वथा। कथम्। इत्थम्। अस्मादिति इतः। एतस्मादित्येततः। ततः। यतः। सर्वतः। कुतः। बहुतः। सार्वविभक्तिकस्तसिल्य
के। आदितः मध्यतः। अन्ततः। पूर्वस्मिन्निति पुरः। पुरस्तात्। अधः। अधस्तात्। उपरि। उपरिष्टात् परस्मिन्निति परेण दक्षिणेन द
क्षिणा। दक्षिणतः। उत्तरतः। दक्षिणस्यां दिशि दूरे दक्षिणाहि। राजाधीनं राजसात्। सर्वं भस्म भस्मसात्। उरी। ऊरी। उररी।
॥ विस्तार एङ्गीकारयोः ॥
ति बहुतः। पूर्वस्मिन् देशे पूर्वस्माद्देशात्पूर्वो वादेशः पुरः पुरस्तात् अधः अधस्तात् ऊर्द्ध्वे ऊर्द्ध्वात् ऊर्द्ध्वो वेति ॥
उपरि उपरिष्टात् दक्षिणस्मिन् दक्षिणो वेति दक्षिणेन दक्षिणस्यां दिशि दूरे इति दक्षिणा दक्षिणाहि उत्तरस्मादुत्तरस्या वेति उत्तरतः उत्तरस्यां दिशि
दूरे इति उत्तराहि उत्तरा स भवानिति ततो भवान् तत्र भवान् तं भवंतमिति ततो भवंतं तत्र भवंतं तेन भवतेति ततो भवता तत्र भवता तस्मै भवते इति तत्तो
भवते तत्र भवते तस्माद्भवत इति ततो भवतः तत्र भवतः तस्य भवतः इति ततो भवतः तत्र भवतः तस्मिन् भवतीति ततो भवति तत्र भवति ॥ ॥ ❀ ॥

सद्य आदिः काले अवाप्याद मकारेवर्तते पूर्वदेशकालादिविशिष्टेविभक्त्यर्थोगृहीतः इह तु कालविशिष्ट एवविभक्त्यर्थोगृह्यते समानेऽह्नीतिम-
मानस्यसादेशः द्यस प्रत्ययश्चनत्कालेसद्यः अस्मिन्नहनीति इदमो अशादेशोद्यः प्रत्ययश्चसांप्रतिदिनेऽद्यः अधुनाइदानीमेतौ वर्तमानक्षणार्थे यस्मि
न् कालेयदाकस्मिन् कालेकदा सर्वस्मिन्कालेसर्वदा एकस्मिन्काले एकदा अन्यस्मिन् काले अन्यदा सपदि सांप्रतं संप्रति एते त्रयो वर्तमानक्ष

॥ सद्यादिः काले समानेऽह्निसद्यः अद्य अधुना इदानीम् तस्मिन्काले।
तदा यदा कदा सदा सर्वदा एकदा अन्यदा सपदि साम्प्रतम् झटिति।
तूर्णम् आशु शीघ्रम् पूर्वेद्युः परेद्युः परेद्यवि ऐषमः परुत् परारि अन्येद्युः
अन्यतरेद्युः उभयद्युः तर्हि यर्हि कर्हि एतर्हि ॥ ॥ ❁ ॥ ॥

णार्थे झटिति तूर्णं आशु शीघ्रमेते शैघ्र्ये पूर्वस्मिन्नहनीति पूर्वेद्युः परस्मिन्नहनीति परेद्यवि अस्मिन् वर्षेइति ऐषमः पूर्वस्मिन् वर्षे परुत्॰
पूर्वतरे वर्षेपरारि अन्यस्मिन्नहनीति अन्येद्युः अन्यतरस्मिन्नहनीति अन्यतरेद्युः उभयस्मिन्नहनीति उभयेद्युः तस्मिन् काले तर्हि कस्मिन्का
ले कर्हि यस्मिन् काले यर्हि एतस्मिन्काले एतर्हि ॥ ॥ ❁ ॥ ॥ ॐनमोभगवतेवासुदेवाय ॥ ॥ ❁ ॥ ॥ ❁ ॥ ॥

प्रादिरुपसर्गः प्रआदिर्यस्यसप्रादिः तद्गुणसंविज्ञानोऽयंबहुव्रीहिः प्रकर्षइतिलिंगात् उपसमीपेसृज्यते उच्चार्यते क्रियावाचकस्यशब्दस्येत्युपसर्गः
कर्मणि घञ् अन्वर्थसंज्ञाबलात् क्रियासंबद्धः इतिलभ्यते यदुक्तं यत् क्रियायुक्ताप्रादय स्तंप्रत्येवोपसर्गसंज्ञेति उपसर्गाहि अर्थविशेषस्यद्योत
कानतुवाचकाः प्रादिकर्मणिदीर्घेशभ्रशसंभवतृप्तिषु वियोगसुद्धिशक्तीच्छाशांतिपूजाग्रदर्शने १ आदिकर्मणिप्रारंभकर्मणि यथाप्रयातः
दीर्घेयथा प्रबलामूषिकाः ईशे यथा प्रभुः भृशार्थेयथा प्रवदंति संभवेयथाहिमवतोगंगाप्रभवति तृप्तौयथा प्रभुक्तमन्नं वियोगेयथा प्रोषितः
सुद्धौयथा प्रसन्नमुदकं शक्तौयथा प्रशक्तः इच्छायांयथा प्रार्थयतेकन्यां शांतौयथा प्रशांतोग्निः पूजायांयथा प्रांजलिःस्थितः अग्रेयथा प्रवा

प्रादिरुपसर्गाः॥ प्र·परा·अप·सम्·अनु·अव·निस्·निर्·दुस्·दुर्·अभि·वि·अधि·अति·सु·उद्·नि·प्रति·
अपि·परि·उप·आङ्·प्रत·अन्तर्·आविर्·प्राग्धातोः॥ उपसर्गाधातोः प्राक्प्रयोक्तव्याः॥ ॥ ॥ ॥

सं दर्शनेयथा प्रलोकयति १ वधेगतौदर्शनेचविक्रमेभिमुखेभृशे अधीनमोक्षणप्रातिलोम्यकेषुपराम्मतः २ वधे यथापराहतः गतौयथा।
परागतः। दर्शनेयथा। पराहष्टः। विक्रमेयथा पराक्रांतः अभिमुखेयथा पराहृतः भृषेयथा पराजितः अधीने यथा पराधीनः मोक्षणेयथा परा
हतस्यस्तु ड्वयर्थः प्रातिलोम्ये यथा पराङ्मुखः २ अपोवियोगे निकृतौ विपरीते निदर्शने आनंदेवर्ज्जने चोरे चारणे समुदाहृतः ३ वियोगेय
था अपयाति निकृतो यथा अपकृतवान् विपरीतेयथा· अपशब्दः निदर्शने यथा अपदिशति आनंदेयथा अपहसति वर्ज्जनेयथा अपवना
द्दृष्टेदेवः चौर्येयथा अपहरति चारणेयथा अपसरति ३ संयोगैक्यप्रभवसत्यप्रत्यक्षसंसिद्धिषु भूषा श्लेषस्वीकरणक्रोधाभिमुखबाधिसं ४

संयोगेयथा संगतः पुत्रेणैक्येयथा संवदंति मुखाः प्रभवेयथा काष्ठाग्निः संभवति सत्येयथा गां संजानाति प्रसत्त्वेयथा संपद्यते सिद्धौयथा संसिद्धिः
भूषायांयथा संस्कृता कन्या आश्लेषेयथा संधत्ते स्वीकारेयथा संगृह्णाति क्रोधेयथा संक्रुद्धः अभिमुखेयथा संयाति ४ वेदाधिनिष्ठानसामीप्य
पश्चाद्भावानुबंधने साम्याभिमुख्ये हीने तु विसर्गे लक्षणे त्वनुः ५ वेदेयथा अनुवाचमधीते अधिष्ठानेयथा अनुष्ठानं देशः सामीप्येयथा ऽनुमेघं
वर्षति पश्चाद्यथा अनुरथं भावानुबंधनेयथा अनुशयः साम्येयथा अनुकृतिः अभिमुखेयथा ऽनुवत्सो मातरं धावति हीनेयथान्वर्जुनं योद्धारः
विसर्गेयथा ऽनुज्ञातः लक्षणेयथा अनुवनमस्तांगतिः ५ ज्ञानावलंबशुद्धीषदर्थे व्याप्तिपराभवे अवो ज्ञेयो वियोगे च लोकयोगानुसारतः।
६ ज्ञानेयथा ऽवगतो ऽर्थः अवलंबेयथा अवलंब्य पृष्टिं गच्छति शुद्धौयथा अवदातः ईषदर्थेयथा अवलंब्यते व्याप्तौयथा अवकीर्णम् पराभवे
यथा ऽवघ्नति वियोगेयथा अवपातः ६ निर्वियोगात्ययादेशातिक्रमेलाभनिश्चिते दुरीषदर्थे कृच्छ्रेर्थे कृशासंपत्तिसंकटे ७ वियोगेयथा ॥
निःसंगो ब्रवीति अत्ययेयथा निर्मेघं आदेशेयथा निर्दिष्टः अतिक्रमेयथा निःक्रांतः लाभेयथा निर्हिष्टः निश्चितेयथा निश्चितं दुर् ईषद
र्थेयथा दुर्नीतिः कृच्छ्रार्थेयथा दुर्जीवः कृशेयथा दुर्बलः असंपत्तौयथा दुर्गतः संकटेयथा दुर्दिनं ७ नानावियोगातिशये भृशमोहेशवाग्व
धे पैशुन्यास्मरणभूषेषदर्थानाभिमुख्यके ८ अनवस्थामुखशोष्यदर्शने विरुद्धाहतः आङिच्छाभयवाक्येषदर्थाश्लेषादिकर्मणि ९ ना
नावियोगेयथा वियुक्तः अतिशयेयथा विकीर्णः भृशेयथा वितटा नद्यो महत्य इत्यर्थः मोहेयथा विमनस्कः ईशेयथा विभुः वाग्वधेयथा विव
दंते पैशुन्येयथा विगायति अस्मरणेयथा विस्मृतः भूषायांयथा विभूषितः ईषदर्थेयथा विलेपितः अनाभिमुख्येयथा विमुखः ८ ॥:

अनवस्थायांयथा विश्रांतः मुख्येयथा विशिष्टः शौर्य्येयथा विक्रांतः दर्शनेयथा विलोकयति आङ्·इच्छायांयथा आकांक्षति भयेयथा आविभेति·
वाक्येयथा आजानाति ईषदर्थेयथा आताम्रनखः आश्लेषेयथा आलिंगति आदिकर्मणियथा आरभते ८ बंधनेऽभिविधौ शाब्यहृच्छ्रसामीप्य
संश्रये अभिमंत्रनिरत्याशादानानुभवविस्मये १० प्रतिष्ठादेशमर्य्यादा स्पर्द्धामुखोर्हकर्मणि निरस्यःधस्तंभःशादे शनिसकौशलबंधने ११ ॥
बंधनेयथा कवचमाबध्नंति अभिविधौयथा आकुमारंयशः शाठ्येयथा आचरतिकपटेन कृच्छ्रेयथा आहतः सामीप्येयथा आसन्नावयं संश्रये·
यथा॥आवसथः अभिमंत्रेयथा आमंत्रणं निवृत्तौयथा आधावति आशायांयथा आशास्ते आदानेयथा आदत्ते अनुभवेयथा आशीतं विस्मयेयथा·
आएवंकिलनत १० प्रतिष्ठायांयथा आस्पदं आदेशेयथा आदिष्टः मर्यादायांयथा आमुक्तेर्दुःखस्पर्द्धायांयथा आहूयते मल्लंमल्लः मुखेयथा आ
गच्छ...कर्मणियथा आरोहतिपर्वतं निराशेयथा निकरणतिमणीनां अधोयथा निपतति अभ्रंशेयथा निगृहीतः आदेशेयथा निर्दिष्टं निरोयथा ॥
निविशते कौशलेयथा निपुणः बंधनेयथा निबद्धः ११ अंतर्भावेसमीपे निर्दर्शनोपरमाश्रये अधिरध्ययनेश्वर्यपंचशिल्पस्मरणाधिके १२ अंतर्भावेयथा
निपीतमुदकं सिकताभिः समीपेयथा निकटः दर्शनेयथा निदर्शनं उपरमेयथा निवृत्तः पापात् आश्रयेयथा निलयः अधिअध्ययने यथा उपाध्या
यादधीते ऐश्वर्येयथा अधिपतिः शिल्पेयथाऽधीनः स्मरणेयथा मातुरध्येति अधिकेयथा ऽधिकृतम १२ अपिःसंभवगर्हाशीर्मतिभूषासमुच्चये·
... संभवेयथापि प्रयोजनमस्तिगर्हायांयथाऽपिपापिनः आशिषियथा भद्रमपि मतौयथा मरणमपि भू
विक्रमातिक्रमाऽबुद्ध भृशार्थातिशये ... १३ संभवेयथापि प्रयोजनमस्तिगर्हायांयथाऽपिपापिनः आशिषियथा भद्रमपि मतौयथा ... अतिक्रमेयथा अतिक्रामति अबुद्धेयथा ऽतिगहनं भृशार्थेयथा·
...यांयथापि नद्यतिहारं समुच्चयेयथा नदीपतिक्रामति अतिविक्रमेयथाऽतिरथः

अतितत्रं अतिशयेयथा अतिमनुते १३ प्रसंसानुमते पूजाम्ऽशङ्कृत्रा सुभेषुसुः उत्मावल्पवियोगोर्द्ध कर्मलाभप्रकाशने १४ प्रशंसायांयथासुरूपः।
अनुमते यथासुकृतं पूजायांयथासुसाधुः भृशेयथा सुनतः कृच्छ्रेयथासुदुष्करं सुभेयथासुगंधः उत्मावल्पेयथा उद्दलः वियोगेयथा उद्गच्छति ०॥
ऊर्द्धकर्म्मणियथा उत्तिष्ठति शापनालाभेयथाउत्पन्नं प्रकाशनेयथा उच्चरति १४ आश्चर्येमोक्षणेभावे बलप्रधान्यशक्तिषु ऽभिपूजाऽशार्थेच्छा
व्याधिसाम्याभिमुख्यके १५ आश्चर्येयथा उत्सुकः मोक्षणेयथा उद्गतोश्वः अभावेयथा उत्पथः बलेयथाउत्कटः प्राधान्येयथा उद्दिष्टः शक्तौयथा उत्सहः
अभिपूजायांयथा अभिनंदतेदेवं ऽशेयथाभियुक्तः इच्छायांयथाऽभिलिप्सते व्याधौयथा अभिस्यंदोव्याधिः साम्येयथाअभिजातः आभिमुख्यके।
यथाभिमुखं १५ सारूप्यवचनाहारस्वाध्यायेषुनिरूपितः सादृश्यादानहिंसांगी। कृतौप्रतिनिधौक्वचित् १६ सारूप्येयथा अभिरूपः वचनेयथा
ऽभिधानं आहारेयथाऽभ्यवहरति स्वाध्यायेयथा अभ्यस्यति प्रतिसादृश्येयथा देवदत्तंप्रति आदानेयथाप्रतिगृह्णाति हिंसायांयथा प्रतिहंति॥
अंगीकृतौयथा प्रतिज्ञानं प्रतिनिधौयथा अभिमन्युरर्जुनतः प्रति १६ व्याध्याभिमुख्ययोर्व्याप्तौ वारणेप्रतिरुच्यते परिः समंततोभावः व्याप्तिदोष
यथासुच १७ व्याधौयथाप्रतिश्यायः अभिमुखेयथाप्रतिसूर्य्यंगच्छति व्याप्तौयथाप्रतिकीर्णं पांसुभिः वारणेयथाप्रतिषिद्धः परिसमंततोभावेयथा
परिभ्रमति व्याप्तौयथापरिगतोग्निर्मार्गम् दोषकथासुयथापरिवादः १७ भूषाश्लेषेपूजनेच वर्ज्जनेवसनेसुभे उपःसामीप्यसामर्थ्य व्याप्त्यावधिकृ संम
तोम्रजौ १८ भूषायांयथापरिकरोति कन्यां आश्लेषेयथापरिषजते पूजनेयथापरिचरतिगुरुम् वर्ज्जनेयथा परित्रिगर्त्तेभ्योवृष्टोदेवः वसनेयथापरिधत्ते
वासः अशुभेयथापरिदेवनं उपसामीप्येयथा उपकुंभम् सामर्थ्येयथाउपकरोतिमित्रेभ्यः व्याप्तौयथाउपकीर्णः पांसुभिः आचार्यकृतौयथा उपदिश्यति;

त्रिभ्यः मनौषयाऽउपरतः १८ ॥दोषदानक्रियावीप्सारंभाध्यापनपूजने कृष्णाचार्यैः कृतास्तोकाउपसंगार्थसंग्रहे १९ दोषेयथाऽउपघातः दानेयथा उपह
त्यर्थं देवदत्ताय क्रियायांयथा उपचारः वीप्सायांयथा देवंदेवमुपचरति आरंभेयथा उपक्रमते भोक्तुम् अध्ययनेयथा उपाध्यायाद् धीते पूजनेयथा उ
पचितः पितापुत्रेण १९ कुः निश्र निश्चयादौ दुस दुःखादौ श्रत श्रद्धादौ अंतरमध्यादौ आविर्प्राकट्यादौ प्राग्धातोः वेदादौ विपरीतप्रयोगदर्शा
नात् व्याकरणेपिलोकेऽपिविपरीतप्रयोगोमाभूदितिनियमार्थमिदम् ॥ ॥ः॰ः॥ ॥तदव्ययं॥ प्रादिचादित्तचादित्त्सिद्ध आदिपरामर्शार्थं तद्ग्रहणम्

॥तदव्ययम्॥चादि अव्ययसंज्ञम्भवति।।नतुशब्दनिर्दे
शे क्त्वाद्यन्तच्चक्त्वाक्यप्॥ तम्· णम्· धा· च्वि· शस्·
वत्· कृत्वस्· सु· आम्· इत्याद्यन्तमव्ययसंज्ञम्भवति·

अत्रनाम्न इत्यनुवृत्तप्रथमयाच्चिपरिणम्यविशेष्यमभ्युपेयम् चादिस्वरादीनितुविशेषणानिविशेषणेहितदन्तविधिस्तेनपरमोच्चैः परमस्वरित्यादावव्यय
संज्ञाभवत्येव उच्चैरतिक्रांतोऽत्युच्चैः अत्युच्चैसौ अतिस्वः अतिस्वरौ अतिस्वर इत्यादिगौणेतु नाव्ययसंज्ञामुख्याऽमुख्ययोरितिन्यायात् त्क्वाद्यंतंच पूर्वकालेक्त्वे
तिक्त्वासमासेक्त्वपितिक्यप् तुम् तदर्थायाम्भविष्यतीतितुम् पौनः पुन्येणम् पदंहिस्यैतिणम् संख्यायाः प्रकारेधेतिधा वद्व्यूऽत्यायीं त्कारकाच्छ्वसे इतिशस्
अभूततद्भावेकृभ्वस्तियोगेनाम्नश्च्विरितिच्विः वतुल्येइतिवत् क्रियाया आवृत्तौकृत्वसितिकृत्वस् द्वित्रिचतुर्भ्यः सुरितिसुः किमोऽव्ययादाख्यातात्त्वतर
॥ तमयोराम वक्तव्यः अद्रव्यप्रकर्षेइत्याम् ॥

अव्ययादिभ्यो विभक्तेर्लुक् ॥ अव्ययादिभ्यः परस्या विभक्तेर्लुक् स्यात् विभजनं विभक्तिर्विभागः यद्वा विभज्यते बोध्यते कर्तृकर्माद्यर्थोऽनयेति विभक्तिः स्यादिस्त्या द्योरेवेति योगरूढिः सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् १ आथर्वणप्रणव विद्यागत श्रुतिरियं यत् शब्दस्व पं न व्येति न व्ययं प्राप्नोति तदव्ययं त्वया ज्ञेयं कीदृशं तत् त्रिषु लिंगेषु सदृशमेकप्रकारं पुनः कीदृशं सर्वासु विभक्तिषु सदृशं च पुनः कीदृशं सर्वेषु वचनेषु सदृशं १ वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः आपं चैव हसांतानां यथा वाचा निशा दिशा १ भागुरिराचार्योऽवाप्योरुपसर्गयोरल्लोपं वष्टि

॥ अव्ययादिभ्यो विभक्तेर्लुक् ॥ सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः आपं चैव हसान्तानां यथा वाचा निशा दिशा वगाहः पिधानम् ॥ इत्यव्ययानि ॥ आवतः स्त्रियाम् ॥ अकारान्तान्नाम्नः स्त्रियां वर्त्तमानादाप् प्रत्ययो भवति सर्वा माया ०२ ॥

वाञ्छतीत्यर्थः च पुनः हसांतानां शब्दानामापं वष्टि । अल्लोपे यथा वगाहः ॥ अवगाहः ॥ पिधानं ॥ अपिधानं अपि नासा चर्याद्यादिरेवाकारे लुप्यते नात्र इतिभावः ॥ ॥ इत्यव्ययानि ॥ ॥ आवतः स्त्रियाम् ॥ अत इति तपरग्रहणं तेनाधिकृतस्य नाम्नो विशेषणात्तदंतविधिः स्त्रियामिति प्रकृत्यर्थ विशेषणं स्त्रियां वर्तमानाददंतान्नाम्न आप् स्यात् पित्त्वं स्वरार्थं स्यादिकं लिंगत्रयं तु पारिभाषिकमेव लिंगानुशासनादिभ्यो निर्णेयं मायाशब्दता ऽविद्या वा० ॥ ॥ अजादेश्च अजशब्द आदिर्यस्येति बहुव्रीहिः अजादेर्गणादाप् स्यात् तस्य स्त्रीत्वे द्योत्ये अजा एडका अश्वा चटका मूषिका

शूद्रा अमूला संफला भस्त्रफला अजिनफला शणफला प्रत्यक्फला पिंडफला सत्पुष्पा प्राक्पुष्पा कांडपुष्पा प्रांतपुष्पा एकपुष्पा क्रुंचा। उष्णिहा देवविशा कुल्यादिषु जातेरयोपधादिती प्राप्तः वाला वत्सा होढा मन्दा विलाते त्यादिषु अनंत्यवयोवाचिन इतीप्प्राप्तः ज्येष्ठा कनिष्ठा मध्यमा कोकिले त्यादिषु पुंयोगे चेतीप्प्राप्तः त्रिफला त्र्यनीकेत्यादौ समाहारे तई विती प्राप्तः सईवजादेरित्यनेन वाध्यते अजादेः स्त्रीत्वाऽभावात पंचानामजानां समाहार इति पंचाजी अत्रापि न अत्र हि समासार्थसमाहारनिष्ठं स्त्रीत्वं नत्वजादिनिष्ठं चटकेत्यत्र काप्यत।

अजादेश्च एडका अजा अश्वा चटका मूषिका वाला वत्साहोडा मन्दा विलाता सम्फला भस्त्रफला अजिनफला शणफला पिण्डफला सत्पुष्पा प्राक्पुष्पा प्रत्यक्पुष्पा काण्डपुष्पा प्रान्तपुष्पा एकपुष्पा शूद्रा क्रुञ्चा उष्णिहा देवविशा ज्येष्ठा कनिष्ठा मध्यमेति० ॥

इ तीकारेण क्षिपकादीनांनेति निषेधात सुपेदीर्घश्चेति किकृप्रत्ययेइकारेमध्यो मूषिकशब्दः होढेति भिन्नस्त्रीमंदेत्यप्रौढा स्त्री विलातेति नवयौवनास्त्री संफलाता एकपुष्पाता औषधिविशेषाः भस्त्रेव फलानि यस्याइति विग्रहः कुकुल्यादिषु पाठात पुंवद्भावः शूद्रेति जातावेवाप महत्पूर्वात शूद्रशब्दात्तु ईवेवमहा शूद्री आभीरीतु महाशूद्री जातिपुंयोगयोः समेत्यमरः॥ पुंयोगेत्वीवेव शूद्री विश्या शूद्रोस्तु राजन्यान माहिष्यो०॥ तोस्मृता वित्यमरः॥ क्रुंचेत्यादित्रयो मीह संताडइत्येके भाष्येतु कुंचानालभेतउष्णिहककुभाविस्यादिप्रयोगसुदाहत्यादंता अपिस्त्री हताः पचाद्यच प्रत्ययेनना सुपधात्कइतिकप्रत्ययेनचरूपसिद्धः उष्णिहेति छंदोजातिः देवविशेति देवानां प्रजा०॥

पुंयोगेपि। यदाजेष्ठादयः प्रथमजातादौ वर्त्तन्ते तदाऽदंतत्वादेवापू यदाज्येष्ठस्यस्त्रीतिपुंयोगविवक्षा तदाप्याप् भवतीतिस्पष्टयीतुमपिशब्दः ॥
कोकिलस्यस्त्री कोकिलाजातिवा चकारादप्राप्तौ आदेशविवभवति नतुजातेरितीय तेनजातावपिकोकिलेत्येवनञ्पूर्वान्मूलशब्दाज्जातावप्याप् ॥
अमूलेत्यौषधिजातिः। अनञ्पूर्वात्तु शतमूलीत्येव पादोवाङ्पू बहुव्रीहिसमासांतात्पादशब्दादीपूवास्यात् द्वौपादौयस्याःसाइतिवहुव्रीहौ संख्या·
सुव्याप्रादिपूर्वस्येति पादशब्दस्यांतलोपः द्विपात् ङीपितुशसादौस्वरेतद्धितयस्वरयोरितिपद द्विपदीछंदोजातिः ऋचिवाच्यायांतु द्विपदा
एकपदा ऋग्इत्येवभवति काप्यतः कापिइ अतइतिच्छेदः ककारेणसहितः आप् काप् तस्मिन् प्रत्ययस्थेवकोगृह्यते आपासाहचर्यात्·

पुंयोगेऽपि।त्रिफला।अमूला।कोकिला।जातावपि।इत्यादि।पादोवाङीपू।द्विपदी।द्विपाद्।आहृचि।
ऋचिवाच्यायांमस्यां पादन्तादापूस्यात्।द्विपदा।ऋक्।काप्यतः।कापिपरे पूर्वस्याकारस्येकारोभवति॥
कारिका।पाचिका।पाठिका।अतः किम्।नौका।नपरःकिरका।क्षिपकादीनान्न।क्षिपका।ध्रुवका।कन्यका॥

स्त्रियांवर्तमानस्यनाम्नो ऽतःस्थानेइकारोभवतिकापिपरे करोतेर्ण्वुलवुणाविति वुणणित्वाद्वृद्धिः कारिकाएवंपचतेःपाचिकाः अतः किं नौका नौशब्दात्स्वा
र्थेकःप्रत्ययःककारभावेतुशक्नोतीतिशकापचाद्यच्प्रत्ययःतपरः किंराका मामकानरकयोरतइःककारस्यप्रत्ययत्वाभावादप्राप्तौवचनं ममेयंमामिका अणी
तयोरितिममकादेशःणित्वाद्वृद्धिः अजादित्वादाप् नरान्कायतीति कैशब्देअस्मात् आतोऽङ्इतिडप्रत्ययःआपूइत्वंच नरिका क्षिपकादीनांन एषामत
इकारोनकापि·क्षिपेर्नाम्युपधात्कइतिकः ध्रुवस्थैर्येइत्यस्मादपिकः अथवा ध्रुगतिस्थैर्ययोरस्मात्पचाद्यच्प्रत्ययः कुटादित्वात् ङित्त्वेनगुणाभावेतुधातो
रियुवृक्षिपाएवक्षिपकाशस्त्रविशेषः ध्रुवाएवध्रुवकाभाजनं चटभेदने ऽस्मात्पचाद्यः ॥ ॥ ❁ ॥ ॥ श्रीराम ॥ ॥ ❁ ॥ ॥

चटका सर्वत्रापि अज्ञातादौ के पुनरपि चटूस्रोवेति ह्रस्वः याएवयका साएवसका आभ्यामाख्यातान्व्ययसर्वादेरित्यकः उपाधिभ्यामासन्नारूढयोरित्यक उपत्यका अधित्यका उपत्यका द्रेरासन्ना भूमिरूर्ध्वमधित्यकेत्यमरः ॥ तरतेर्वुण् अकादेशोऽवृद्धिश्च ज्योतिर्नक्षत्रं नेत्रकनीनिका चतयोरर्थे तारकाऽन्य त्रतुतारिका तंतूनां विकारस्तान्तवंतस्मिन् वर्णका प्रावरविशेष वर्णवर्णक्रियाविस्तारगुणवचनेष्विति चौरादिका द्वुण् ग्रन्थविशेषस्यव्याख्यात्री स्तो त्रकर्त्री वर्णिका वर्तयतीतिवर्तिका वुण्प्रत्ययः शकुनावेव वाच्येऽयंविकल्पः अन्यस्मिन्नर्थेतु नित्यमित्वं प्राचां पूर्वाचार्याणांमते इत्तोऽभावः उदीच माधुनिकानांमते इत्वमित्यर्थः अश्नंतिब्राह्मणायस्यां सा अष्टका इष्यशिभ्यांतकइतितकः अष्टौपरिमाणमस्या इत्यष्टिका क्वचिद्वा वाअइतिछेदः ॥

चटका यका सका उपत्यका अधित्यका तारका ज्योतिषि अन्यत्र तारिका वर्णका तान्तवे वर्णिकान्या व र्तिकाप्र कुनौप्राचाम् उदीचामनुवर्त्तिका अष्टकाश्राद्धे अष्टिकान्या क्वचिद्वा सूतका सूतिका पुत्रका पुत्रि का वृन्दारका वृन्दारिका आर्यका आर्यिका चटकका चटकिका निर्भस्त्रका निर्भस्त्रिका एषका एषिका ।

अजका अजिका ज्ञका ज्ञिका द्वके द्विके निस्स्वका निस्स्विका ॥ ११ क्वचित्तु पूर्वस्याकारोवाभवतिका पिपरे पुत्रीए वेति ह्रस्वोवेति ह्रस्वेकृते पुत्रिका पक्षेपूर्वस्यइ योऽकारः पुत्रकेति सूतशब्दात्स्वार्थेकः सूताएव सूतिका सूतका वृंदमस्यास्तीति शृंगवृन्दाभ्यामिस्या रकः वृन्दारिका वृन्दारका देवतावाची वृन्दारकशब्दः पुंलिंगएव अन्यत्रत्रिलिंगः तथाचत्रिपुत्तरे इत्युपक्रम्य वृन्दारकौरूपमुख्यावित्यमरः ॥ आर्या एव आर्यका पक्षे इत्वं आर्यिका चटकाएव चटक का चटकिका निष्क्रांताभस्त्रायाइति निर्भस्त्रा पंचमीतत्पुरुषः निर्भस्त्राएवेति निर्भस्त्रका निर्भस्त्रिका एषाएव एषका एषिका अकः अजाएव अजका अजिका ज्ञाएव ज्ञका ज्ञिका द्वे एव द्वके द्विके आख्याताव्ययसर्वादेरित्यकः निर्गतास्वात् यासानिः ॥ स्वानिःस्वाएवेति निःस्वका निःस्विका स्वार्थेकः ॥ ॥ ११ ॥ ॥

ह्रस्वोवा कापितरदोप्रत्ययेचपरेस्त्रियां विहितस्यस्वरस्यह्रस्वोऽनङ्ग्श्चवास्मात वाशब्दोव्यवस्थार्थस्तेनतराद्यावितिलब्धं गंगाएवगंगका ह्रस्वाऽभा
वे गंगाका काप्यतइतीत्वे गंगिका ह्रस्वानदीति नदिका नदीका ह्रस्वार्थेकः अतिशयेनश्रेयसीति श्रेयसितरा श्रेयसीतरा तरतमेयस्त्रिष्ठाः प्रकर्षे
इतितरप्रत्ययः स्त्रियांविहितस्येति किं तस्मातरा चमूतरा न्नणङ्ईप् नृव आचअण चएषांसमाहारोन्नण् तस्मातन्नणः अणितिप्रत्ययोनाम्नोविशेष
णत्वात्तदंतविधिः नचप्रत्ययविधौप्रतिषेधः शंक्यः स्त्रीप्रत्ययेषुतदंतविधिस्वीकारात नान्तात ऋदंतादणंताच्च स्त्रियामीप्स्यात दंडोऽस्तियस्याः

ह्रस्वोवा कापिपरेतरदोचपूर्वस्यह्रस्वोवा गङ्गका गङ्गका गङ्गिका नदिका नदीका श्रेयसितरा श्रेयसीतरा वाग्नह
नादेवसन्त्यप्रकरणान्न गोका नौका न्नणङ्ईप् दण्डिनी दन्तिनी मघोनी शुनी पौंस्नी स्त्रैणी चौरी हर्त्री कर्त्री ॥
यस्यलोपः इवर्णावर्णयोर्ह्रलोपोभवति तद्धितस्वरे यकारे ईपि च औपगवी ऐन्द्री ईप्यनोऽल्लोपः राज्ञी हिदाम्नी
ष्ठितः षकारठकारडकारऋकारानुबंधात्स्त्रियामीप्प्रत्ययोभवति ॥ ।।सादंङिनी मांतोपधाद्वत्विनावितीन् मघोनी ॥

सुनी श्वादेशितिवस्योत्वं कर्त्री करोतेस्तृवुणावितितृप्रत्ययः यस्यलोपः इश्चअश्चयंतस्ययस्यलोपःस्यात्तद्धितप्रत्यययोरीपिच यथागार्ग्यः काव्यंवासिष्ठः
मोनंउपगोरपत्यंस्त्री औपगवी अपत्येऽस्त्यित्यण् इंद्रोदेवताऽस्याइति ऐंद्री दिक् देवते दमर्थे इत्यण् ईप्यनोऽल्लोपः अन्नंतस्योपधाऽकारस्यलोपः
स्यादीपि राज्ञः स्त्रीराज्ञी हेदामनीयस्याः साहिदाम्नी ष्ठितः षृचट्चउश्च आचेतिष्ठरः ष्ठूरइतोयस्यसष्ठित तस्मातष्ठितः वृञ्ञ्वरणेप्रत्ययांतात ॥ एम॰
स्त्रियामीप्स्यात वृणोतेः षाकोकण इतिषाकप्रत्ययः यस्येत्यलोपः॥ ॥ ॥ ॥

वराकी। कुरुचरी कुरुषु चरती। ति अधिकरणोपपदाच्चरतेरटाविति टः गोशब्दात् अस्त्यर्थे इतिमतुः गावः संति यस्याः सा गोमती विदेर्वा वसुरिति वसु
प्रत्ययः वसोर्वेडरिसुत्वं विदुषी पचेः शत्रृशानौ निपृत्वेवदिति शत्रृप्रत्ययः अपूकर्त्तरीत्यपू पचंती दिवेः शत्रृप्रत्यये दिवादेर्यदृ तियप्रत्ययः दीव्यंती ॥०
अप्ययोरान्नित्यमितिनुम् तुदेः शत्रृप्रत्यये तुदादेरइत्यप्रत्ययः तुदंती वादीपोः शतुरितिवानुम् मन्नंतान्नेपू मन्नतान्नाम्नई पुनभवति सीमा दामा।
राजवत् अन्नंताद्बहुव्रीहेर्नं नातत्वात्याप्नई प्रसनभवति वहवोयज्वानोयस्यां सा वहुयज्वा नगरी डाववा मन्नंतान्नाम्नोऽन्नंताद्बहुव्रीहे श्चडापू
वास्यात् डित्वाट्टिलोपः सीमा दामा वहुयज्वा गंगावत् सीमा सीमे उभे स्त्रियामित्यमरः नपुंसिदामेत्यमरः उपधालोपिनो वहुव्रीहेर्वेप॥ अन्नंताद्

क॰ वराकी॰ ट॰ कुरुचरी॥ ऊरुद्वयसी॥ ऊरुदघ्नी॥ ऊरुमात्री॥ इत्वरी॥ उ॰ गोमती॥ विदुषी॥ ऋ॰ पचन्ती॥ दीव्यन्ती॥ तुदती॥ तुदन्ती =
प्राची॥ प्राञ्ची॥ प्रतीची॥ प्रत्यञ्ची॥ उदीची॥ उदञ्ची॥ तिरश्ची॥ तिर्यञ्ची॥ स्तनन्धयी॥ मन्नन्तान्नेपू॥ सीमा॥ सीमा नौ॥ दामा॥ दा
मानौ॥ अन्नन्ताद्बहुव्रीहेर्न॥ वहुयज्वा॥ डाववा॥ सीमा॥ सीमे॥ सीमाः॥ दामा॥ दामे॥ दामाः॥ वहुयज्वा॥ वहुयज्वे॥ उपधालो
पिनो वहुव्रीहेर्वेप॥ वहुराज्ञी॥ वहुराजा॥ नदादेः॥ स्त्रियामीपू॥ नदी॥ गौरी॥ सरसी॥ सखी॥ अशिश्वी॥ अनड्वाही॥ अनडुही॥

हुव्रीहे रुपधालोपिनो वेप्स्यात् ॥ वहवो राजानोयस्यां सा वहुराज्ञी॥ ईप्यनइत्यऽह्लोपः॥ ईवभावेडापू॥ पक्षेडावी पोरभावः॥ नदादेः॥ नदआदिर्यस्यस
नदादिस्तस्मान्नदादेर्गणात्॰ स्त्रियामीपस्यात्॥ अनुपसर्जनादेवायं गौणमुख्यन्यायात्॥ नदत्यऽव्यक्तं शब्दं करोतीति पचाद्यच्प्रत्ययः यस्येत्यलोपः॥ नदी॰
गौणेतु नदमतिक्रांतास्त्री अतिनदा सुपर्णास्यादपत्ये र्थे एय णप्रत्ययः आदिस्वरह्हिश्चसुपर्णायाः अपत्यं स्त्रीसौपर्णेयी ऊरुः प्रमाणंयस्याः सा ऊरुद्द
यसी नदी यस्येत्यलोपः॥ प्रमाणेद्वयसदघ्नट्मात्रटइतिद्वयसड़ादिः॥ अक्षैर्दीव्यतीति येति॥ इकप्रत्ययः॥ आक्षिकी॥ इण्नशजिसर्त्तिभ्यः॥ क्वरटवितिक्वरप्
एतिपरपुरुषंतत्व्छीलाइत्वरी॥ असती॥ क्वरटवृद्वयसडाद्यंतादिरणचतुष्टयं॥ ष्ट्रितइत्यत्र वक्तुमुचितं॥ क्वचित्तु तथैव पाठस्तत्र न दोषः॥ चुराशीलमस्याइति॰

सि॰ च॰ पू॰ टी॰ सु॰ ७४

शक्तिः प्रहरणमस्या इति शाक्तिकी शक्तिपष्टयोरीकक् इति नीकण्। गर्गे
चौरीत्यत्र प्रत्ययांतः स्त्रीपुंसाभ्यामिति नञ् स्नञौ स्त्रियां भवाः स्त्रैणी पुंसि भवा पौंस्नी शक्तिः प्रहरणमस्या इति शाक्तिकी शक्तिपष्टयोरीकक् इति नीकण्। गर्ग्यौ। अत्र प्रत्ययांतः स्त्रीपुंसाभ्यामिति नञ् स्नञौ स्त्रियां भवा स्त्रैणी पुंसि भवा पौंस्नी पसेस्यलोपः हलस्तद्धितस्येतियलोपे गार्गी पक्षे गार्ग्यायणीति एयंतात् गार्ग्य शब्दा
स्यापत्यमिति गर्गादेर्यञिति यञ् गार्ग्यः स्यापत्यं तत्रादित्वाद्धे प यसेस्यलोपः हलस्तद्धितस्येति यलोपे गार्गी पक्षे गार्ग्यायणीति एयंतात् गार्ग्य शब्दा
त्रियां नदादित्वादायनण् स्वार्थे लोहितस्यापत्यं स्त्री इति लोहितादिगर्गाद्यंतर्गणः यञंतात् लौहित्य शब्दात् स्त्रियामायनण् क तस्यापत्यं स्त्रीति एयंता
त्रियां नदादित्वादायनण् स्वार्थे लोहितस्यापत्यं स्त्रीति लोहितादिगर्गाद्यंतर्गणः यञंतात् कौरव्य शब्दात् स्त्रियामायनण् मंडूकस्यापत्यं स्त्रीति अ
णंतात् कारव्य शब्दात् स्त्रियामायनण् उमाकात्यायनी गौरीत्यमरः। कुरोरपत्यं स्त्रीति एयंतात् कौरव्य शब्दात् स्त्रियामायनण् ॥ ॥अनंत्यवयोवाचिनोदंतात् स्त्रियामीप्॥ कालल
णंतात् मांडूक शब्दात् स्त्रियामायनण् असुरस्यापत्यं स्त्रीति अणंतादासुर शब्दात् स्त्रियामायनण् ॥

॥अनन्त्यवयोवाचिनोऽदन्तात् स्त्रियामीप् कुमारी। किशोरी वधूटी। चिरंटी तरुणी तलुनी अदन्तात् किम् शिशुः।

११ ऊधोन्तस्य बहुव्रीहेर्न्नङ् स्त्रियाम् ॥

ताः शैभाऽवस्थावयोवयांसि चत्वारि त्रीणि च संति यथा आद्येव पसिनाधीतं द्वितीये नार्जितं धनं
तृतीये न तपस्तप्तं चतुर्थे किं करिष्यतीति चत्वारि पिता रक्षति कौमारे भर्ता रक्षति यौवने॥ पुत्रस्तु स्थविरीभावे न स्त्री स्वातंत्र्यमर्हति १ त्रीण्युपचयापचय
लक्षणे द्वे वयसी इत्यन्ये वधूटचिरंटतरुणतलुन शब्दा यौवनवाचिनः कुमारस्तु प्रथमवयोवाची अल्पवयाः अश्वा किशोरी ऊधोंतस्य बहुव्रीहेर्नङ् च।
स्त्रियाऊधोंतस्य बहुव्रीहेरीपून ङादेशश्च स्त्रियां अकार उच्चारणार्थः। बहुव्रीहिग्रहणेनैव तदंतलाभात् अंतग्रहणं स्पष्टप्रतिपत्त्यर्थं न्त्रणई विति प्राप्त
स्यपोनिषेधः॥ अनेन प्रतिषिध्यंते। यथा डाबुभाभ्यामिति वैकल्पिको डाप्। उपधालोपिनो बहुव्रीहेर्वेति वैकल्पिक ईप् अन्नंताद्बहुव्रीहेर्नेति निषेधश्च
कुंडमिवोधो यस्याः सा ईप्यनोऽल्लोप इत्यल्लोपे॥ ॥९॥ ॥ राम ७४

कुंडोध्नी। द्विकुधसीयस्याःसाद्व्यूध्नी अतिशयितमूधोयस्यासा अत्यूध्नी स्त्रियामितिकिं कुंडोधोधेनुकं वहुव्रीहेरितिकिं प्राप्तं ऊधःप्राप्तोधाः द्वितीयात्
त्पुरुषः वयोवाचिनोहायनस्यणप् संख्यादेर्वहुव्रीहेर्वयोवाचिहायनांतादीप्स्यात् आपिप्राप्तेवचनं संख्यादेर्वहुव्रीहेर्दामांताच्च डावीपोर्विकल्पेन
प्राप्तयोर्वचनं द्विदाम्नी त्रिचतुर्भ्यांणत्वं आभ्यांपरस्यवयोवाचकस्यहायनस्यणत्वंवाच्यं त्रयोहायनायस्याःसात्रिहायणी चत्वारोहायनायस्याः
साचतुर्हायणी वाला हायनोवर्षंशरत्समा इत्यमरः इंद्रादेरानीप् इंद्रआदिर्यस्यसइंद्रादिस्तस्मादिंद्रादेर्गणात् स्त्रियामानीप्स्यात् पुंयोगेइत्य
पकृष्यते।पित करणसामर्थ्याद्वसेपइत्यत्रानीपोपिग्रहणंभवति॥ननुह्रस्वादिरेवाऽनीवस्तु।किमनेनदीर्घोच्चारणेन।अत्राहुः ब्रह्माणीइतिसि

कुंडोध्नी। द्व्यूध्नी। अत्यूध्नी वयोवाचिनोहायनस्यणप्॥ त्रिचतुर्भ्यांहायनस्यणत्वम् त्रिहायणी। चतुर्हायणी।
इन्द्रादेरानीप् स्त्रियांपुंयोगे इन्द्राणी। वरुणानी भवानी। सर्व्वाणी रुद्राणी मृडानी। ०॥ ⁘ ॥०

द्ध्यर्थंदीर्घग्रहणम् ब्रह्मन्शब्दाद्दानीपिकृतेनोवेति टिलोपेब्रह्माणीति अन्येत्वाहुः ब्रह्माणमानयतिजीवयतीत्यऽनप्राणनेऽण्यंतात्कर्मण्यण्‌ णिस्य
णप्रत्ययेनणईवितीपिचकृतेब्रह्माणीसिद्धास्येव माधवस्तु इंद्रंकरोतीति इंद्रयति इन्द्रेतिनाम्नोणिचिकृतेकरणे इतिण्यंतात् क्विपिइन्द्र तस्यइन्द्रः स्त्रीइंद्रा
णीतिदीर्घपाठमाहइति तन्न क्विवंतस्यक्रियाशब्दत्वेनपुंशब्दत्वाऽभावात् किंच इन्द्रमिच्छतीति इंद्रीयति नाम्नोयईच्छास्येतियप्रत्ययांतात् क्विपि
कृते इन्द्रीः इन्द्रियः स्त्रीइंद्राणीत्यतिव्याप्तेश्च वस्तुतस्तुह्रस्वादिपाठेपिहानिर्न।इंद्रस्यस्त्री इंद्राणी वरुणस्य स्त्रीवरुणानी भवशर्वमृडरुद्राः

सि॰कौ॰पृ॰
टी॰सु॰
७५

आचार्योदणत्वं आचर्यस्यात्वात्स्यानीयोनस्यात्वंनस्यात आचार्यस्यस्त्री आचार्य्यानी पुंयोगाभावे आचार्यास्वयंव्याख्यात्री हिमारण्ययोर्महत्वे महत्त्व
योगे आभ्यामानीप् स्त्रीत्वंविधीयते महद्धिमं हिमानी हिमानी हिमहसंतिरित्यमरः। महदरण्यमरण्यानी महारण्यमरण्यानीत्यमरः। यवाद्दोषे। यवादानीप्।
स्त्रीत्वंचदोषे। दुष्टायवोयवानी यवत्वजात्यभावेनदाकारानुकृतिदोषः यवाकारानुकृतिमज्ज्ञासंतरमेवानेनाभिधीयते यवनाल्लिप्यां यवनशब्दादानी
प् लिप्यर्थेसाचस्त्रीलिंगएवदेवतेदमर्थेइत्यणोबाधकआनीप्विधीयते यवनानांलिपिर्यवनानी लिखिताक्षरविन्यासोलिपिः मातुलोपाध्यायाभ्यांवा
आभ्यामानीप्वास्यात पक्षेपुंयोगेचेतीप् मातुर्भ्राता मातुलस्तस्यस्त्रीमातुलानी मातुली उपाध्यायस्यस्त्री उपाध्यायानी उपाध्यायी अर्यक्षत्रियाभ्यांवास्वा

आचार्यादणत्वम आचार्य्यानी हिमारण्ययोर्महत्वे महद्धिमंहिमानी महदरण्यमरण्यानी यवाद्दोषे दुष्टोयवो
यवानी यवनाल्लिप्याम् यवनानी लिपिः मातुलोपाध्यायाभ्याम्वा मातुलानी मातुली उपाध्यायानी उपाध्यायी
अर्यक्षत्रियोपाध्यायेभ्योवास्वार्थे अर्य्याणी अर्य्या क्षत्रियाणी क्षत्रिया उपाध्यायानी उपाध्याया॥ ॥

र्थे आभ्यांस्वार्थे आनीवास्यात पक्षे श्राप् आर्य्याणी आर्य्या स्वामिनी वैश्यावेत्यर्थः अर्यः स्वामिवैश्ययोरित्यर्थद्वयेपि निपातनात क्षत्रियाणी क्षत्रीया
क्षत्रीयजातीयास्त्रीत्यर्थः पुंयोगेतु अर्य्यी क्षत्रियी यातुस्वममेवाध्यापिका तत्रवाईप्वाच्यः पक्षेआप् उपाध्यायी उपाध्याया उपेत्यास्या अधीयते इत्य।
यादानेस्त्रियांघञ् तयाच अर्य्याणी स्वयमर्य्यास्यात क्षत्रिया क्षत्रियाण्यपि उपाध्याया प्युपाध्यायी स्यादाचार्य्यापिचस्वतः आचार्य्यानीतुपुंयोगे
स्यादर्यी क्षत्रियीतथा उपाध्यायान्युपाध्यायीत्यमरः॥ ॥पुंयोगेच॥ इहपुमितिषष्ठ्यंतंसांकेतिकंपृथक्पदं तच्चावर्त्यते द्विरुच्चारणमावृत्तिः पुंसः
पुंसइतियोगे इतिभावेनिमित्तेवासप्तमी अधिकारान्नामेतिलभ्यतेयत पुंसोनामपुंवाचकशब्दोऽदंतः पुंसोयोगेस्त्रियांवर्त्तनेततईप्स्यात॥ ॥ एम॰
७५

योगः संबंधः स चेह दंपतिरूप एवेति नागृह्यः किंतु जन्यजनकभावोपि गृह्यते तेन केकयस्य क्षत्रियस्य पुत्री केकयी इत्यादि सिद्धं तथा च भट्टिः प्राह्वे केकयीतोभर तस्ततो भूदिति कस्यादित्वात् केकयदुहिता कैकेयी स्यपितथा प्रागुक्तः कैकेयिकामा फलितास्त्ववेति कालिदासः पुंयोगे किं देवता अयं हि संज्ञा शब्दः स्वभावात् स्त्रियां वर्त्तते न तु पुंवाचकशब्दयोगे अतः किं भानोः स्त्री भानुः पालकांतान्न पुंयोगे ईवृन स्यात् गोपालकस्य स्त्री गोपालिका सूर्याद्देवतायामाप् सूर्यशब्दात् पुंयोगे आप् स्यात् देवतार्थे ई पोपवादः देवतायां किं सूर्यस्य स्त्री मानुषी सूरी कुंतीत्यर्थः सूर्यागस्त्ययोरिति यलोपः जातेरयोपधात् जातिवाचकाद्यदुपधा यस्य सयोपधः नयोपधः अयोपधस्तस्मादयोपधात् अदन्तात् स्त्रियामीप् स्यात् जातिलक्षणमाह आकृतिग्रहणा जातिर्लिंगानां च न सर्वभा

पुंयोगेच अदन्तात्स्त्रियामीप् शूद्री गणकी पालकान्तान्न गोपालिका अश्वपालिका सूर्याद्देवतायामाप् सूर्यस्य स्त्री। देवता सूर्या अन्या सूरी जातेरयोपधात् जातिवाचिनोऽयकारोपधादकारान्तात्स्त्रियामीप्प्रत्ययो भवति महिषी हंसी। योपधात्तु क्षत्रिया वैश्या क्वचिन्न बलाका ॥

॥ एक सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह १ आकृतिर्ग्रहणं यस्याः सा आकृतिग्रहणा जातिरुच्यते॥ आकृतिः संस्थानमुच्यते। गृह्यतेऽनेनेति ग्रहणं करणे ल्युट् अवयवसंनिवेशविशेषग्राह्येत्यर्थः॥ यथा॥ तटी। तटादेः सर्वलिंगत्वेप्याकृतिग्रहणत्वाज्जातित्वं भवति॥ अनेन लक्षणेन गोत्वादिजातिर्लक्षिता ब्राह्मणत्वादिजातिस्तु न लक्षिता ब्राह्मणक्षत्रियादेर्नोऽवयवसंस्थानस्य सदृशत्वाद्ब्राह्मणादिष्वव्याप्तिवारणाय लक्षणांतरमाह चकारो भिन्नक्रमार्थे. या सकृदाख्यातनिर्ग्राह्या सा जातिरुच्यते सकृदेकवारमाख्याता उपदिष्टा सती निर्ग्राह्या निश्चेतुं शक्या सा जातिरित्यर्थः॥ कीदृशी या लिंगानां न सर्वभाक् लिंगानामिति कर्मणि षष्ठी सर्वाणि भजतीति सर्वभाक् या सर्वाणि लिंगानि न भजतीत्यर्थः॥ सर्वशब्दस्य लिंगापे·

सत्वेपिगमकत्वात् भजोविणप्रत्ययः समासश्च असर्वलिंगत्वेसत्येकस्यांव्यक्तौकथनाद्व्यक्त्यंतरेकथनंविनापिसुग्रहाजातिरिति लक्षणांतरंयथा वृषली
एकस्यांहिव्यक्तौवृषलत्वेकथितेतदपत्यंतत्सहोदरादौकथनंविनापिवृषलत्वस्यसुग्रहः सकृदित्यादिकिं देवदत्तायस्यांहिव्यक्तौदेवदत्तत्वंकथ्यते ॥
तत्समकालमन्यादेवदत्तव्यक्तिरप्रसिद्धेतिन देवदत्तत्वंजातिः उक्तलक्षणद्वयरहितत्वात् तृतीयंलक्षणमाह चरणैः सहगोत्रंजातिरुच्यते चरणशब्देन
शाखाध्येतारउच्यंते गोत्रशब्देनापत्यमुच्यते अपत्यप्रत्ययांतः शाखाध्येतृवाचकश्च शब्दोजातिवाचकइत्यर्थः गोत्रस्यानाकृतिग्रहणत्वात्सर्वलिंगत्वा
च्च पृथगुपादानं चरणशब्दानांस्वाध्ययनक्रियासंबंधेनप्रवृत्तत्वात् । क्रियाशब्दाएवजातिशब्दाइतिचरणग्रहणंकृतं॥ आकृतिग्रहणायथा महिषी हंसी॥

गवयहयमुकयमनुष्यमत्स्यानामनिषेधः गवयी हयी मुकयी हसात्तद्धितयस्येपि
लोपः मनुषी ईपिमत्स्यस्ययलोपः मत्सी॰ ॥ ॥ श्रीकृष्णायनमोनमः॥ ॥॰

असर्वलिंगायथा ब्राह्मणी वृषली गोत्रलक्षणायथा॥ औपगवीपैतृष्वस्रीयी अणंतमीयंपरत्वादयंबाधते इतिभावचरणलक्षणायथा कठेनप्रोक्तमधीया राम॰
नाकठी कारकादित्यणप्रत्ययस्तस्यलुक्च अतइतिकिं तित्तिरिः गोः क्वचिन्न यः शब्दोजातिवाचीअयोपधः स्त्रियांनियतश्चततोनेपूभवतीत्यर्थः बलाकावि ७६
शकंठिकेत्यमरः॥ ॥ गवयहयमुकयमनुष्यमत्स्यानामनिषेधः योपधेभ्योप्येभ्यईपूस्यात् हसात्तद्धितयस्येपिलोपः हसात्परस्यतद्धितयकारस्यलोपः
स्यादीपि यस्येत्यलोपः मनुषी ईपिमत्स्यस्ययलोपः॥ मत्स्यशब्दस्ययकारस्यलोपः स्यादीपियस्येत्यलोपः ॥ मत्सी ॥ ॥ ꣸ ॥ ॥ श्री ॥ ॥

सूर्य्यागस्त्ययोरीयेईपिच अनयोर्यकारस्यलोपःस्यात् ईयप्रत्यये ईप्प्रत्ययेच सूरीयः सूरी अगस्तीयः अगस्ती तिष्यपुष्ययोर्नक्षत्राणियलोपः अनयोर्यका
रस्यलोपःस्यात् नक्षत्रसंबंधीयोऽण् सनक्षत्राण् नक्षत्रेणयुक्तःकालइत्यण् नक्षत्रेभवइत्यण् चतस्मिन्परतः तिष्येणयुक्तःकालस्तैषः पुष्येणयुक्तः पौषः तथा।
तिष्येभवस्तैषः पुष्येभवः पौषः स्त्रियांत्वणईवितीप् यस्येतिलोपः तैषी पौषी पाणिनिसूत्रंजानपदकुंडगोणस्थलभाजनागकालनीलकुशकामुक कव
राद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु एभ्यएकादशेभ्यएष्वर्थेषु ङीष्स्यात् जनपदेदेशेभवाजानपदी भवा

सूर्य्यागस्त्ययोरीयेईपिच सूरी अगस्ती तिष्यपुष्ययोर्नक्षत्राणियलोपः तैषी पौषी जानपदादिभ्योऽर्थविशेषे
ईप् जानपदीवृत्तिश्चेत् अन्याजानपदा कुण्डीअमत्रंचेत् कुण्डान्या गोणी आवपने गोणान्या स्थली अकृत्रिमा
याम् स्थलान्या भाजी श्राणाचेत् भाजान्या नागीस्थूलाचेत् नागान्या कालीवर्णश्चेत् ॥ ॥ रामः ॥ ॥

र्थेऽणवर्तते। अन्येतिवृत्तिर्जीविका वेद्यादिअन्याप्येवंजानपदी वृत्त्यभावे आद्युदात्तइतिस्वरेभेदः अस्त्रीकमंडलुःकुंडी सममरः अमत्रंपात्रं कुंडीस्त्रीविषयत्वा
भावादप्राप्तईप्विधीयते अन्या कुंडा कुंडिदाहे अस्माद्गुरोर्हलादित्यङ् प्रत्ययेरूपं यस्तुअमत्रेजारजःकुंड इतिमनुष्यजातिवाचीकुंड शब्दस्ततोजातिल
क्षण ईप्भवत्येव उप्यतेनिक्षिप्यते धान्यमस्मिन्नितदावपनं गोणी आङ्पूर्वाद्वयेरधिकरणेल्युट् अन्यागोणेति यथेच्छंनाम अकृत्रिमापुरुषेणासंस्कृताभू
मिः स्थली पुरुषकृतातुस्थला श्राणा पक्वा यवागूभाजी अपक्वाभाजा स्थूलापदार्थाचेत् नागी अन्यानागा वर्णयुक्ताचेत्काली अन्या ॥ ॥ ६ ॥ ॥ ॥

सि०कौ०पू० टी०मु० ७७

काला अन्या छादनंचेन्नीली औषधिविशेषः प्राणिनितुनीलीगौः आच्छादनेतु नीला शाटी अयसोलोहस्यविकार अयोविकारः फालइतिप्रसिद्धः।तत्रकु
शो अन्या कुशावेदे औदुंवरं शंकुकुशा इतिव्यवहरंति वलगाऽपियद्रुक्कंवलगावक्षेपणी कुशेति हैमकोशे मैथुनेच्छायां सुरतवांछायां कामुकीवनादि
कं कामयितुं शीलंयस्याः साकामुका याकोकणइत्युकणु केशविन्यासे केशरचनायां कवरी अन्याकवरा चित्रेत्यर्थः॥ शोणाद्वा शोणशब्दाद्वाङीप्स्यात्
शोणः कोकनदच्छविरित्यमरः॥ वहुव्रीहेर्जातिपूर्वपदात् क्तान्तात् जातिवाचिपूर्वपदात् क्तान्ताददन्तात् वहुव्रीहेः स्त्रियामीप् भिन्नावूरूयस्याइतिवहु
व्रीहौ भिन्नशब्दस्यवहुव्रीहौ विशेषणसप्तम्यंतक्तांतानामितिपूर्वनिपाते प्राप्ते क्वचिन्नेतिपरनिपातः जातांतान्नजातशब्दांतात् वहुव्रीहेर्जातिवाचिपूर्व

॥ कालान्या नीली ओषधिप्राणिनोः नीलान्या सञ्ज्ञायांवा नीला नीली। कुशी अयोविकारे कुशान्या कामुकी मैथुनेच्छा
यामू कामुकान्या कवरी केशविन्यासे कवराऽन्या शोणाद्वा शोणी शोणा वहुव्रीहेर्जातिपूर्वपदात् क्तान्तात् ऊरुभिन्नी॥
जातान्ताच्च दन्तजाता अस्वाङ्गपूर्वपदाद्वा सुरापीती सुरापीता पाणिगृहीताभार्य्यायामू अन्यापाणिगृहीता क्रीतान्ता
त् करणादेः वस्त्रक्रीती क्वचिन्न धनक्रीता क्तादल्पत्वे अभ्रलिप्तीद्यौः॥ ऽऽपदादीपूर्वदन्ताजाता यस्याःसादन्तजाताःअस्वाङ्गपूर्व

पदाद्वा अस्वाङ्गजातिवाचिपूर्वपदात् क्तान्ताददन्तात् वहुव्रीहेः स्त्रियांवेप् स्यात् पीतासुराययासासुरापीता क्वचिन्नेति क्तान्तस्यपरनिपातः वहुव्रीहेर्जातिपू
र्वपदाद्विल्सनेननिसेमात्रेविकल्पार्थमेतत् पाणिगृहीतीभार्यायां यस्याः पाणिरग्निसाक्षिकंगृह्यते तस्यांवाच्यायांपाणिगृहीतशब्दाद्ङीप्स्यात् अन्ये
निकौतुकादिना पाणिर्गृहीतो यस्या दास्यादेः सा पाणिगृहीता क्रीतात्करणादेः आदिशब्दोऽद्यवयववचनः करणमादिरवयवोयस्य तस्मात्करणादेरेकप्। सम० ७७
दादित्यर्थः॥ क्रीतान्ता ददन्तात् करणादेः स्त्रियामीप्स्यात् वस्त्रेणक्रीतेतिवस्त्रक्रीती करणादेरितिकिं गवाक्रीता अश्वेनक्रीता क्तादल्पत्वे करणादेःक्तां

तादर्दतात्स्त्रियामीप्स्यादल्पत्वे द्योत्ये अल्पैरश्वैर्लिप्तेति अश्वलिप्ती ॥ ९ ॥ अल्पत्वेकिं चन्दनलिप्ताङ्गना स्वांगाद्वा स्वांगवाचकाद्कारान्तादसंयोगो·
पधाद्वैणाद्वा स्त्रियामीप् स्यात् यथासुष्टुमुखंयस्याःसासुमुखी सुष्टुकेशायस्याःसासुकेशी पक्षेआवन्तइत्याप् असंयोगोपधात्किं सुष्टुगुल्फौयस्याःसा
सुगुल्फा उपसर्जनात्किम् शोभना शिखेवेति सुशिखा शीङ्गोह्रस्वश्चेतिवमसयः आवन्तइत्याप् किंचयद्यत्रस्वमंगं स्वांगंग्रह्येततदासुमुखाशालेस्यचा
पीप्स्यात् मुखस्यशालांगत्वात् सुकेशीरथ्येत्यत्र चेप्नस्यात्· केशानांरथ्यांगत्वाभावात् अतोअव्याप्त्यतिव्याप्तिपरिहारार्थमाह० तत्स्वांगंत्रिधा ॥
अतत्स्थं तत्रदृष्टं च तेन चेत्तत्तथायुतं ॥ १ ॥ तत्स्वांगमुच्यते ॥ कीदृशं ॥ अद्रवंद्रवतीति द्रवं न द्रवमद्रवं
तथाच॥ अद्रवंमूर्तिमत्स्वांगंप्राणिस्थमविकारजं ॥ अतत्स्थं तत्रदृष्टं च तेन चेत्तत्तथायुतं ॥ १ ॥

॥ अल्पत्वेकिम् चन्दनलिप्ताम्या मूर्त्तिःस्वाङ्गाद्वा स्वाङ्गवाचिनो ॥
ऽदन्तादसंयोगोपधादुपसर्ज्जनाद्वा स्त्रियामीप् सुमुखी सुमु
खा सुकेशी सुकेशा संयोगोपधात्तु सुगुल्फा ॥ ९ ॥

सुष्टुस्वेदोयस्याःसासुस्वेदा द्रवत्वान्नात्रस्वांगंन पुनः की·मूर्तिमत्स्पर्शवद्द्रव्यपरिमाणंमूर्तिः मूर्तिर्यस्यास्तितन्मूर्तिमत् सुष्टुज्ञानंयस्याः सासुज्ञाना अमूर्तत्वा
न्नात्रस्वांगंन पुनः की०प्राणिस्थंसुस्तनाम्निकान्तः संचारीवायुःप्राणः प्राणोयस्यास्तीति प्राणी प्राणिनितिष्ठतीति तत्प्राणिस्थं सुष्टुमुखंयस्याःसा सुमुखा
शालाअप्राणिस्थत्वा दत्रस्वांगंन पुनः की० अविकारजं वातपित्तकफानां विकृतिर्विकारः विकाराज्जातंविकारजंन विकारजमविकारजं सुष्टुशोफोय
स्याःसासुशोफा शोफस्तुश्वयथुःपुमानित्यमरः विकारजत्वादत्रस्वांगंन यदिप्राणस्थंस्वांगंतर्हि रथ्यादिगतानां केशादीनां स्वांगत्वंनस्यात् सुकेशीरथ्या
इति नसिद्ध्यत्यतोद्वितीयंलक्षणमाह॥ चपुनःअतत्स्थंतत्रदृष्टंस्वांगमुच्यते॥ कदाचित्तत्रप्राणिनिदृष्टंतं प्रतितस्मिन्प्राणिनितिष्ठतीति तत्स्थंनतत्स्थं

अप्राणिस्थस्यापिकेशादेः पूर्वंप्राणिनिदृष्टत्वात् स्वांगं एवमपिप्रतिमादिगतस्तनमुखादीनांस्वांगत्वेनप्राप्नोति अप्राणिन्यदृष्टस्थत्वात् सुस्तनीप्रतिमेतिनसिद्ध्य
त्यतस्तत्रीयंलक्षणमाह अत्रास्यमित्यनुवर्त्तते एवादृशंतदप्राणिस्थंमुखादिस्वांगमुच्यते कीदृशंचेद्यदितेनप्राण्यंगेनमुखादिनासहतथायुक्तंप्राणिवद्युक्तंस
हितं यथाप्राणियुक्तंतद्दृष्टंप्राणिनियुक्तंभव तीत्यर्थः॥सुष्ठुस्तनौयस्याः सासुस्तनीप्रतिमा प्राणिसदृशेप्रतिमादौप्राणिनिदृष्टेवेति प्राणिवत् स्तनादेः स्थितत्वात्स्वां
गमस्ति॥ ॥नासिकोदरोष्ठजंघादंतकर्णशृंगाच्च एभ्योवेप्रत्यात नासिकोदरयोर्नक्रोडादिबहुस्वरादिति ओष्ठादीनांपंचानांतुसंयोगोपधाच्च निषेधेप्राप्तेवच

नासिकोदरौष्ठजंघादन्तकर्णशृङ्गाद्वा तुङ्गनासिकी तुङ्गनासिका मन्दोदरी मन्दोदरा बिम्बोष्ठी बिम्बोष्ठा सुजंघी
सुदन्ती सुकर्णी सुशृङ्गी अङ्गगात्रकण्ठपुच्छाच्च स्वङ्गी सुगात्री सुकण्ठी सुपुच्छी पक्षेस्वङ्गेत्यादि कबरमणिविष
शरेभ्यः परात्पुच्छान्नित्यम् कबरपुच्छी मणिपुच्छी विषपुच्छी शरपुच्छी ॥ ॥ नम श्शीवाय ॥ ॥१

नं॥ तुंगानासिकायस्याः सातुंगनासिकी मंदउदरोयस्याः सामंदोदरी बिंबवदोष्ठौयस्याः साबिंबोष्ठी सुष्ठुजंघेयस्याः सासुजंघी पक्षेआप् सुजंघेति॥अं
गगात्रकंठपुच्छाच्च एभ्योवेप्रत्यात् असंयोगोपधादितिनिषेधेप्राप्तेवचनं सुष्ठुअंगंयस्याः सास्वंगी सुष्ठुगात्रंयस्याः सासुगात्री सुष्ठुकंठोयस्याः सासुकंठी एम॰
सुष्ठुपुच्छंयस्याः सासुपुच्छी पक्षेआप् कबरमणिविषशरेभ्यः परात् पुच्छान्नित्यं ईप्रत्यात् कबरं चित्रं पुच्छं यस्याः साकबरपुच्छी मणिः पुच्छे यस्याः। ७८
सा मणिपुच्छी शरः पुच्छेयस्याः साशरपुच्छी विषंपुच्छेयस्याः साविषपुच्छी ॰॥ ॥ॐ॥ ॥॰ ॐनमः शीवायेति ॰॥ ॥ॐ॥ ॥॰ ॰ ॰॥

उपमानात्पक्षपुच्छाभ्यां ॥ उपमानात्परआभ्यां पक्षपुच्छाभ्यां निस्त्रमीप् श्येनवत्पक्षौ यस्याः सा श्येनपक्षी श्येनइवपुच्छं यस्याः सा श्येनपुच्छी नक्रोडादिबह्वचः क्रो
डादेर्बह्वचश्च स्वांगान्नेप् स्यात् अश्वानामुरः क्रोडा स्त्रीलिंगोयमिति हरदत्तः तत्रान्यार्थे इतिहृ स्विकृते अस्वांगत्वादीपः प्राप्तिरनेनबाध्यते ननाक्रोडं भुजां
तरमित्यर्थः कल्याणं क्रोडायां यस्याः सा कल्याणक्रोडा सुभुजघनं यस्याः सा सुजघना सहनञ्विद्यमानपूर्वान्न सहसादि त्रिकपूर्वात्स्वांगान्नेप् स्यात् ०
सहकेशैः वर्तते या सा सकेशा सहादेरितिसहस्यसः अविद्यमानाः केशा यस्याः सा अकेशा नाइतिनञोकारादेशः विद्यमानानासिका यस्याः सा विद्य
माननासिका स्वांगाट्टेत्यस्य नासिकोदरोष्ठेत्यस्य वाधकोयं परत्वात् नखमुखात्संज्ञायां आभ्यामीप् स्यात् संज्ञार्थेशूर्पणखा रावणस्वसृनाम ॥

॥ उपमानात्पक्षपुच्छाभ्याम् ॥ श्येनपक्षी ॥ श्येनपुच्छी ॥ नक्रोडादिबह्वचः ॥ कल्याणक्रोडा ॥ सुजघना ॥ सह
नञ्विद्यमानपूर्वान्न ॥ सकेशा ॥ अकेशा ॥ विद्यमाननासिका ॥ नखमुखात्संज्ञायाम् ॥ शूर्पणखा ॥ गौरमुखा
संज्ञायां किम् ॥ ताम्रमुखी ॥ कन्या ॥ वोर्गुणात् ॥ उदन्ताद्गुणवाचिनो वास्त्रियामीप् पट्वी पटुः बह्वी बहुः ॥ ६

यदा शूर्पवन्नखानि यस्याः सा इतियोगमात्रं विवक्षितेन तु संज्ञा तदाईप् स्यादेव णत्वाभावश्च गौरमुखेति कस्याश्चित् संज्ञा असंज्ञायां तु ताम्रवन्मुखं यस्याः
सा ताम्रमुखी वोर्गुणात् वाडोरितिच्छेदः गुणशब्दोत्रगुणवत्परो न तु गुणमात्रवाचिपरो गुणमात्रवाचकानां स्त्रीलिंगाभावात् गुणेशुक्लादयः पुंसि शुक्
लात् उदंतादितिकिं शुचिः गुणात्किं आखुः महाभाष्ये गुणलक्षणं सत्वे निविशतेऽपैतिपृथक् जातिषु दृश्यते आधेयश्चाक्रियाजश्च सोऽसत्वप्रकृति
गुणः ॥१॥ स गुण उच्यते यः सत्वे द्रव्ये निविशते द्रव्यमुपैतीत्यर्थः ननु द्रव्ये द्रव्यत्वं तत्राऽतिव्याप्तिरतआह योपृथक् द्रव्यादपैति अपगच्छति द्रव्यं ज
हातीत्यर्थः यथापीततायां जातायां नीलता फलादपैति । नैवं द्रव्यत्वं द्रव्यादपैति ननु गोघगोत्वं तदश्वादेरप्यपैतित्तत्राऽतिव्याप्तिरतआह यःपृथक्जाति

पुदृश्यंते॥ द्रव्यांतरेष्वऽवलोक्यते॥ यथा अम्रेहृशानीलताचिणादिष्वपिदृश्यतेन तथागोत्वंपृथक् जातिषुदृश्यते एवंतर्हिंद्रव्येक्रियावर्तते सादूव्याद
पेतिपृथक्जातिषुदृश्यते चेतितन्नानिव्याप्तिरत आह आधेयश्चउत्पाद्यः चपुनः योक्रियाजोऽनुत्पाद्यइत्यर्थः उत्पाद्योयथा घटादेः पाकजोरूपादिः अनुत्पाद्यो
यथा आकाशादेर्महत्त्वादिः॥ क्रियानुसर्वोप्युत्पाद्यएवनानुत्पाद्याक्रियायाद्वैविध्याऽभावाद्गुणत्वाभावः एवंतर्हिद्रव्यस्यगुणत्वंप्राप्नोति तथाहि अवयविद्र
व्यंह्यवयवद्रव्येषुनिविशते संयोगविनाशादवयवद्रव्यादपैति पृथग्जातिषुहस्तपादादिषुदृश्यते द्रव्यमुत्पाद्याऽनुत्पाद्यभेदेनद्विविधंतत्रनिरवयवस्यात्म
परमाण्वादेरनुत्पाद्यत्वं नित्यत्वात् अवयविद्रव्यस्यघटादेस्तूत्पाद्यत्वमस्त्यनित्यत्वादत आह योऽसत्वप्रकृतिरनुद्रव्यस्वभावोद्रव्याद्भिन्नइत्यर्थः १॥

॥ खरुसंयोगोपधान्न खरुः पाण्डुः कृदिकारादक्त्यर्थात् रा त्री रात्रिः॥

॥ शकटी शकटिः अक्त्यर्थात्किम् भूतिः अजननिः पद्धत्यादिभ्योवा॰॥

॥ पद्धती ॥ पद्धतिः ॥ ⁘ ॥

॥१॥ खरुसंयोगोपधान्न॥ खरुशब्दात् संयोगोपधगुणवाचिनः शब्दाच्चनेप्स्यात् खरुःपतिंवराकन्या पाणिग्रहणोत्कंठावतीत्यर्थः कृदिकारादक्त्यर्थात्
न्यादिभिन्नात्कृत संबंधिनइकारान्तस्त्रियांवेप्स्यात् आजी संग्रामः धूलीरजः अक्त्यर्थात्किम् भूतिः क्तिनितिस्त्रियांभावेऽर्थेक्तिः आक्रोशेनञ्यनिरिति
जननिरितिजनेरनिप्रत्ययः नजायतेइत्यऽजननिः पद्धत्यादिभ्योवास्त्रियामे भ्योवेप्स्यात् पद्भ्यांहन्यतेइतिपद्धतिर्मार्गः क्तिप्रत्ययांतत्वादप्राप्तेवि
भ्यर्थम्॥ पद्धतिशब्दोगणपठ्यते पद्धतियष्टिविकटविशालकल्याणपुराणचंडकृपाणअहन्निसारय्यः॥ ॥⁘॥ ॥ श्रीरामचन्द्रायनमोनमः

ऐचमन्वादेः॥मनुरादिरस्यसमन्वादिस्तस्मान्मन्वादेः आदिशब्दः प्रकारे स्त्रियामन्वादेर्ईपुस्यात् पुंयोगे एषामंतस्यैकारादेशश्च पूतः क्रतुर्यस्य येन वा पूतक्र
तुः पूतक्रतोः स्त्री पूतक्रतायी पुंयोगे किं पूतक्रतुः स्त्री यथा तु क्रतवः पूतापूतक्रतुरेव सेत्यर्थः अग्नेः स्त्री आग्नायी २ स्वाहा च हुतभुक् प्रिये इत्यमरः॥वर्ष
तिकामानिति वृषः नाम्युपधात्कित् इति किः॥आकंपयति पापानीत्याकपिः अत्रांतर्भावितणिप्रत्ययार्थोस्ति इखश्चिवत् इति इप्रत्ययः॥इदितइतिनुम्॥
आगमजमनित्यमित्युक्तत्वात् वृषश्चासौ आकपिश्च वृषाकपिः वृषाकपेः स्त्री वृषाकपायी हरिविभूवृषाकपीत्यमरः वृषाकपायी श्रीगौर्योरिति चा
मरः मनोरैऔवा मनुशब्दस्यौकारादेशः ऐकारादेशश्च वा ईप् मनोः स्त्री मनावी मनायी ईव भावः पत्न्यादयो निपात्याः पत्नी आदिर्येषां ते पत्न्याद

ऐचमन्वादेः मनुपूतक्रतुवृषाकप्यग्निकुसितकुसिदानामै आदेशई प्रच स्त्रियां पुंयोगे पूतक्रतायी कुसितायी कुसिदा
यी वृषाकपायी अग्नायी मनोरै औवा मनावी मनायी मनुः पत्न्यादयोनिपात्याः पत्नी सपत्नी एकपत्नी वीरपत्नी ॥

यः॥आदिशब्दः प्रकारे पतिशब्दात्तस्य नांतत्वनिपात्यते न्वणई विती पत्नी समानाः पतिर्यस्याः सा सपत्नी सहादेशेति समानस्य सभावः एकः पतिर्यस्याः।
सा एकपत्नी वीरः पतिर्यस्याः सा वीरपत्नी सखिशब्दशिशुशब्दाभ्यामीप् निपात्यते सखी नविद्यते शिशुर्यस्याः सा अशिश्वी अशिश्वी तु शिशुं विनेत्यमरः
अनडुहः स्त्रियामीप् निपात्यते अनडुह ईप् इति वाम अनड्वाही अनडुही प्रागादिशब्दादीक् निपात्यते गतौ प्राची पूर्वा दिक् नोलोप इति लोपः पूजायां तु
प्राची पूजायां चैते नैतिनलोपाभावः गतौ प्रत्यङ्घी घ्रस्वकारलोपपूर्वदीर्घौ प्रतीची पश्चिमा दिक् पूजायां प्रत्यंची उदीची उत्तरा दिक् तिरश्चादयः
उदीचादेशः अवाची दक्षिणा दिग् प्राच्यवाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः ॥ उत्तरादिगुदीचीस्यादित्यमरः ॥ ॥ ॥ ॥ ॥

सि॰ चं॰ टी॰ टी॰ लु॰ ८० क्वचिद्वा। क्वचिद्वा निपात्यन्ते नं भवति वृद्धः पतिर्यस्याः सा वृद्धपत्नी वृद्धपतिः वृषलः शूद्रः पतिर्यस्याः सा वृषलपत्नी वृषलपतिः एतच्छब्दात् स्त्रियामीबु
तकारस्य नकारादेशश्च वा निपात्यते एनी एता कर्बुरेत्यर्थः चित्रकर्मीरकल्माषशबलैताश्च कर्बुरे इत्यमरः हरिणी हरिता हरिद्वर्णेत्यर्थः॥ रोहिणी रो
हिता रक्तेत्यर्थः श्येनी श्येता श्वेतेत्यर्थः असितपलितयोरपि तकारस्य क्नादेशश्च वा निपात्यते असिता असिक्नी कृष्णेत्यर्थः पलिता पलिक्नी
वृद्धेत्यर्थः इतो मनुष्यजातेरपि मनुष्यजातिवाचिन इकारान्तात् स्त्रियामीप् स्यात् दक्षस्यापत्यं दाक्षिः अतइञितीञ् अत्र गोत्रलक्षणा जातिः अवं
तेरपत्यं स्त्री कुन्तेरपत्यं स्त्री स्त्रियामवंति कुन्ती त्यपत्यप्रत्ययस्य लुक् अत्रापि गोत्रलक्षणा जातिः ऊतऊः कुरोरपत्यं स्त्री स्त्रियामवंति कुंतिकुर्विभ्यश्च त्यस्य

क्वचिद्वा वृद्धपत्नी वृद्धपतिः वृषलपत्नी वृषलपतिः एता एनी हरिता हरिणी रोहिता रोहिणी श्येता श्येनी असिता
असिक्नी पलिता पलिक्नी इत्यादि इतो मनुष्यजातेरपि दाक्षी अवन्ती कुन्ती ऊतऊः उदन्तादयोपधान्मनुष्यजाति
वाचिन स्त्रियामूङ् प्रत्ययः कुरूः अयोपधात्किम् अध्वर्युः स्त्री पङ्गोश्च पङ्गूः श्वसुरस्योकाराकारलोपऊश्च श्वश्रूः
उपमानवाचिपूर्वपदादूरूत्तरपदादूः करभोरूः॥

((मस्यपलुग् अत्रापि गोत्रलक्षणा जातिः अयोपधात्किं अध्वर्युर्ब्राह्मणी शाखा।
ध्येत्री शाखाध्यायि वंशोद्भवा वेत्यर्थः अत्र चरणलक्षणा जातिः। अध्वरं यातीति विग्रहे मृगय्वादयश्चेत्यौणादिकेन सूत्रेण याधातोः कुप्रत्ययो ध्वरश
ब्दस्यान्त्यलोपश्च पंगोश्च पंगुशब्दो गुणवाची तस्मात् स्त्रियामूः स्यात् श्वसुरस्योकाराकारलोपऊश्च श्वसुरशब्दात् स्त्रियामूः स्यात् उकाराकारयोर्लोप
श्च संनिहितत्वादन्तस्यैवातो लोपोनन्त्यादेः पुंयोगे चेतीब् निवारणार्थमिदं उपमानवाचिपूर्वपदादूरूत्तरपदादूः उपमीयते नेन तदुपमानं अधि
कगुणविशिष्टमित्यर्थः करभवदूरू यस्याः सा करभोरूः॥ मणिबंधादाकनिष्ठं करस्य करभो बहिरित्यमरः॥ ॥ ॥ ॥ ॥ ॥ रा॰ म॰ ८०

संहितशफलक्षणवामसहितसहादेरनौपम्येपि संहितादिपूर्वपदादूरूत्तरपदान्नाम्नः स्त्रियामूः स्यात् उपमीयतेऽनयेत्युपमा तस्याभाव औपम्यं न औप
म्यमनौपम्यं तस्मिन् संहितौ मिलितौ ऊरू यस्याः सा संहितोरूः शफाविव ऊरू यस्याः सा शफोरूः शफं क्लीबे खुरः पुमानित्यमरेण क्लीबत्वमुक्तं तथापि को
शांतरे पुंस्त्वं शफः खुरे गवादीनां मूले विटपिनामपीति हेमचन्द्रः लक्षणमस्त्यस्मिन् सलक्षणः अस्त्यर्थेऽप्रत्ययः लक्षणौ ऊरू यस्याः सा लक्षणोरूः ॥
वामो सुंदरौ ऊरू यस्याः सा वामोरूः हितेन सहेति सहितः सहितौ ऊरू यस्याः सा सहितोरूः सहेते इति सहौ सहौ ऊरू यस्याः सा सहोरूः ॥ नरयोरीपूर्द्वि
श्च नशब्दात् ङ्णई विनीपि प्राप्ते नरशब्दाज्जातिलक्षणे ईपि प्राप्ते हृद्ध्यर्थं वचनं नुर्नरस्य वा स्त्री नारी यूनस्तिः ङ्णई इत्यस्यापवादः नाम्नो न इति

संहितसफलक्षणवामसहितसहादेरनौपम्येऽपि संहितोरूः शफोरूः लक्षणोरूः

वामोरूः सहितोरूः सहोरूः ॥ नरयोरीपूर्द्विश्च नारी यूनस्तिः युवन् शब्दात् ॥

स्त्रियान्तिः युवतिः ॥ ⁘ ॥ इतिस्त्रीप्रत्ययाः ॥ ⁘ ॥ ॥ छ ॥

नलोपे कृते केचित् स्यादेरसे इत्यनुवर्तयन्ति तन्मते युवन् शब्दात् तिप्रत्यये नलोपः कथं स्यात् स्यादीनां प्रत्ययत्वाभावादुच्यते तद्ः इतिच्छेदः कर्तव्यः युवन् श
ब्दात् स्त्रियामिप्रत्ययो यूनोऽस्य तादेशश्चेति कथं तर्हि युवतीकरनिर्मथितं मथितमिति प्रयोगः योतिमिश्रीकरोति पश्यासहेति योतेः शत्रन्तात् ङीत
इतीपि कृते बोध्यः अत्राप्यतु उपसर्जनादिति निषेधः गौणे तु बहवो युवानो यस्यां सा बहुयुवा यूः स्त्रीप्रत्ययान्तेभ्यः शब्देभ्यः प्रातिपदिकग्रहणे लिंग
विशिष्टस्यापि ग्रहणमिति परिभाषया स्याद्युत्पत्तिर्बोध्या ॥ ॥ ⁘ ॥ ॥ इतिस्त्रीप्रत्ययाः ॥ ॥ ⁘ ॥ ॥ ॥ ॥

स्वादयः प्रत्ययानाम्नो विहितास्तेषामर्थविशेषमवस्थां दर्शयितुमारभते लिंगार्थे प्रथमा लिंगं चार्थश्चानयोः समाहारो लिंगार्थं तस्मिन् लिंगार्थे अर्थे प्र
थमाइत्युक्तेनत्स्यार्थे इत्याकांक्षायां यस्मान्नाम्नः स्वादिर्विभक्तिर्विहितास्तस्य नाम्नो ऽर्थे एवेति नामार्थमात्रं मात्रं कात्स्न्र्येऽवधारणे इत्यमरः तत्र प्रथमा
विभक्तिर्भवति स को नामार्थः नियतोपस्थितिको नियतोपस्थितिर्यस्य स नियतोपस्थितिकः यस्मिन् नाम्नि उच्चारिते यस्यार्थस्य नियमेनोपस्थितिः ॥
स नियतोपस्थितिको नामार्थः एवं शंकायामित्युच्यते अनियतलिंगग्रहणार्थं लिंगमिति लिंगे लिंगमात्राधिक्ये पि प्रथमा यद्यपि लिंगमात्रे इत्येवास्तु ए
वं तथापि नामार्थं विना लिंगस्यान्वयस्यान्तरसंभवात्ताधिक्ये इत्युक्तं प्रथमादयः सप्तम्यन्ताः प्राचां संज्ञास्ताभिरिहापि व्यवहारः ननु सिंहो माणवक इत्यादौ प्र

लिङ्गार्थे प्रथमा नामार्थमात्रे लिङ्गमात्राधिक्ये च प्रथमा विभक्तिः नियतोपस्थितिको नामार्थः उच्चैः नीचैः कृष्णः श्रीः
ज्ञानम् द्रोणः खारी आढकम् एकः द्वौ बहवः अलिङ्गा नियतलिङ्गाश्च नामार्थमात्र इत्यस्योदाहरणम् अनिय
तलिङ्गास्तु लिङ्गमात्राधिका इत्यस्य तटः तटी तटम् आमन्त्रणे च आभिमुखीकरणे प्रथमा हे देव हे देवौ हे देवाः ॥

थमा तस्मादुच्यते शक्यार्थमादाय प्रथमाविभक्तेरुत्पत्तौ सत्यां पश्चात्तदन्तरसमभिहारो लक्ष्यार्थबोधोऽस्तीति ननु वीरः पुरुषः इत्यादौ प्रथमान्तस्या
त वीराऽभिन्नः पुरुष इत्यभेदसंसर्गस्याधिकस्याभावात् उच्यते अत्र पदसंस्कारपक्षाभ्युपगमोऽस्ति तन्नोऽन्तरंगत्वात् प्रथमप्रवृत्तपदसंस्कारेण प्रथमा
रूपे कृते पश्चाद्बहिरंगत्वात् अभेदसंसर्गो वाक्यार्थः कर्तव्य इति ॥ नास्ति लिंगं येषां ते ऽलिंगाः नियतं निश्चितं लिंगं येषां ते नियतलिंगा इत्युभयेषां नामा
र्थमात्रे उदाहरणं यथा उच्चैरिह पदत्वाद्विसर्गसिद्धिः किं चास्य प्रथमान्तत्वात् संग्रामउच्चैस्त्वं संग्रामउच्चैस्त इति विद्यमानपूर्वादिति सूत्रेण तेमे आदे

सायोर्विकल्पमिद्धिरपि फलं कृतः। अयंनीलकृष्णेऽनियतलिंगस्तथापि वासुदेवेनियतलिंगः ज्ञायतेतत्र ज्ञानंभावेल्युट् षारी। द्रोणआढकमित्यत्रापिनामार्थएवप्रथ
मा परिमाणार्थस्यनियतज्ञानात् द्रोणोव्रीहिरित्यत्रतु द्रोणपरिच्छिन्नाऽभिन्नोव्रीहिरित्यऽभेदान्वयः नामार्थयोरभेदान्वयस्यव्युत्पन्नत्वात् ननुएकोद्वौवहव इत्यत्र
नान्येवसंख्याया अभिधानात् प्रथमानस्यादुच्यते नकेवलाप्रकृतिः प्रयोक्तव्यानकेवलः प्रत्यय इतिनियमात्तु प्रथमोत्पत्तिर्वोध्या अनियतंलिंगंयेषांते अनि
यतलिंगास्तेषामनियतलिंगमेवेति लिंगमात्रं अधिकस्यभावआधिक्यंलिंगमात्रस्य आधिक्यंलिंगमात्राधिक्यं तस्मिन्नुदाहरणंवोध्यम् किंचभाष्यकारमते पंचकः
प्रातिपदिकार्थः स्वार्थ द्रव्य लिंग संख्या कारकात्मकइति यथादधिमधित्यादौविनापि विभक्तिं प्रातिपदिका देवतावतामर्थानांप्रतीतेः कैयटमते आदि
तश्चतुष्कं प्रातिपदिकार्थः वृत्तिकारमते आदितस्त्रिकं प्रातिपदिकार्थः॥ संख्याकर्मादयस्तु विभक्त्यर्थाइति आदितोद्विकंप्रातिपदिकार्थः इत्यन्ये लिंग

भोस् भगोस् अघोस् भवद्भगवद्घवतामचानिपात्याधो
भोहरे भगोनमस्ते अघोयाहि ॰ ॥ ❋ ॥ १ ॥

मात्रादिवाच्यमित्युक्तत्वात् तत्रस्वार्थोविशेषणं द्रव्यंविशेष्यं द्रव्यगुणक्रियासन्निधाने द्रव्यवाचकस्यैवप्राधान्यमित्युक्तत्वात् लिंगंस्त्रीत्वादि संख्याएकत्वादिः कारकं
कर्मादिः आमंत्रणेच संवोधनाधिक्ये प्रथमावचनं आवर्त्यतेप्रसन्नः क्रियते अनेनेतिकरणेल्युट् अनभिमुखोऽभिमुखः क्रियतेऽनेनेत्यभिमुखीकरणमनुकू
लव्यापारं तत्रप्रथमाभवति देवमांपाहीतिवाक्ये देव त्वं धिसंवोधनविषयोमत्कर्मकरक्षणक्रियतेवोधः संवोधनपदंयच्च तत्र क्रियायांविशेषणमित्यु
क्तत्वादिहसंवोधनं प्रकृत्यर्थप्रतिविशेष्यंक्रियांप्रतिविशेषणमिति भोस् भगोस् अघोस् भवत् भगवद् घवतांवानिपात्याधोधिविषये एषांस्थाने एते निपात्य
न्ते। हेभोः हेभवन् हेपूज्येत्यर्थः हेभगोः हेभगवन् हेज्ञानिन्नित्यर्थः हेअघोः हेऽघवन् हेपापिष्ठेत्यर्थः नुत्संहितानामेवनिपातनं कृतं भोसइत्सनेनवि सर्गे

कर्मणि घञ् प्रत्ययः प्रथमायाः शेषाः अन्याः षड्विभक्तयस्ताः।
सि॰ कौ॰ पू॰ शेषाः कार्य्यैककर्तृसाधनयोर्द्वन्पावेविश्लेषावधौसंबंध आधारभावयोः शिष्यंते इतिशेषाः कर्मणि घञ् प्रत्ययः प्रथमायाः शेषाः अन्याः षड्विभक्तयस्ताः
टी॰ स॰ कार्य्योद्दिषु षट्सु यथाक्रमं प्रवर्त्तंते इत्यर्थः॥ कार्य्ये द्वितीया क्रियते कर्त्रा स्वक्रियया निष्पाद्यते यत्तत्कार्यं धातूपात्त फलाश्रय इत्यर्थः तस्मिन्ननुक्ते कार्य्ये कर्म
८२ णि द्वितीया स्यात् उक्ते कर्मणि तु प्रथमैव उक्तत्वाख्यातकृत्तद्धितसमासनिपातैर्भवति आख्यातोक्ते हरिः सेव्यते कृदुक्ते लक्ष्म्या सेवितो हरिः तद्धितोक्ते शते
नक्रीतः शत्यः कारकाक्रियायुक्ते इति त्यः समासोक्ते प्राप्त आनंदो यं स प्राप्तानन्दः निपातोक्ते विषवृक्षोपि संवर्ध्य स्वयं छेत्तुमसांप्रतमिति कटं करोति का
रुकोरूपं पश्यति चाक्षुषः राज्यं प्राप्नोति धर्मिष्टः सोमंसुनोति सोमपाः १ अत्र सर्वत्राख्यातेनानुक्ते कर्मणि द्वितीया कारुकः पुमान् कटं करोति कटनिष्ठो

शेषाः कार्य्यैककर्तृसाधनयोर्द्वन्पावेविश्लेषावधौसम्बन्धाधारभावयोः द्वितीयाद्या विभक्तयएष्वर्थेषु भवन्ति॥

कार्य्यैककर्मकारके द्वितीया कटङ्करोति कारुकोरूपम्पश्यति चाक्षुषः राज्यम्प्राप्नोति धर्म्मिष्टः सोमंसुनोति सोमपाः॥

त्यस्यनुकूलाएककर्तृका वर्त्तमाना करोति क्रियेतिशाब्दबोधः चक्षुषा पश्यतीति चाक्षुषः पुमान् कारिकादिसण् रूपं पश्यति रूपनिष्ठसाक्षात्कारोत्पत्त्यनुकूला
एककर्तृका वर्त्तमाना दृशिक्रिया धर्मोऽस्यास्तीति धर्मी अस्त्यर्थे इनू अतिशयेन धर्मीति ईष्ठ प्रत्ययः धर्मिष्टः पुमान् राज्ञः कर्मेति राज्यं प्राप्नोति राज्यनिष्ठोत्पत्त्यनु
कूलाएककर्तृकावर्त्तमानाप्राप्नोतीति क्रिया सोमं पिबतीति सोमपाः॥ पुरुषः सोममम्रुत्तवल्लीं सुनोति खंडयतीत्यर्थः सोमनिष्ठखंडनोत्पत्त्यनुकूलाएककर्तृ पृ॰
कावर्त्तमाना सुनोति क्रियेति क्रियाप्रधानमाख्यातमिति सिद्धांतात् क्रियाविशेष्यकः शाब्दबोधः कर्त्तव्यः यास्कोप्याह भावप्रधानमाख्यातं सत्त्वप्रधानानि ८२
नामानीति पश्यमृगो धावतीत्यादौ तु मृग कर्तृक गमनं दृशिक्रियायां कर्मप्रधानं तु दृशिक्रियैव उक्तंच सुवंतं हि यथाऽनेकं तिङंतस्य विशेषणं तथा तिङंत

मप्याहु स्मिडंःतस्यविशेषणमिति १ ननुउक्तेकर्मणिप्रथमेत्युक्तं तेनपक्वमोदनंभुंक्ते इत्यत्रद्वितीयानस्यात् कृत्प्रत्ययेनकर्मणउक्तत्वात् उच्यते इहहिप
चिभुजिनिरूपितेद्विकर्मत्वशक्तौतत्रप्रधानीभूतभुजिक्रियानिरूपितामनुक्तांशक्तिमादायद्वितीयोत्पत्तिर्भव तीति उक्तंचहरिणा प्रधानेतरयो
र्यत्रद्रव्यस्यक्रिययोःपृथक् शक्तिर्गुणाश्रयातत्रप्रधानमनुरुध्यते १ प्रधानविषयाशक्तिःप्रत्ययेनाभिधीयते यदागुणेतदातद्वदनुक्तापिप्रतीय
ते २ अतएवपक्वौदनोभुज्यतेदेवदत्तेनेत्यत्रभुजिप्रत्ययेनउक्तेकर्मणिप्रथमैवभवति पचेरप्राधान्यात् अथप्रसंगात्पाणिनिसूत्राणिलिख्यंते ॥ ॥
अकथितंच अपादानादिविशेषैरनुक्तंकारकंकर्मसंज्ञंस्यात् दुहयाचपचदंडरुधिप्रच्छिचि ब्रूशासुजिमंथमुषांकर्मयुक्स्यादकथितं तथास्यान्नीहृ
कृषवहां १ दुहादीनांद्वादशानांतथानीप्रभृतीनांचचतुर्णांकर्मणायद्युज्यते तदेवाकथितं कर्मज्ञेयम् कर्मणायुज्यते इतिकर्मयुक् किंवंतम् मुख्यक
र्मणासहक्रिययासंबंधमानमपादानादिविशेषैरकथितं यत्कारकंतत्कर्मसंज्ञकंभवतीत्यर्थः ॥ एतेनदुहादीनांद्विकर्मकत्वमुक्तम् दुहप्रपूरणे ॥
गांदोग्धिपयः सइत्यत्र पयःकर्मकंगोसंबंधिदोहनमर्थः पयोत्रमुख्यकर्मधात्वर्थफलाश्रयत्वात् गौस्तुपयसोनिमित्ततामात्रेणोपात्तानत्वःवधिभा
वेनेत्यपादानसंज्ञाया अप्राप्तेरनेनकर्मसंज्ञा विवक्षायांत्वपादानादिसंज्ञाभवत्येवविवक्षातः । कारकविभक्तयोनानाभवंतीतिशाब्दिकाइत्युक्तत्वात्
गांदुग्धिपयः सइति टुयाचृ याच्ञायाम् बलिंयाचतेवसुधांहरिः अत्रमार्यनार्थस्ययाचतेर्वसुधामुख्यंकर्मतेनकर्मणायुक्तोबलिः तस्यापादानत्वावि
वक्षायामनेनकर्मसंज्ञा अपादानविवक्षायांतुबलेर्याचतेवसुधामिति । अविनीतंविनयंयाचतेसः । अविनीतंविनयायाऽनुनयतीत्यर्थः । अविनीतमितिमु
कौटश्च तस्मा च कौटतक्षः अतेः शुनः तत्पुरुषे श्वानमतिक्रांतो जवेनेत्यः तिश्वो वराहः अतिश्वी सेवनी चेत्यर्थः अप्राणिविषयकोपमानवाचिनः शुन स्तत्पुरुषे आकृष्यतेऽनेन खलादिगतधान्यमित्याकर्षः काष्ठविशेषः आकर्षः श्वेवेति आकर्षश्वः अप्राणिविषयकेति किं वानरः श्वेवेति वानरश्वा ० उत्तरमृगपूर्वोपमानात् सक्थ्नः तत्पुरुषे उत्तरसक्थं मृगसक्थं पूर्वसक्थं फलकमिव सक्थि फलकसक्थं नौशब्दांतात् द्विगोष्टो न तु तद्धितलुकि । द्विनावं त्रिनावं न तु तद्धितलुकीति किं पंचभिर्नौभिः क्रीत इति पंचनौः अत्र क्रीतार्थे इकस्तस्य लुक् च अर्द्धपूर्वान्नावस्तत्पुरुषे नावोऽर्द्धमित्यर्द्धनावं क्लीवत्वं लोकात् खारीशब्दांतात् द्विगोरर्द्धपूर्वात् खार्यंतात् तत्पुरुषाच्च वा टः द्विखारं टाभावे द्विखारि क्लीवत्वं लोकात् अर्द्धखारं द्वंद्वतत्पुरुषयोरिति परवल्लिंगे अर्द्धखारी द्विगो द्वित्रिभ्यामंजले ष्टो वा न तु तद्धितलुकि द्व्यंजलं द्व्यंजलि न तु तद्धितलु कीति किम् ॥ द्वाभ्यामंजलिभ्यां क्रीत इति द्व्यंजलिः क्रीतार्थे इकस्तस्य लुक् च ब्रह्मशब्दांतात् तत्पुरुषात् टो जानपदेऽर्थे सुराष्ट्रे ब्रह्मा सुराष्ट्रब्रह्मः कुमहद्भ्यां ब्रह्मणष्टो वा तत्पुरुषे कर्मधारये । कुत्सितो ब्रह्मा कुब्रह्मः कुब्रह्मा महाब्रह्मः महाब्रह्मा । ब्राह्मणपर्यायो ब्रह्मन् शब्दः संख्यांतात् तत्पुरुषात् डः निर्गतानि त्रिंशत इति निस्त्रिंशानि वर्षाणि चैत्रस्य निर्गतस्त्रिंशतोऽंगुलिभ्य इति निस्त्रिंशः खड्गः ॥ इति द्विगुतत्पुरुषकर्मधारयसमासांताः ॥ अथ सकलसमाससाधारणसमासांताः ॥ ऋक्पूरब्धूःपथामानक्षे या धूर्यामनुन ऋचोऽर्द्धमिति अर्द्धर्चः अर्द्धर्चादय इति पुंस्त्वं अनृचबह्वृचशब्दाद्ध्येत्तर्येव नेह अनृक्कं साम बह्वृक्कं सूक्तं वैकल्पिकः कप्रत्ययस्तु भवत्येव अनृचः बह्वृक्कमिति विमलाः पूरिति विमलपुरं क्लीवत्वं लोकात् विमलापं सरः ॥ द्व्यंतरुपसर्गेभ्यः कृतसमासांतस्याऽपस्यादेरीः द्विर्गता आपो यस्मिन्निति द्वीपं अंतर्गता आपोऽस्मिन्निति अंतरीपं प्रतिकूला आपोऽस्मिन्निति प्रतीपं संगता आपोऽस्मिन्निति समीपं कथं तर्हि समापो देवयजनमिति समा आपो यस्मिन्निति समापः देवा इज्यंते अस्मिन्निति देवयजनं यज्ञभूमिरिति ज्ञेयं कृतसमासांतग्रहणान्नेह स्वपूरः पूजनार्थेति निषेधात् समासांताऽभावः अ[illegible]पसर्गात् कृतसमासांतस्याऽपस्यादेरी वा प्रेपं परेयं प्रापं परापं अनोः कृतसमासांतस्यापस्यादेरूः अनुगता आपोऽस्मिन्निति अनूपो

सि॰कौ॰पू॰ देशः। विलोममनूपमप्सा [illegible] ति हितेयेस्वरेव [illegible] रः॥ अक्षेद्द्युतिः किं। अक्षधूः। दृढधूः स्सः। सखिपयोरम्यपयो देशः। अस्य। अन्ववपूर्वाभ्यां सामलोमभ्यामः। प्रति
टी॰सु॰ सामः। अनुसामं अवसामं [illegible] प्रतिलोममनुलोमं [illegible] अवलोमं बहुव्रीह्यव्ययीभावप्रादिसमासाः। अत्र कृष्णोदकपांडुसंख्यापूर्वायाभूमेरः। कृष्णभूमः।
११० उदक्वत्सीचाभूम [illegible] माद्दः। बहुव्रीहावेत। संख्यायानदीगोदावरीभ्यामः। पंचनदं सप्तगोदावरं। अव्ययीभावेऽएतौ नाभेः। पद्मना
भावस्येति पद्मनाभः [illegible] वा वृक्षनाभः। अवसमंधेभ्यस्तमसः। प्रत्ययः। गवां किरणानां नाभिरं भूमिवेति गवाक्षः। ब्रह्महस्तिपल्यराजभ्यो वर्चसोऽ
प्रत्ययः। ब्रह्मवर्चसं हस्तिवर्चसं पल्यं आसमर्हतीति पल्योमांसभोजी पल्यवर्चसं राजवर्चसं षष्ठीतत्पुरुषोऽयं। अवसमंधेभ्यस्तमसोऽप्रत्ययः। अवही
नं तमः इति। अवतमसं संततमं तमः इति संतमसं। अंधयतीति अंधं। अंधदृक्षुपघाते चुरादिः समासश्चाच्यप्रत्ययः। अंधं गाढं तमः इत्यंधतमसं। श्वसः
शब्दाहसीयः। श्रेयोभ्यामः। वसुशब्दः प्रशस्तवाचीतस्मादीयसुप्रत्ययेवसीयः इति। श्वस्शब्दस्तु कालवाच्यप्यत्राशीर्विषयतायाद्योतकोऽस्ति श्वोव
सीयसं श्वः श्रेयसं कल्याणमित्यर्थः। अन्ववतप्तेभ्यो रहः शब्दादः। रहः इत्यनेनाऽप्रकाशमुच्यते। अनुगतं रहः इत्यनुरहसं। अवहीनं रहः इत्यवरहसं। अ
नुगतं रहः अस्मिन्नित्यादि बहुव्रीहिर्वा। तप्तं च तद्रहश्चेति तप्तरहसं। परेणानधिगम्यमित्यर्थः॥ प्रतेरुरसः शब्दादः। उरसि इति प्रत्युरसं। सप्तम्यर्थेऽअ
व्ययीभावोऽयं। अप्रत्ययांतमनुगवं दीर्घत्वे निपात्यते। अनुगवं यानं गोर्दैर्घ्यसदृशदैर्घ्योपलक्षितमित्यर्थः। उपसर्गादध्वशब्दादः। प्रगतोऽध्वान
मिति प्राध्वो रथः। अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तं
दिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः। अप्रत्ययांतानि निपात्यंते
अविद्यमानानि चत्वार्यस्येति अचतुरः। विचतुरः। सुचतुरः। त्रयश्चत्वारो वेति त्रिचतुराः। चतुर्णां समीपे ये संति ते उपचतुराः। एते पंच बहुव्रीहयस्तेन तत् स॰
पुरुषे अचत्वारो विचत्वार इत्येवं भवतीति भावः। स्त्रीपुंसौ धेन्वनडुहौ ऋक्सामे वाङ्मनसे अक्षिणी च भ्रुवौ च अक्षिभ्रुवं प्राण्यंगत्वादेकवद्भावः॥ ११०

दारास्त्वगावस्त्वदारागवं॥ऊरूच अष्ठीवंतौ चऊर्वष्ठीवं निपातनाट्टिलोपः जानूरुपर्वाःष्ठीवदःस्त्रियामित्यमरः सक्थिक्लीवेपुमानूरुरितिचामरः
पदष्ठीवं निपातनात् पादस्य पदभावः एभ्यगत्वादेकवद्भयत्र नक्तं दिवा च नक्तंदिवं रात्रौ च दिवा च रात्रिंदिवं रात्रेर्मांतत्वं निपातनात्। अहनि च
दिवा चेति अहर्दिवं वीप्सायां द्वंद्वो निपात्यते अहन्यहनीत्यर्थः। एते एकादश द्वंद्वाः॥ रजः अपि अपरित्यज्येति सरजसं साकल्येऽव्ययीभावो
यं बहुव्रीहौ तु रजसा सह वर्त्तते इति। सरजस्कः पंकजमिति निश्चितं श्रेय इति निः श्रेयसं तत्पुरुष एवायं बहुव्रीहौ तु न निश्चितं श्रेयो येनेति निः
श्रेयान् पुरुषः पुरुषस्यायुः पुरुषायुषं तत्पुरुषोऽयं द्व्यायुषं त्र्यायुषं एतौ द्विगू ऋग्यजुषं द्वंद्वोऽयं जातोक्षः महोक्षः वृद्धोक्षः एते त्रयः कर्म
धारयः शुनः समीपं उपशुनं टिलोपाऽभावः संप्रसारणं च निपात्यते अव्ययीभावे गोष्ठे श्वेति गोष्ठश्वः सप्तमीतत्पुरुष एवायं षष्ठीतत्पुरुषे तु न गो
श्वा पूजनार्थस्वतिपूर्वकाच्चाम्नः समासांतान बहुव्रीहौ तु भवंति सुराजा अतिराजा पूजनार्थेति किं ग्राममतिक्रांतोऽतिगवः बहुव्रीहौ किं॥
सुसक्थः सुष्ठु सक्थिनी यस्य सः सुष्ठु अक्षिणी यस्य सः स्वक्षः टप्रत्ययो अत्र निंदार्थके किम्। पूर्वान्नाम्नः समासांतान कुत्सितो राजा किंराजा
किंसखा किंगौः निंदार्थकेति किं किंराजः किंसखः किंगवः नञ्तत्पुरुषात्समासांतान न अराजा असखा तत्पुरुषात् किं न विद्यते धूर्यस्य
तत् अधुरं शकटं नञ्पूर्वात् पथिशब्दात् समासांतस्तत्पुरुषे अपथं अपथाः अपथं तत्पुरुषः क्लीबमिति क्लीबत्वं तत्पुरुषे किं अपथो देशः॥
[illegible] पूर्वौ [illegible] भावोऽयम्॥ इति सकलसमाससाधारणाः प्रत्ययाः॥ अथ प्रकृतमनुसरामः॥ अह्नो मध्यमिति मध्या
ह्नः अह्नः पूर्वं इति पू[illegible] वजपावक [illegible] राजः कृष्णस्य सखेति कृष्णसखः राजाहःसखिभ्यष्टच् इति टप्रत्ययः॥ ॥ श्री॥ ॥
[illegible] भाषायां [illegible] वः

नोवा नांतस्य समासान्त टेर्लो [illegible] अ[illegible]समासांतास्तद्धितांतभूताज्ञेया: अत्रवेतिग्रवस्यार्थेनेनक्वचिट्टिलोप: क्वचिदुपधालोप: क्वचिन्नोभयं
टिलोपोयथा उडुलोमा [illegible] तद्धितेयस्वरेव [illegible] राज्ञःकर्मेतिराज्यकविराजः उपधालोपोयथा हन्त घ्नो पस्यंवार्द्धघ्नः तस्णोऽपत्यंतास्ण: अहः पूर्वं
पूर्वाह्णः नोभयं [illegible] पसामितिपूर्वाह्णो [illegible] इत्यादिदेवानांगोर्देवगवीपरमाचासौगौश्चपरमगवी गोंताद्टच्तत्पुरुषकर्मधारयात् टः इतिटः॥
राजधुर एकधुर [illegible] धुरणधारयेपुंवत् ऋक्पूरब्धूः पथामइत्यःप्रत्यय: वाक्चमनश्चवाङ्मनसं अचतुरविचतुरेत्यनेनाप्रत्ययोहृद्दक्षि
णापथः ऋक्पूरब्धूः पथामइत्यःप्रत्ययः अहस्सर्वेकदेश अहोरात्रः अहः पूर्वात् द्वात्रिंशद्वादः समाहारे इत्प्रत्ययः रात्राहाहांतात्इतिपुंस्त्वं॰

नोवानान्तस्यटेर्लोपसरस्वरे यकारेचपरे वाग्रहणात्क्वचिन्न क्वचिदुपधालोपः कविराजः कृत्स्नस्व: देवगवीपरम
गवः राजधुरम् एकधुरम् सर्वधुरम् वाङ्मनसे दक्षिणापथः अहोरात्रः द्वित्राः पञ्चषाः बहुकर्तृकः बहुलक्ष्मीकः॥
स्त्रीपुंसौ ऋक्सामे महोक्षः वृद्धोक्षः द्व्यायुषम् त्र्यायुषम् ग्रामतक्षः फलकसक्थम् मृगसक्थम् पूर्वसक्थम्

द्वौवात्रयोवाद्वित्राः पंचवाषट्वापंचषाः संख्येयेबहुव्रीहेर्डः इतिडः बहुकर्तृकः बहुलक्ष्मीकः॥ ॥ अर्द्धखारम्॰ अर्द्धनावम्॰ ॥
ईयूदंतस्त्रीलिंगोत्तरपदादृदंतोत्तरपदाच्चबहुव्रीहेः कइतिकः प्रत्ययः स्त्रीपुंसौ ऋक्सामे अचतुरविचतुरेत्यनेनद्वंद्वेऽप्रत्ययः महोक्षः जातो राम॰
क्षः वृद्धोक्षः अचतुरविचतुरेत्यनेनकर्मधारयेऽप्रत्ययः पुरुषायुषं अचतुरविचतुरेत्यनेनतत्पुरुषेऽप्रत्ययः द्व्यायुषं त्र्यायुषं अचतुरेत्यनेनद्विगा १११
वप्रत्ययः ग्रामतक्षः ग्रामकौटाभ्यांतक्ष्णष्टइतितत्पुरुषेटः फलकसक्थः मृगसक्थः पूर्वसक्थः उत्तरमृगपूर्वोपमानात् सक्थ्नष्टस्तत्पुरुषे
इतिट प्रत्ययः।फलकमिवसक्थि अस्येति बहुव्रीहौतुस्वांगवाचिसक्थ्यक्ष्णोःस्वांगात्षच्बहुव्रीहेष इतिटप्रत्ययोबाध्यः अर्द्धखारं खारीशब्दांताद्द्विगो

स्हे पूर्वोत्तवार्येतान्नतु रुषाचुवादइतिटः अर्द्दनावं स्मृर्द्दपूर्वोन्नावष्टस्तनुरुषइतिटः॥ ॥कर्मधारयस्तुल्यार्थेसमस्यमानयोर्द्वयोः पदयो विशेष
णविशेष्यधर्मयोर्येन परस्परतुल्यार्थेनातेनैवसमासोभवतिनान्यत्रभ्रमरादिसाधारणरूपेणप्रतिपन्नोनीलार्थः उत्पलार्थेनोत्पलेस्याप्यतेरक्ता
दिसाधारणरूपेणप्रतिपन्नउत्पलार्थोपिनीलार्थेननीलेस्याप्येत इतिभवतिद्वयोस्तुल्यार्थत्वापदयोर्द्वयंपदद्वयं तस्मिन् एकस्मिन्नर्थेनिश्चा
वृत्तिर्यस्यभिन्नप्रवृत्तिनिमित्तकस्यपदद्वयस्य तदेकार्थनिष्ठं तस्मिन्नुसतियएकार्थीभावः सकर्मधारयसंज्ञकः समासोभवतिभिन्नार्थोनामे
करूपेणैकत्रान्वयविवक्षायांद्वद्वः भिन्नार्थयोर्विशेष्यविशेषणभावेनैकत्रान्वयविवक्षायांकर्मधारयइत्यर्थः विशेष्यतेऽनेनेतिविशेषणं
शिष्ठ्र विशेषणेकरणेयुद्भेदकंव्यावर्तकमितियत्साधारणाकारेणप्रतिपन्नंवहुप्रकारं वस्तुप्रकारान्तरेभ्योव्यवच्छिद्यएकस्मिन्प्रकारेव्यवस्था
॥ ॥कर्मधारयस्तुल्यार्थे॥पदद्वयतुल्यार्थेएकार्थनिष्ठेसतिकर्मधारयस्समासोभवति॥ ॥
पयतितद्विशेषणंव्यवस्थाप्यमानंतुविशेष्यंभेद्यंप्रधानमिति॥अत्रलौकिकविग्रहेभेदद्योतकश्चशब्दोधर्मभेदद्योतनायप्रयुज्यतेधर्मभेदवोधना
[illegible]द्रव्यगुणक्रियासन्निधानेद्रव्यवाचकस्यैवप्राधान्यमित्यतोद्रव्यस्यप्राधान्यात्गुणक्रिययोश्चाप्राधान्याद्गुणद्रव्ययोः क्रियाद्रव्ययो
[illegible]व पूर्वंनिपातोवाधः॥यत्रतुगुणशब्दयोः क्रियाशब्दयोर्गुणक्रियाशब्दयोर्वासमासस्तत्रानियमएववंदनकुब्जःकुब्जखंजः
पाचकखंजकः [illegible] खंजपाचकः [illegible] पाचकखंजः॥द्रव्यशब्दयोरुपनिपातेतुननियमः॥शिंशपावृक्षः॥इहवृक्षत्वस्यव्यापकत्वात्प्राधान्यं
शिंशपात्व[illegible] विपर्ययात्प्राधान्यं [illegible] विशेषणस्यपूर्वनिपातोवाध्यः हस्तादिरितिनिर्देशाद्विशेष्यस्यापिपूर्वनिपातस्स्यात्॥ ॥ः॥ ॥

सि॰चं॰पू॰ कर्म ... पुंवत् स्त्रीलिंगस्य तत्पुरुष पूर्वपदं पुंवद्भवतिकर्म्मधारयेपूरणार्थप्रत्ययांतेप्रियादौचनेत्यप्राप्तः पुंवद्भावोविधीयते महतीचासौनवमीचेति
दी॰सु॰ पंचम्यां तेमहत्पुंवद्भावेऽन्तेसहादेरित्यात्त्वमहानवमी महाप्रियातथा ॥ कतद्धिताभ्यांकोपधस्येनेति १ संज्ञापूरणार्थप्रत्ययोर्नेति २ वृद्धिहे।
११२ ... हिनस्या॰रक्तविकारार्थस्यनेति ३ स्वांगादीपोऽमानिनीति ४ जातिवाचिनः स्त्रीप्रत्ययांतस्यनेति ५ पंचस्वप्राप्तिनिषिद्धः पुंवद्भावोप्यत्र
विधीयते क्रमेणोदाहरणानियथापाचकस्त्रीदत्तभार्या पंचमभार्या सुघ्नभवास्तौघ्नी भवार्थे॥तास्तौघ्नीचासौभार्याचस्तौघ्नभार्या सुकेशभार्या।
ब्राह्मणभार्या रक्ताचासौलताचरक्तलता पुमांश्चासौकोकिलश्च पुंस्कोकिलः ब्राह्मणीचासौभार्याचब्राह्मणभार्या दत्ताचासौभार्याचदत्तभार्या॰

कर्म्मधारयेपूर्वमुत्तम्। नीलमुत्पलम्। नीलोत्पलम्। रक्तलता। पुंस्कोकिलः। ब्राह्मणभार्य्या। दत्तभार्य्या। सुकेशभा १६

र्य्या। स्नातानुलिप्तः। एकनाथः। सर्वयाज्ञिकाः। जरन्नैयायिकाः। पुराणमीमांसकाः। नवपाठकाः। केवलवैयाक-

सुकेशीचासौभार्याचसुकेशभार्या पूर्वं स्नातः पश्चादनुलिप्तः स्नातानुलिप्तः एकश्चासौनाथश्चैकनाथः दिक्संख्येइतिनियमबाधनार्थमुदाह
रणंयज्ञमधीयते विदंतिवातेयाज्ञिकाः इकप्रत्ययः सर्वेचतेयाज्ञिकाश्चसर्वयाज्ञिकाः जरंतश्चतेनैयायिकाश्चेति जीर्यतेरतृ इतिभूतेर्थेऽतृ।
न्यायमधीयतेविदंतिवातेनैयायिकाः जरन्नैयायिकाजीर्णनैयायिकाइत्यर्थः॥युद्वृद्धिश्चमीमांसामधीयते विदंतिवातेमीमांसकाः केनेयका
इतिकप्रत्ययेहस्वत्वंपुराणाश्चतेमीमांसकाश्चपुराणमीमांसकाः पठंतिपाठकाः॥ण्वुणाविति वुण्नवशब्दः।संख्यावाच्यत्रनगृह्यतेदिक्संख्येइ
तिनियमात् नवाश्च तेपाठकाश्च नवपाठकाः व्याकरणमधीयते विदंतिवावैयाकरणाः अणयुद्वृद्धिश्चकेवलाश्चते वैयाकरणाश्चकेवलवैया

॥ ॥ करणाः ॥ इतिकर्मधारयः॥ ॥

नाम्नश्च कृता समासः। पुनस्तत्पुरुषमाह। स्यादिति। तस्य नाम्नः। कृता कृत्प्रत्ययान्तेन सह योऽन्वयः स च पुनः प्रादेः कृता योऽन्वर्थः स तत्पुरुषसंज्ञः स्यात् व्याजिघ्रतीति व्या
घ्रः। उपसर्गे आदंतादिति कः। घ्रशब्देन प्रादेः समासः कच्छेन पिबतीति कच्छपः नाम्नीचेति डः कच्छेनेति नाम्नः कृदंतेन समासः कुंभं करोतीति कुंभकारः कार्ये
ऽणिति अण्प्रत्ययः इह कुंभ ङस् कार इत्यलौकिकं प्रक्रियावाक्यं अमिति तु नोक्तं कृद्योगे षष्ठीविधानात् उपपदसमासः कृता समासः शाकपार्थिवादीनां मध्य
पदलोपः। पृथिव्या ईश्वरः पार्थिवः ईश्वरेऽर्थेऽण् शाकः प्रियो यस्य स शाकप्रिय इत्यस्य पार्थिवशब्देन समासे कृते प्रिय इति मध्यपदस्य लोपः शाकपार्थिवः

नाम्नश्च कृता समासः। प्रादेरुपसर्गस्य नाम्नश्च कृदन्तेन सह तत्पुरुषसमासो भवति। व्याघ्रः। कच्छपः। कुम्भकारः। शाक
पार्थिवादीनां मध्यमपदलोपः। शाकप्रियः पार्थिवः शाकपार्थिवः। देवपूजको ब्राह्मणो देवब्राह्मणः। सहादेः सादिः।
समासे सति सहादेः सादिरादेशः। सह पुत्रेण सपुत्रः। सहाञ्चतीति सध्र्यङ्। समञ्चतीति सम्यङ्। तिरोऽञ्चतीति तिर्यङ्।

बहुव्रीहिगर्भः कर्मधारयः देवानां पूजक इति षष्ठीतत्पुरुषः। तस्य ब्राह्मणशब्देन कर्मधारये पूजक इति॥ ॥ विष्वद्र्यङ्। देवद्र्यङ्॥ ॥ ॥
[illegible]पदस्य लोपः देवब्राह्मणः। सहादेः सादिः। अन्तेताः सहादयः। सहादयश्च प्रयोगानुसारेण बोध्याः। बहुव्रीहिश्च यवस्य महस्य सो वा यथा पुत्रेण सहेति
[illegible]। सहपुत्रो वा। बहुव्रीहिरयं सहाञ्चतीति सहस्य सध्रि आदेशः क्विबंते ञ्चतौ परे सध्र्यङ् सम्यगंचतीति संशब्दस्य समि आदेशः क्विबंतेऽञ्चतौ परे
सम[illegible]ञ्चतीति तिर[illegible]स्य तिरि आदेशः क्विबंते ञ्चतौ तिर्यङ्। विष्वगंचतीति विष्वग्देवयोरद्र्यादेशः क्विबंतेऽञ्चतौ विष्वद्र्यङ्। देवानंच
तीति[illegible]। [illegible]बोध्याः॥ ॥ ॥ ॥

लक्ष्मी[illegible] जाया[illegible] लक्ष्मीजानिः ॥ कुत्सितमन्नमिति कुशब्दस्य कत्स्वरादावुत्तरपदे तत्पुरुषे कदन्नं त्रिवदरथतृणेषु कुशब्दस्य
का॰कु॰ [illegible] जात्वयद्गतिक[illegible] कद्रथः । कद्वदः । कत्तृणं । ईषदर्थे कुशब्दस्य का पथ्यक्षयोः परयोश्च । ईषज्जलं काजलं । कुत्सितः पंथा इति ऋक्पूरि
त्यः अत्ययः संख्याव्ययाद्यमिति लीनता । कापथः कास्सः । अक्षशब्देन तत्पुरुषोऽस्मि शब्देन बहुव्रीहिर्वा समासः । उक्तो कुशब्दस्य का कव कदादेशः ॥
ईषदर्थे कोष्णं कवोष्णं कदुष्णं । द्यौश्च भूमिश्चेति देवताद्वन्द्वे दिवशब्दस्य द्यावा द्यावाभूमी पृथिवीशब्दे दिवुशब्दस्य द्यावा दिवश्च द्यावापृथिव्यौ दिवसः

लक्ष्मीर्जाया यस्य स लक्ष्मीजानिः । कुत्सितमन्नं कदन्नम् । ईषदुष्णम् । कोष्णम् । कवोष्णम् । कदुष्णं । द्यौश्च भूमिश्च द्यावा
भूमी । जाया च पतिश्च जम्पती । दम्पती । मातरपितरौ । कुपुरुषः । कापुरुषः ॥ षट् च दश च षोडश । षट् दन्ता यस्य षोडन् ॥
षष उत्वं दतृदशधासूत्तरपदादेष्टुत्वम् ॥ संख्याया अः प्रकारे धा । षट् प्रकाराः षोढा । षट्धा । महान् ईश्वरो महेश्वरः ॥ ॥

पृथिव्यौ । जाया च पतिश्चेति । जायाया जंदं वा द्वन्द्वे जंपती ॥ दंपती । जंदं शब्दावव्ययौ दारवचनौ तयोः पत्या सह द्वन्द्वे जंपती ॥ दंपती इति चोक्ताः दाराः पुंसि बहुत्वे च दं
कलत्रे च नपुंसकमित्यमरमालापत्त्या जंदमलिंगत्वे इति नामप्रपंचः ॥ माता च पिता चेति मातुररङ् द्वन्द्वे मातरपितरौ । पुरुषे कुशब्दस्य वा च का कुपुरुषः कापुरुषः
षट् च दश चेति दतृदशधासु परस्य षष उत्वं परस्य ष्टुत्वं च धाप्रत्यये वा षोडश । षोडा । षट्धा । षट्प्रकाराः अस्येति प्रकारे धा इति धाप्रत्ययः । षट् दन्ता अस्येति
संख्यासुपूर्वस्य दन्तस्य दतृ वयसि योगे विभाषा तौ नुमिति नुम् षोडन् सुदन् स्त्रियां तु ङीप् इति ङीप् सुदती । महांश्चासौ ईश्वरश्चेति महत आकारो नादेशः समा

॥ नाधिकरणे उत्तरपदे जातीये च ॥ महेश्वरः ॥

॥ महादेवः ॥ समानाधिकरणे किं महती सेवा महत्सेवा महान्प्रकारो महाजातीयः खरा नासिकायस्येति खुरवन्नासिकायस्येति च नासिकायानस् बहुव्री
हावच्प्रत्यये खुरखराभ्यां नासिकायानसः अप्रत्ययश्च वा खरणाः अप्रत्ययः पुंवद्देति पुंवत् । अत्वसोः सावितिदीर्घे खरणाः खुरणास अप्रत्ययः खुरणाः
उन्नतानासिकास्येति उन्नसः अप्रत्ययः प्रगता नासिकास्येति प्रणसः अप्रत्ययः वेर्नासिकायाः ग्रख्यौ विगता नासिकास्येति विग्नः । विख्यः वेः खुरव

महादेवः खरानासिकायस्य स खरणाः खरणाः खुरणाः
खुरणाः उन्नतानासिकायस्य स उन्नसः प्रणसः विगतानासि
कायस्य स विग्नः विख्यः चतस्रोऽश्रयो यस्य स चतुरस्रः प्रोष्ठे गौ
स्तस्येव पादा यस्य स प्रोष्ठपदः प्रगते जानुनी यस्य प्रज्ञुः संज्ञुः ऊर्द्ध्वज्ञुः

नाइ[illegible]यनस्त[illegible]खुर्विख्यो विग्न इति रूपत्रयं च खरणाः स्यात् खरणसो विग्नो विखुर्विनासिकः इति रभसः चतस्रोऽश्रयोऽस्येति तालव्य स्या
न्नेदं[illegible]स्येति चतुरस्रः [illegible]प्रोष्ठो गौस्तस्येव पादावस्येति पादस्य पद निपात्यते अप्रत्ययः प्रोष्ठपदः । प्रसमभ्यां जानुशब्दस्य ज्ञुरादेशः च
वा बहु[illegible] ॥ ऊर्द्ध्वजानुः । शृङ्गस्य विकारः शार्ङ्गं । अण् शार्ङ्गं । धनुरस्येति धनुः तस्य बहुव्रीहेरनङ् ।

संज्ञायां चेवा शार्ङ्ग धन्वा [illegible] यां [illegible] बहुव्रीहाव[illegible]नु ॥ उत्पूतिसुसुरभिभ्यः गुणवाचिनो गंधस्येकारांतादेशो बहुव्रीहौ उद्गंधिः पूतिगंधिः सुगंधिः सुरभिगं
धिः गुणवाचिन इति किं ॥ शोभना गंधा द्रव्याण्यस्य सुगंध आपणिकः अल्पवाचिनो गंधस्येत्त्वं बहुव्रीहौ सूपस्य गंधो लेशो यस्मिन् तत् सूपगंधि भोजनं मं॰
चूर्णगंधि उपमानाद्गंधस्येकारांतादेशः ॥ पद्मस्येव गंधोऽस्य पद्मगंधिः ॥ गंधस्तु सौरभे न्ना गंधके गर्वलेशयोः ॥ स एव द्रव्यवचनो बहुत्वे पुंसि च स्मृत इति
हृदंतावयवस्यतिर्नल्यात् पूर्वस्येति दत् हृदन् चतुर्दन् अमुमंचतीति अदस अचु इति स्थिते विष्वग्गिति टेरद्रिः अदद्रि अचु इत्यत्र यत्वम् अदसोसेर्दादु

ऊहृद्दानुः ऊहोद्दानुः बहुव्रीहौ धनुषोऽनङ् अधिज्यधन्वा शार्ङ्गं धनुरस्य शार्ङ्गधन्वा उद्गन्धिः सुगंधिः पूतिगंधिः ॥
सुरभिगंधिः हृदन् चतुर्दन् अमुमञ्चतीति अमुमुयङ् अदमुयङ् अदद्र्यङ् कौमुदगंध्यायाः पुत्रः कौमुदगंधीपुत्रः ॥ कौ
मुदगंधीपतिः ॥ समानं ज्योतिरस्य सज्योतिः सनाभिः ॥ ॥ ॐ दोम ॥ इत्यनेन दाभ्यां परयोरकारस्कारयोरुकारौ दकारयोश्च मकारो अ
मुमुयङ् ॥ अन्त्यबाधेऽन्त्यसदेशस्यादेश इति वदतां मते परस्कारस्कारस्यैव मुत्वं ॥ अदमुयङ् ॥ यदा द्यत्वे एव मुत्वं नान्यत्रेति पक्षः अदद्र्यङ् कुमुदस्येव गं
धो यस्येति उपमानाद्गंधस्येकारादेश इति कुमुदगंधिः ॥ कुमुदगंधेरपत्यं स्त्री कौमुदगंध्या ॥ अपत्ये ण्यः कौमुदगंध्यायाः पुत्र इति ॥ कौमुदगंध्यायाः प॥
तिरिति या इत्यस्य स्थाने ईत्वं निपात्यते कौमुदगंधीपुत्रः ॥ कौमुदगंधीपतिः ॥ समानं ज्योतिरस्येति ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयो
वचनबंधुतीर्थब्रह्मचारिषु समानस्य सः सज्योतिः सनाभिः ॥ ॥ ॥

सनामा सवयाः ब्रह्मवेदः तदध्ययनार्थं व्रतमपि ब्रह्म ब्रह्म चरतीति ब्रह्मचारी व्रते इति णिनिः समानः ब्रह्मचारी तिसब्रह्मचारी समानेतीर्थे वसतीति
सतीर्थ्यः वसत्यर्थे यत्प्रत्ययः । उत्तरपदोदकस्योदः । क्षीरोदः । सुरोदः । लवणोदः । शुद्धोदः । एषतः । उदरमिति नलोपः । एषोदरं वारिणो वाहक इति ।
पूर्वपदस्य वः उत्तरपदादेश्च लत्वं वलाहकः । गूढोत्मा अत्राकारस्य स्थाने उत्वं । भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात् गूढोत्मा वर्णविकृ
तेर्वर्णनाशात्पृषोदरे १ हंतेः पचादित्वादच्प्रत्यये समागमात् हंस इति हिंसेः पचादित्वादच्प्रत्यये हकारसकारयोः । व्यत्ययात् सिंह इति ० ॥
दिक्शब्देभ्यस्तीरस्य तारो वा सर्वादेः समासाद्वा विति पुंवत् ॥ दक्षिणतारं दक्षिणतीरमित्यादि अलुक् क्वचित् समासप्रत्यययोरित्यस्यापवादः ॥

सनामा सवयाः सब्रह्मचारी सतीर्थ्यः क्षीरोदः सुरोदः लवणोदः शुद्धोदः एषोदरः वारिवाहको वलाहकः गूढो
त्मा दक्षिणतीरम् दक्षिणतारम् इत्यादि अलुक् क्वचित् क्वचित्समासे तद्धिते च विभक्तेरलुक् कृच्छ्रान्मुक्तः
स्तोकान्मुक्तः दूरान्मुक्तः निकटान्मुक्तः अप्सुयोनिः सरसिजम् ॥ ० ॥ श्रीरामायनमोनमः ॥ ० ॥

कृच्छ्रस्तोकदूरार्थनिकटार्थेभ्यः पंचम्या अलुक् उत्तरपदे कृच्छ्रान्मुक्तः । स्यात्कष्टं कृच्छ्रमाभीलमित्यमरः ॥ उत्तरपदे किं निः क्रान्तः स्तोकादिनिर्निः स्तोकः द्विवच
नबहुवचनो [illegible] नातु समासे [illegible] पते [illegible] नात् तेन स्तोकाभ्यां मुक्त इत्यादौ वाक्यमेव अप्सुयोनिरुत्पत्तिर्यस्येति अपः सप्तम्या अलुक् योनिजचरम
तिषु [illegible] योनिः अप्सुज [illegible] मंज [illegible] हसंतादंताच्च सप्तम्या अलुक् संज्ञायां सरसिजं अदंतात्तु अरण्येतिलक इत्यादि स्वांगात्
सप्तम्या [illegible] ग कामे परे मूर्द्धमस्तकाभ्यां [illegible] ० ॥ ॥ उरसिलोमा अकामेति किं मुखेकामोऽस्य मुखकामः मूर्द्धमस्तकाभ्यां नेति किम् ॥

सि॰ कौ॰
टी॰ सु॰
११५

–श्रिय: हृद [illegible] गतानि दिव हृद्यो सप्तम्या अलुक् हृदिस्पृक् कर्मणोऽधिकरणत्वविवक्षायां सप्तमी। एवं दिविस्पृक्। कण्ठेकालः। स्वांग
तः सप्तम्या अलुक् [illegible] वा च हि [illegible] पक्षे अलुक् युक्ति दण्डहरेषु वाचोयुक्तिः दिशोदण्डः पश्यतोहरः पश्यन्तमनादृत्य हरतीत्यर्थः॥ अनादर
धिक्ये [illegible] अकालवा चकात्सप्तम्या अलुग्वा प्रायवाससरावासिषु खेशयः॥ खेशयः ग्रामेवासः ग्रामवासः ग्रामेवासी ग्रामवासी षष्ठ्या अलुगाक्रो
शे [illegible] चौरस्यकुलं आक्रोशे किं ब्राह्मणकुलं ओजसंभससहस्तमसंऽजोभ्यस्तृतीयाया अलुक् ओजसाकृतं अंभसाकृतं तमसाकृतं अंजसाकृतमा
जेवेन [illegible] र्थः॥ पुंसोऽनुजेजनुषांधे च तृतीयाया अलुक् यस्याऽनुजः पुमान् सपुंसानुजः जनुषांधः जात्यंध इत्यर्थः॥ जनुर्जननजन्मानीत्यमरः॥

उरसिलोमा हृदिस्पृक् कण्ठेकालः वाचोयुक्तिः दिशोदण्डः पश्यतोहरः खेशयः ग्रामेवासः॥
ग्रामेवासी चौरस्यकुलम् ओजसाकृतम् सहसाकृतम् अम्भसाकृतम् पुंसानुजः जनुषान्धः
आत्मनापञ्चमः त्वचिसारः गविष्ठिरः युधिष्ठिरः आत्मनेपदम् आत्मनेभाषा॥ ❁ ॥

आत्मनस्तृतीयाया अलुक्॥ पूरणार्थप्रत्ययांते परे आत्मनापंचमः। पूरणार्थे किं आत्मकृतं त्वचिसारः हसंतादंताच्च सप्तम्या अलुक् संज्ञायामित्यलुक्॥
गोः सप्तम्या अलुक् स्थिरे गविष्ठिरः युधिष्ठिरः हसंतादिति सप्तम्या अलुक् परशब्दादात्मशब्दाच्च चतुर्थ्या अलुक् वैयाकरणाख्यायां परस्मैपदं॥ राम
परस्मैभाषा आत्मनेपदं आत्मनेभाषा तादर्थ्ये चतुर्थ्या अलुगत्र मध्यांताभ्यां सप्तम्या अलुग् गुरौ परे॥ मध्येगुरुः अन्तेगुरुः तत्पुषे सप्तम्या अ ११५
लुक् कृत् प्रत्ययांते बहुलं स्तंबेरमः स्तंबे तीरे रमते इति स्तंबेरमो हस्ती कर्णेजपः कर्णेजपस्तु सूचकः कालवाचकात्सप्तम्या अलुग्वा तरतमका

लतनेषु पूर्वाह्णेतरे पूर्वाह्णतरे पूर्वाह्णेतमे पूर्वाह्णतमे पूर्वाह्णेकाले पूर्वाह्णकाले पूर्वाह्णेतने पूर्वाह्णतने अदसः षष्ठ्या अलुगायनपुत्रिकाकुलिकासु अमुष्या०
ऽपत्यं नडादिलादायनण् आमुष्यायणः अमुष्यपुत्रस्य भावः आमुष्यपुत्रिका अमुष्यकुलस्य भावः आमुष्यकुलिका भावार्थकः ऋदंतात्षष्ठ्या अलुग्
वास्वसृपत्योः मातृपितृभ्यां स्वसुः सस्य षः आभ्यां परस्य स्वसुः सस्य षः स्यात्समासे मातृष्वसा पितृष्वसा मातृपितृभ्यो वा आभ्यां स्वसुः सस्य षो वा स्यात् ॥
समासे मातुः ष्वसा मातुः स्वसा पितुः ष्वसा पितुः स्वसा विद्यासंबंधयोनिसंबंधवाचिन ऋदंतात्षष्ठ्या लुक् होतुरंतेवासी होतुः पुत्रः पितुरंतेवासी पितुः पुत्र
मध्येगुरुः [illegible]रमः करणेजपः पूर्वाह्णेतरे पूर्वाह्णेतमे आमुष्यायणः आमुष्यकुलिका आमुष्यपुत्रिका मातृपितृभ्यां
स्वसुः सस्य षः मातृष्वसा पितृष्वसा मातृपितृभ्यां वा मातुस्स्वसा मातुः ष्वसा पितुस्स्वसा पितुः ष्वसा होतुरंतेवासी ॥
होतुः पुत्रः पितुरंतेवासी पितुः पुत्रः देवानांप्रिय इति च मूर्खे दिवोदासः शुनश्शेफः शुनः पुच्छः इत्यादि ॥ ः ॥
देवानांप्रिय[illegible] मूर्खे षष्ठ्या अलुक् अन्यत्र देवप्रियः दिवोदासे परे षष्ठ्या अलुक् । दिवोदासः शुनः षष्ठ्या अलुक् शेफः पुच्छलांगुलेषु शेफः सकारांता
[illegible] अणादिके यप्रत्यये ऽकारांतोपि शुन इव शेफमस्य सः शुनःशेफः शुन इव पुच्छमस्य सः शुनःपुच्छः शुन इव लां
[illegible]लांगूलं बहुव्रीहिः [illegible] विशिष्टेष्वणां संज्ञा इत्यलुक् समासः ॥ : तरतमरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ई वंतस्यानेकस्व
[illegible]भाषितपुंस्कस्य [illegible] ब्राह्मणीति ब्राह्मणितरा ब्राह्मणितमा तरतमचरडिति पुंवद्भावो न वा तिवाचिनः स्त्रीप्रत्ययांतस्येति निषेधात् ॥

नडि[illegible]यापि[illegible]विसहितनिशुद्धिवंतेष[illegible] ॥

सि०चं०पू० ॥ [illegible] पाति ब्राह्मणिरूपाप्रशंसायामितिरूपः ईषदूना ब्राह्मणीति ब्राह्मणिकल्पा ईषदः समासोकल्पेतिक
टी०सु० ल्पप्र[illegible]तावपपेसमासो[illegible]कुत्सनवाचीनिसन्तिकुत्सिता ब्राह्मणी ष्टित इतीपु ब्राह्मणिचेली उक्तपुंस्कस्येतिकिं आमलकीतराकुवली
११६ तरा [illegible] सेनिस्यस्त्रीलिंगो अनीवंतस्यस्त्रीप्रत्ययांतस्य ईवंतस्यैकस्वरस्यवाह्रस्वस्तरादौ अनीवंतस्यस्त्रीप्रत्ययांतस्यवाह्रस्वः एक
स्वरस्य[illegible]वाह्र[illegible]वतितरतमरूपकल्पचेलड्ब्रुवगोत्रमतहतेषुपरेषुउतऊरित्यूप्रत्ययः अतिशयेनब्रह्मबंधूरितितरतमेयस्त्विष्टाइतितरस्मा

[illegible]तमरूपकल्पचेलड्ब्रुवगोत्रमतहतेषुङ्वन्तस्यानेकस्वरस्यह्रस्वोभाषितपुंस्कस्य ब्राह्मणितरा ब्राह्मणितमा ब्राह्म
णिरूपा ब्राह्मणिकल्पा ब्राह्मणिचेली अनीवन्तस्यस्त्रीप्रत्ययान्तस्यवन्तस्यैकस्वरस्यवाह्रस्वस्तरादौ ब्रह्मबन्धूतरा ब्रह्म
बंधुतरास्त्रीतरा स्त्रितरा श्रितःपरस्यवा विदुषितरा विदुत्तरा भवतितरा भवतरा पचतितरा पचततराइष्टकेषीकामालानां
चिततूलभारिषुह्रस्वः इष्टकचितम् पक्वेष्टकचितम् इषीकतूलम् मुञ्जेषीकतूलम् मालभारी उत्पलमालभारी ॥

त्ययः ब्रह्मबंधूतरा श्रितःपरस्यवा उश्चश्चाचतयोः समाहारः उ ऊ इत परस्यस श्रितः तस्मात् श्रितः उकारेण ऊकारेणचपरस्य ईप्रत्ययस्यह्रस्वोवा रा०न०
भवति तरादौ विदुषितरा ष्टित इतीपु वसोर्वउरितुत्वं ह्रस्वाभावे तरतमचरिडितिपुंवद्भावः विदुत्तरा विदुषीतरेत्यपिकेचिदुदाहरंतं तन्निर्मूलम् ॥ ११६
इष्टकेषीकामालानांचिततूलभारिषुह्रस्वः ॥ इष्टकादीनांतदंतानांचह्रस्वोभवति चितादिषु इष्टकाभिश्चितमितीष्टकचितं तदंतेपक्वेष्टकचितं इषी
काणांतूलमिषीकतूलं मालांबिभर्तिइतिमालभारीकर्तरिणिनिः हारिषवतिपाठांतरम् ॥ ॥ ॥ ॥ ओंनमोभगवतेवासुदेवाय ॥ ॥ ॥

कारेसत्यागदस्यमुम् सत्यागदयोर्मुम्स्यात् कारेसत्यंकारः शपथकरणमित्यर्थः अगदंकारोवैद्यः अस्तोश्च अस्तुइत्यस्यमुम्स्यात् कारेअस्तुइत्याख्यातप्रति
रूपकमव्ययं अस्तुंकारोऽभ्युपगमइत्यर्थः धेनोर्भव्यायांधेनुशब्दस्यमुम्स्यात् भव्यायांपरस्यांधेनुश्चासौभव्याचेतिविग्रहः धेनुंभव्याभविष्यतीधेनुरित्य
र्थः निपातनाद्भविष्यतिकर्तरि क्यप्रत्ययः लोकस्यपृणे लोकस्यमुम्स्यात् पृणेपरेपृणधातुः प्रीणनार्थः लोकंपृणः सूर्यः इत्तेऽनभ्यासस्य अनयोभ्या
सस्यमुम्स्यात् इत्तेपरे अभ्यासंसमीपं अभ्यासभिन्नमनभ्यासंएतिस्तुशासितिइणः क्यप् अनभ्यासमित्यः दूरतः परिहर्तव्यइत्यर्थः भ्राष्ट्राग्न्यो

कारेसत्यागदस्यमुम् सत्यङ्कारः अगदंकारः अस्तोश्च अस्तुंकारः धेनोर्मुम् भव्यायाम् धेनुम्भव्या लोकस्यामुम्
पृणे लोकम्पृणः इत्तेऽनभ्यासस्यमुम् अनभ्यासमित्यः भ्राष्ट्राग्न्योरिन्धे भ्राष्ट्रमिन्धः अग्निमिन्धः गिलेऽगिलस्यमु
म् तिमिङ्गिलः गिलगिलेमुम् च तिमिङ्गिलगिलः उष्णभद्रयोर्मुम् करणे उष्णंकरणम् भद्रंकरणम् एवंऽहनि
[illegible]वः रात्रिंचरः रात्रिमटः रात्र्यटः ॥ ॥०

॥ इंधे अनयोर्मुम्स्यादिंधेपरे इंधीदीप्तौकार्य्येऽणित्यण् भ्राष्ट्रमिंधः अग्निमिंधः
नाम[illegible]समासः गिलेऽगिलस्यअगिलस्यागिलभिन्नस्यमुम्भवति गिलेपरेति मिंगिलोमत्स्यविशेषः गिरतेर्मूलविभुजादित्वात्कप्रत्ययः गिरतेरेफ
स्य[illegible]निगिलति[illegible]गिलगिलेच अगिलस्यमुम्भवति गिलगिलेपरे गिलंगिलतीतिगिलगिलः तिमीनांगिलगिल इतितिमिंगिलगिलः उष्णभद्रयोःक
रणे[illegible]स्यात् अ[illegible]नवास्यात् कृतप्रत्ययांतेपरे अखिदर्थमिदंसूत्रं खित्प्रत्यये खित्परस्येति नित्यमेवमुम्स्यात्
[illegible]स्यात् स्त्रीलिङ्गो[illegible]पल्लमो ॥ ॥०॥ ॥

नहि[illegible]सयाधि[illegible]चिसहि[illegible]निपुक्कि[illegible]पूर्वस्यदीर्घः क्विवंतेषुपरेषुपूर्वस्योपसर्गकारकस्यदीर्घःस्यात् णह बंधने वृतुवर्तने वृषुसेचने व्यधताडने रुच
[illegible] [illegible]पानत्तनुविसत्[illegible]त्त पसमापनह्यते इतिउपानत् कर्मणिक्विपूनिवर्त्तते इतिनीवृत् नीवृज्जनपदोदेश इत्यमरः ।।प्रवर्षतीतिप्रावृट् मर्मोण्यवि
[illegible]तिमर्मा[illegible] [illegible]धर्मा[illegible]तिनाम्नोनोलोपशिति नलोपः म्वावित् लोकभाषायांसहे गहाङ्कि.ति चेति संप्रसारणंनिरोचते इतिनीरुक् ऋतिसहेते
इति[illegible]तीषट् [illegible]तिजुगु[illegible]शाकल्या[illegible]तिसहोस्वथोऋतुरितिहेमः परितनोतीतिपरीतत् क्विवंतेष्विति किं परिणहनं उपसर्गकारकस्येतिकिं पटुरुकु ति

नहिवृतिवृषिव्यधिरुचिसहितनिषु क्विवन्तेषु पूर्वस्यदीर्घः उपानत् नीवृत् प्रावृट् मर्म्मावित् नीरुक् अभीरुक् ।।
ऋतीषट् परीतत् मत्वर्थेबहुस्वरस्य अमरावती शरादेश्च शरावती अजिरादेर्न अजिरावती उपसर्गस्य घ
ञ्यमनुष्येवादीर्घः परिपाकः परीपाकः परिहासः परीहासः अमनुष्येकिम् निषादः ।। ।।छ।। ।।

[illegible]रुक् मत्वर्थेबहुस्वरस्य बहुस्वरस्यदीर्घःस्यात् संज्ञायामस्त्यर्थेपरे अमराः संत्यस्याममरावती मांतोपधाद्वलिनो इतिवत् क्षितइतीपू संज्ञायामि
ति किंवलयवती बहुस्वरस्येतिकिं व्रीहिमती शरादेश्च शरादेर्दीर्घःस्यात् अस्त्यर्थेशराः संत्यस्यामितिशरावती अजिरादेर्न अजिरादेर्दीर्घोनभवति० रामः
अस्त्यर्थे अजिरमस्त्यस्यांसाअजिरवतीत्वंगणंचत्वाराजिरे इत्यमरः उपसर्गस्य घञ्यमनुष्येवादीर्घः उपसर्गस्यवादीर्घःस्यात् घञंतेपरे नतुमनुष्ये ११७
ऽर्थे अमनुष्येकिं निषीदत्यस्मिन्नधमित्यधिकरणेघञ् निषादः पुलिंदोमनुष्यजातिः ।। ।। हरयेपरमात्मने० ।। ।। ।।

आदेश्च हं हे हं हृ विषये भिन्नार्थानां तुल्यार्थानां च नाम्नामेकः शिष्यते आदेशाद्योगादीनां च लोपो भवतीत्यर्थः रामश्च रामश्च रामौ घटश्च कुम्भश्च कुं
भौ घटश्च कुंभश्च कलशश्च कलशाः मातृस्वसृभ्यां सहोक्तौ पितृश्वशुरौ वा शिष्येते माता च पिता चेति पितरौ मातापितरौ वा पितुः श्वशुराणामाता गौरवे
णेति स्थिते इति स्मृते मातुः प्रधानत्वात्पूर्वनिपातः ऋतां हं हे इति पूर्वस्यात्वं श्वश्रूश्वशुरौ श्वश्रूश्वशुरौ वा स्वसृदुहितृभ्यां सहोक्तौ भ्रातृपुत्रौ शिष्येते ॥
दुहिता च पुत्रश्च पुत्रौ स्वसा च भ्राता च भ्रातरौ ऋतां हं हे पूर्वपदस्यात्वं विद्यायोनिसंबंधवाचिनामृदंतानां यो हं हे स तत्र पूर्वपदस्यात्वं भवति षष्ठी

आदेश्च हन्द्वे हन्द्वे सति कचिदादेर्लोपः माता च पिता च पितरौ श्वश्रूश्च श्वशुरश्च श्वशुरौ दुहिता च पुत्रश्च पुत्रौ स्व
सा च भ्राता च भ्रातरौ ऋतां हन्द्वे पूर्वस्यात्वम् मातापितरौ होतापोतारौ नेष्टोद्गातारौ पुत्रे च पितापुत्रौ गावश्च
गावश्च गावइमाः शुक्लश्च शुक्ला च शुक्लं च शुक्लम् सर्वपश्चतीयो वा दिक्संख्ये संज्ञायाम् दिग्वाचिनः सं
ख्यावाचिनश्च शब्दाः समानाधिकरणेन संज्ञायामेव समस्यन्ते स कर्म्मधारयस्समासः दक्षिणाग्निः सप्तर्षयः ॥
संज्ञायां किम् पञ्च फलानि दिक्संख्ये किम् पूर्णगवा ॥ ॥ १ निर्दिष्टत्वाद्दंत्यस्यादेशः ह्यो हं हे स्यात्वं माता च पिता चे

ति [illegible] मातापितरौ पुत्रोत्पादने [illegible] निकृतः संबंधो होता पोता चेति होतापोतारौ नेष्टा चोद्गाता च नेष्टोद्गातारौ इह होत्रादिरूपविद्या
[illegible] संबंधो [illegible] नित्ययं [illegible] रूपो बोध्यः ॥ पुत्रे च विद्यायोनिसंबंधवाचिनामृदंतानामात्वं भवति पुत्रे परे पिता च पुत्रश्च पितापुत्रौ अनयो।
[illegible] निकृत [illegible] लक्षणात्र ग्राम्यपशुसमूहेष्वतरुणेष्वनेकस्वरेषु सहोक्तौ स्त्रीलिंगो वशिष्यते गावश्च गावश्चेति गावः उभयत्ररूप।
स [illegible] स्त्रीलिंगो [illegible] इमाः [illegible] इमे भवाः ग्राम्याः यम् ग्राम्येति किं रुरव इमे मृगविशेषा वनचारिण इत्यर्थः ॥ पशुग्रहणं किं

सि०चं०पू०
टी०सु०
११८

त्राह्मण नहि [illegible] सत्यधिक विसहितनिषु किंवते पूर्वस्पर्दी ग्रतरुणेषु किंवत्साइमे अनेकस्वरेषु किं अथाइमे अश्वानामेक एवखुर इत्यर्थः अक्लीवेन सहो
क्तौ [illegible] विशिष्ट [illegible] तन्तु विस्तृतत्त लक्षण एव विशेषश्चेत सुक्लः पटः सुक्लापटी सुक्लं वस्त्रं तदिदं सुक्लं तानीमानि सुक्लानि त्यदादीनां मिथः सहोक्तौ
यत्पूर्वं तच्छिष्यते [illegible] वपश्चयो नोवाक्लिया महोक्तौ पुमान् शिष्यते तल्लक्षण एव विशेषश्चेत हंसी च हंसस्च हंसौ इहसर्वत्र एकशेषकृतेः नेकाभावा
त्‌० इत्द्व समासो न तेन [illegible] सौ शिवं सि इत्यादौ प्राण्यंगत्वादेकवद्भावो न पंथानौ पंथानः॥ इत्यादौ समासांत प्रत्ययो न भवतीत्येकशेषः पुनः कर्मधा
रयमाह दिक्संख्ये संज्ञायां दिक् च संख्या च दिक्संख्ये दिग्वाचिनः संख्यावाचिनश्च शब्दास्तुल्यार्थेन सह समस्यंते स कर्मधारयः कर्मधारयस्तुल्या

द्वन्द्वतत्पुरुषयोः परपदस्यैव लिंगम् कुक्कुटमयूर्याविमे मयूरीकुक्कुटाविमो अर्द्धं पिप्पली द्विगुप्राप्तापन्नालंपूर्वप्रा
दिसमासेन पञ्चकपालः प्राप्तो जीविकां प्राप्तजीविकः आपन्नजीविकः अलंकुमार्यै अलंकुमारिः निष्कौशाम्बिः॥

र्थेद्वत्यनेनैव सिद्धे नियमार्थमिदं संज्ञायामेवेति दक्षिणश्चासौ अग्निश्चेति दक्षिणाग्निः सप्त च ते ऋषयश्च सप्तर्षयः॥ दक्षिणाग्निर्गार्हपत्याहवनीयौ
त्रयोग्न्य॥ इत्यमरः॥ ॥ द्वन्द्वतत्पुरुषयोः परपदस्यैव लिंगं इतरेतरयोगद्वंद्वो ऽत्र ग्राह्यः तेन समाहारद्वंद्व एकत्वे द्विगुद्वंद्वाविमौ नुंसकत्वात द्वंद्वतत्पुरुष
योरिति संबंधे षष्ठी एतयोः परपदतुल्यं लिंगं भवति कुक्कुटश्च मयूरी च कुक्कुटमयूर्यौ इमे इति स्त्रीलिंग निर्देशः॥ मयूरी च कुक्कुटश्च मयूरीकुक्कु रा०म०
टौ इमाविति पुल्लिंगनिर्देशः पिप्पल्या अर्द्धं मित्यर्द्ध पिप्पली इयमिति स्त्रीलिंगनिर्देशः द्विगुप्राप्तापन्नाऽलंपूर्वप्रादिसमासे न द्विगुसमासे प्राप्तापन् ११८
नालंपूर्वसमासे प्रादिसमासे च परपदतुल्यं लिंगं न भवति पंचसु कपालेषु संस्कृतः तद्धितार्थे द्विगुः संस्कृतार्थे ऽण्‌तस्य लुक् च तद्धितार्थे द्विगुविशे०

ष्पनिघ्नः॥ पुरो दाश्यते इति दाशृ दाने कर्मणि घञ् निपातनाद्धस्य डः पुरोडाशः प्राप्तजीवकः आपन्नजीविकः अलंकुमारिः तत्पुरुषे एते अन्यार्थे इति ह्रस्वः प्रादिसमासो यथा प्रादयो गताद्यर्थे प्रथमया प्रगतः आचार्यः प्राचार्यः दुराचारः पुरुषः दुःपुरुषः प्रगतः पितामहः प्रपितामह इत्यादि अत्यादयः क्रान्ताद्यर्थे द्वितीयया अतिक्रान्तो मालां अतिमालः अन्यार्थे इति ह्रस्वः अभिगतो मुखं अभिमुखः उद्गतो वेलां उद्वेलः प्रतिगतोऽक्षं प्रत्यक्षः इत्यादि अवादयः क्रुष्टाद्यर्थे तृतीयया अवक्रुष्टः कोकिलया अवकोकिलः अन्यार्थे इति ह्रस्वः परिणद्धो वीरुधा परिवीरुत् पर्यादयो ग्लानाद्यर्थे चतुर्थ्या परिग्लानोऽध्ययनाय पर्यध्ययनः गुरुकुलवासादिना परिग्लानोऽध्ययनाय इत्यर्थः॥ निरादयः क्रान्ताद्यर्थे पंचम्या निष्क्रान्तः कौशाम्ब्याः नि

॥ अश्ववडवयोर्द्वन्द्वे पूर्ववल्लिङ्गः॥ अश्ववडवान्॥

ष्कौशाम्बिः अन्यार्थे इति ह्रस्वः उत्क्रान्तो कुलात् उत्कुलः निर्गतमंगुलिभ्यः निरंगुलं अस्वपदविग्रहेण नित्यसमासा एते इति प्रादिसमासाः॥ ॥अश्ववडवयोर्द्वन्द्वे पूर्ववल्लिंगः सूत्रे द्विवचनमतंत्रमविवक्षितं बहुत्वेऽपि पुल्लिंगस्य दर्शनात् अश्वश्च वडवा च अश्ववडवौ निपातनाट्टापो निवृत्तिः बहुत्वे पुंल्लिंगं दर्शयति अश्व[illegible] अश्ववडवैः विभाषा वृक्षेति पक्षे समाहारद्वंद्वे अश्ववडवं क्रियाव्ययविशेषणानां क्लीवत्वमेकवचनं क्रियाविशेषणानामव्य[illegible] स्त्रीलिंगे[illegible] इत्यादि॥ ॥एवा ह्रा हान्ताः पुंस्येव परवल्लिंगतापवादोऽप्ययं परत्वात्समाहारनपुंसकतां बाध

सि०चं पू०
टी०सु०
११७

...रोऽपं ... तत्पुरुषकर्मधारयाः पुंल्लिंगे एव भवंति अहश्च रात्रिश्च अहः इति नस्यसः अहोरात्रः अहः
ति ... यस्या ... पूर्वा ... स्यामाहन्नुशब्दः एतदंताः द्वंद्वद्विगुतत्पुरुषकर्मधारयाः पुंल्लिंगे एव भवंति अहः इति नस्यसः सख्यिभ्य इति टप्रत्ययः नोवेत्युपधालो
पूर्वा ... हार इत्यः प्रत्ययः रात्रेः पूर्वभागः पूर्वरात्रः सर्वैकदेशेत्यः प्रत्ययः अह्नपूर्व इति पूर्वाह्णः राज्ञाहः सखिभ्य इति टप्रत्ययः ॥
पाः ह्व ... समाहारः इति टः नो वेति टिलोपः द्व्यहः संख्यापूर्वरात्रं क्लीवं द्वयोः रात्र्योः समाहारः तिसृणां रात्रीणां समाहारः इति सर्वैकदेशेत्यः प्रत्ययः
द्विरात्रं त्रिरात्रं अपथं तत्पुरुषे क्लीवं नञ्पूर्वः कृतसमासांतः पथशब्दः पथशब्दः क्लीवे स्यात् न पंथा इत्यपथं ऋक्पूरब्धूः पथामित्यः प्रत्ययः तत्पुरुषे इति किम् अ

रात्राह्नाहान्ताः पुंस्येव अहोरात्रः पूर्वरात्रः पूर्वाह्णः द्व्यहः पूर्वाहः संख्यापूर्वं रात्रं क्लीवम् द्विरात्रम् त्रिरात्रम् अपथं न
तत्पुरुषे क्लीवम् अपथम् अर्द्धर्चादयः क्लीवपुंसोः अर्द्धर्चम् अर्द्धर्चः ध्वजम् ध्वजः तीर्थम् तीर्थः एवं शरीरमंडप
स्तूपदेहदेश अंकुशकलश इत्यादि आबन्तोत्तरपदाद् द्विगोर्वेप् पंचखट्वी पंचखट्वम् अनो नलोपो द्विगोर्वेप् ॥
॥ पंचतक्षम् पंचतक्षी ॥ ॥

पथोदेशः कृतसमासांतनिर्देशात् नेह अपंथाः अत्र नञ्पूर्वात्पथिशब्दात् समासांतस्तत्पुरुषे इति वि
कल्पः प्रसंगाद्दाह अर्द्धर्चादयः ॥ क्लीवपुंसोः अर्द्धर्चादयः शब्दाः पुंसि क्लीबे च स्युः आबन्तोत्तरपदो द्विगुर्वा स्त्रियां पंचानां खट्वानां समाहारः ॥ नन्व राम०
पुंस्कस्येति ह्रस्वे कृते द्वंद्वं प्रवर्त्तते पंचखट्वं स्त्रियां तु समाहारे ङप् इति ङीप् पंचखट्वी अनो नलोपो द्विगुर्वा स्त्रियां इह वा शब्दः स्त्रियामित्यनेन संबध्यते ११९
न तु नलोप इत्यनेन अन्नंतस्य द्विगोर्निसंनलोपो भवति अन्नंतो द्विगुः स्त्रियां च वा पंचानां तक्ष्णां समाहारः पंचतक्षं स्त्रियां तु समाहारे ङप् इति ईपूपंच

॥ पुण्यसुदिनाभ्यामह्नः ॥ क्लीबता आभ्यां परस्याहन् शब्दस्य क्लीबत्वं स्यात् पुण्यं च तदहश्चेति राजाहःसखिभ्यः इति टः नोदेति टिलोपः पुण्याहं सुदिनं च तदहश्चेति सुदिनशब्दः ॥ प्रशस्तपर्यायः सुदिनाहं रात्राह्नाहाः पुंसि इत्यस्यापवादोऽयं संख्याव्ययाभ्यां परस्य पथस्य क्लीबता आभ्यां परः कृतसमासान्तः पथशब्दः क्लीबमित्यर्थः ॥ त्रयाणां पन्था इति ऋक्पूरब्धूः इत्यप्रत्ययः त्रिपथं विरूपः पन्था इति विपथं कथं पुंस्त्वं व्यध्वो दुरध्वो विपथः कदध्वा कापथः समाः इत्यमरे उच्यते प्रमाद एवायमिति बहवः वस्तुतस्तु पथ गतौ इत्यस्मात्पचाद्यच्प्रत्यये पथतीति व्याप्नोतीति व्युत्पादितः पथशब्दः ॥

पुण्यसुदिनाभ्यामह्नः क्लीबता पुण्याहम् सुदिनाहम् संख्याव्ययाभ्याम्परस्य पथः क्लीबता त्रिपथम् विपथम् सामान्ये नपुंसकम् मृदु पचति प्रातः कमनीयम् उपज्ञोपक्रमान्तस्तत्पुरुषः क्लीबम् उपज्ञायमानोपक्रम्यमाणयोः प्राथम्य। श्चेदाख्यातुमिष्यते पाणिनेरुपज्ञा पाणिन्युपज्ञम् नन्दोपक्रमं द्रोणः छायान्तश्च पूर्वपदार्थबाहुल्ये इक्षूणां छा-
॥ याइक्षुच्छायम् ॥

तथा च [illegible]शेषः वाटः पथश्च मार्गः स्यादिति अनेन समासे पुंस्त्वमुपपन्नं कापथ इत्यत्र कादेशस्तु ईषदर्थे बोध्यः अय[illegible]ङ्गिनः प्रवादत्वात्तत्पुरुष एवेदं प्रवर्तते नान्यत्र विपथा नगरी बहुव्रीहिरयं पन्थानमतिक्रान्ता अतिपथा इहापि न हि सुप्राप्तापन्नालभि-लि[illegible]पदलि[illegible]व इति माधवः सामान्येन नपुंसकं अनियतलिङ्गविषयः कमिदं तेनादिपचतीत्यादौ पुंस्त्वमेव मृदु पचति क्रियाविशेष-ण[illegible] कर्मत्वमपि क्रियायामेवाहि फलाशः कर्मीभूतः फलसमानाधिकरणे द्वितीया उपज्ञोपक्रमान्तः तत्पुरुषः क्लीबं अनन्तत्पुरुषा-च पितुं लौकिका

धिवा[illegible]तीयं [illegible]नां नत्पक्रमो[illegible] तत्पुरुषः क्लीबं स्यात् उपज्ञायते इत्युपज्ञा षिद्भिदादिभ्योऽङ् इति कर्म्मण्यङ् उपक्रम्यते इत्युपक्रमः कर्मणि घञ् मांतस्य से टो·
नद्वृ[illegible]स्या[illegible] उपज्ञा च उपक्रमश्च उपज्ञोपक्रमौ उपज्ञोपक्रमौ अंते यस्य स उपज्ञोपक्रमांतः उपज्ञा ज्ञानमाद्यं स्यात् ज्ञात्वारंभ उपक्रम इत्यमरः॥
उपज्ञा[illegible]म्यमाणस्य वस्तुनः प्रथमस्य भावः प्राथम्यं चेद्यदि आख्यातुं वक्तुमिष्यते वाञ्छ्यते पाणिनेरिति कर्तरि षष्ठी नंदस्योपक्रम इति नंदो
पक्रमं [illegible] बहु पूर्वपदार्थबाहुल्ये छायांतस्तत्पुरुषो नपुंसकं स्यात् पूर्वं च तत्पदं च पूर्वपदं पूर्वपदस्यार्थः पूर्वपदार्थः बहुलस्य भावो बाहुल्यं पूर्वप
दार्थस्य ल[illegible]स्य पूर्वपदार्थबाहुल्यं तस्मिन्सेनासुराच्छायेत्यस्य विकल्पस्यापवादोयं॥ राजपर्यायपूर्वोऽरक्षः पिशाचादिपूर्वश्च सभांतः क्लीबं राजपर्यायपूर्वः सभां

राजपर्य्यायपूर्वोऽरक्षः पिशाचादिपूर्वश्च सभान्तः इनसभम् ईश्वरसभम् नेह राजसभा रक्षस्सभम् पिशाचसभम्
संघार्थसभान्तः स्त्रीसभम् स्त्रीसंघात इत्यर्थः॥ सेनासुराच्छायाशालानिशानां वा ब्राह्मणसेनम् यवसुरम्॥
कुड्यच्छायम् गोशालम् श्वनिशम् पक्षे ब्राह्मणसेनेत्यादि॥ ॥ इति समासप्रक्रिया॥ ॥ समाप्ता॥॥

तत्पुरुषोऽरक्षः पिशाचादिपूर्वः सभांतस्तत्पुरुषश्च नपुंसकं स्यात् इनेश्वरशब्दौ राजपर्यायौ इनस्य सभा इनसभं ईश्वरस्य सभा ईश्वरसभं राजपर्यायपू
र्व इति किं राजसभा रक्षसः सभा रक्षः सभं पिशाचस्य सभा पिशाचसभं संघातार्थसभांतः संघातार्था या सभा तदंतस्तत्पुरुषः क्लीबं स्यात्॥ सेनासु·
राच्छायाशालानिशांतो वा एतदंतस्तत्पुरुषः क्लीबं स्यात् श्वनिशं कृष्णचतुर्दशी नञ्तत्पुरुष इत्यधिकारान्नेह दृढसेनो राजा दृढा सेना यस्येति बहुव्रीहिः
असेना अविद्यमाना सेना इति नञ्पूर्वस्तत्पुरुषः॥ अथ शेषमाह· कृत्तद्धितसमासैकशेषसनाद्यंतधातुरूपाः पंचवृत्तयः पंचानां वृत्तिरिति पूर्वाचार्य
संज्ञा वृत्तिलक्षणमाह· परार्थाभिधानं वृत्तिः परस्य शब्दस्य योऽर्थस्तस्याभिधानं शब्दांतरेण यत्र सा वृत्तिः यथा राजपुरुष इत्यत्र राजशब्देन वाक्या॥

वस्यायामनुक्तः पुरुषार्थोऽभिधीयते विग्रहलक्षणमाह वृत्त्यर्थावबोधकं वाक्यं विग्रहः स हि धा लौकिकोऽलौकिकश्च परिनिष्ठितत्वात्साधुर्लौकिकः प्र
योगानर्होऽसाधुरलौकिकः यथा राज्ञः पुरुष इति लौकिकविग्रहः राजन् अस् पुरुष सु इत्यलौकिकविग्रहः नित्यसमासलक्षणमाह अविग्रहो
नित्यसमासः लौकिकविग्रहरहितो नित्यसमासो ज्ञेयः लोके यस्य विग्रहो न प्रयुज्यते इति भावः अस्वपदविग्रहो वा समस्यमानपदावयवैर्घटितः
अस्वपदविग्रहः समासः षड्विध इति प्रायोवादः अव्ययीभावतत्पुरुषद्वंद्वद्विगुबहुव्रीहिकर्मधारयाधिकारबहिर्भूतस्यापि नाम्ना वृत्तेति विधा
नात् तद्व्याख्यानेन तत्पुरुषद्वंद्वसुप्सुपेति सुप्सुपा चामनुरोधेनेति ध्येयम् पूर्वपदार्थप्रधानोऽव्ययीभावः उत्तरपदार्थप्रधानस्तत्पुरुषः उभयपदार्थप्रधानो द्वं
द्वः संख्यापूर्वोऽन्यपदार्थप्रधानो द्विगुः अन्यपदार्थप्रधानो बहुव्रीहिः विशेषणपूर्वकर्मधारय उत्तरपदार्थप्रधानः विशेष्यपूर्वस्तु पूर्वपदार्थप्रधानः॥
ननु सार्वत्रिकमस्य प्रतिज्ञानं तत् गंगमित्याद्यव्ययीभावे अतिमालादौ तत्पुरुषे दंतोष्ठमित्यादौ द्वंद्वे द्वित्रा इत्यादौ बहुव्रीहौ चाभावात् अनेकपदत्वं द्वं
द्वबहुव्रीह्योरेव किंच सिवंतानां तिपानाम्ना धातुना च तिपंतेन सिवंतेनेति विज्ञेयः समासः षड्विधो बुधैः १ आयोभिप्रायः सिवंतानां सिवंतेन य
था राजपुरुषः सिवंतानां तिपा समासो वेदे एव भवति नान्यत्र यथा पर्यभूषत् सिवंतानां नाम्ना प्रातिपदिकेन यथा कुंभकारः अत्र सिवुत्पत्तेः प्रागे
वोपपदसमासः सिवंतानां धातुना यथा क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणामित्यादिनिपातनाद्धातुना समासः कटप्रूः अजस्रं तिपांतिपा स
मासो यथा क्रियासातत्ये आख्यातं आख्यातेन समस्यते। अश्नीतपिबता इत्येवं सततं यत्राभिधीयते सा अश्नीतपिबता पचतभृज्जता खादतमोदता
ति[illegible]प। [illegible] महोडादयो अन्यार्थे समस्यंते एहि इडे इति यस्मिन् कर्मणि तत् एहीडं कृंतविचक्षणा यस्यां क्रियायां सा कृंतविचक्षणा इत्येवं
नि[illegible]पदलो[illegible]यत्नोऽपस्त्र जीमूतस्येव इति सर्वसमासशेषः जात्याख्यायामेकस्मिन्बहुवचनं वा। ब्राह्मणाः पूज्या ब्राह्मणः पूज्यः एकत्वे द्वित्वे वा
समा[illegible] भूमः [illegible] प्रयोगं [illegible] पृथ्वी वा उपमानानि सामान्यवचनैः समस्यंते घनश्यामः इह पूर्वपदं तत्सदृशे लाक्षणिकमिति सू
चयितुं लौकिकविग्रहे इव शब्दः प्रयुज्यते उपमानस्य पूर्वनिपातार्थमिदं उपमेयं व्याघ्रादिभिः सामान्याप्रयोगे समस्यते विशेष्यस्य पूर्वनिपातार्थमिदं

॥ पुरुषव्याघ्र इव शूर इत्यर्थः ॥ ॥इति समासप्रक्रिया ॥

...अपत्येऽण् प्रत्ययः तान्नाम्नोऽण्प्रत्ययो भवति अन्त्येसस्य
...पते॥ तिभ्यः स्वाद्यंतपदेभ्यो हितस्तद्धितः विभक्त्यंतनाम्न एव तद्धितोत्पत्तिर्भवतीत्यर्थः अपत्येऽण् इत्युक्तं तान्नाम्नोऽण् प्रत्ययो भवति अन्त्ये ... तयोः समे इत्यमरः॥
...भवति ... लक्षणः आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी आहुर्दुहितरं सर्वेऽपत्यं तोकं तयोः समे इत्यमरः॥
... धिवाति ... निर्द्धारणार्थे सप्तम्यासमासः क्वचिदमाद्यंतस्यापत्यमिति परनिपातः निर्द्धारणषष्ठ्यातु न समासः॥
... वृद्धिः स्वरेषु आदिः आदिस्वरः निर्द्धारणार्थे सप्तम्या समासः क्वचिदमाद्यंतस्य ... आदिस्वरस्तस्य वृद्धिरिति
निद्धार ... निषेधात् यद्वा वा व्यस्वरे इत्यतः स्वरे इत्यनुवर्त्तते तत्र जातावेकवचनं निर्द्धारणसप्तम्यंतं तथाच स्वरेषु आदिस्वरस्तस्य वृद्धिरिति
व्याख्याने आदिस्वासौ स्वरश्चेति कर्मधारयः ... तोयस्य संज्ञा ततस्मिन् ज्ञितिप्रकरणात्तद्धिते इति लभ्यते इच्छंदसु ... संबध्यते द्वंद्वा

अपत्येऽण्॥ नाम्नोऽपत्येऽर्थेऽण् प्रत्ययः॥ आदिस्वरस्य ज्णितिच वृद्धिः॥ स्वराणां मध्ये य आदिस्वरस्तस्य वृद्धिर्ञ्णिति णिति

च तद्धिते वोऽव्यस्वरे उवर्णस्योत आव् तद्धितस्य पकारे स्वरे च उपगोरपत्यमौपगवः वैदुषः वाशिष्ठः गौतमः भार्गवः॥
... आङ्गिरसः वैदः और्वः वात्त्वध्रः॥ ५

...भूयमाणत्वात् वोऽव्यस्वरे उश्च ओश्च अनयोः समाहारो वो एकत्वे हि यु द्वंद्वावितिनपुंसकत्वेपि॥ ... यस्वरं तस्मिन् यस्वरे तद्धितसंबंधिनि अत्रोका
नहूस्वः अनुकार्यस्य ... प्रतिपत्त्यर्थत्वात् अन्यथा संज्ञायोत्पत्ते ... स्वरस्य तयोः समाहारः यस्वरं तस्मिन् ... ग्रहणमर्थमिति ध्येयम् गामुपगत इत्यु
पसमासे च विसिद्धेपि यकारार्थं तद्ग्रहणं ... क्वचिद्यकारेऽपिस्वरकार्यातिदेशाद्वसिद्धिरित्योग्रहणमर्थमिति ... उपगोरपत्यमिति॥
पगुः ... समासः गोरिति ह्रस्वः यादव विशेषस्य उद्धवस्य पूर्वजः कश्चित् उद्धवप्रकृत्सोपगविर्जगामेति भागवतात् उपगोरपत्यमिति स
अणः प्रयोग ... नामप्रयोगइति न्यायात् ... प्रयोगः वाटाङ्गेरितस्ततो वेत्यनुवर्त्तते तेन पक्षे षष्ठी समासोपि उपगवऽपत्यमितिस
मासस्यैवैकल्पिकत्वाद्वाक्यमपि औपगवः स्त्रियांतु जातेरितीप् औपगवी अन्त्येऽपि किं वस्त्रमुपगोरपत्यं चैत्रस्य विदुषापत्यं वैदुषः वसोर्वसि
सुत ... स्यापत्यं वाशिष्ठः गोतमस्य ऋषेरपत्यं गौतमः भृगोऋषेरपत्यं भार्गवः अंगिरस ऋषेरपत्यं आंगिरसः विदस्यापत्यं वैदः उर्वस्य
॥ पत्यं और्वः॥

ऊडरणि। सामान्यशब्दस्यापि लक्ष्यानुसारात् विशेषपरत्वं बोध्यं तेन संख्यादिपूर्वस्य मातृशब्दस्य लाभः षण्णां मातॄणामपत्यमिति तद्धितार्थे द्विगुसमासो यं न तु षण्णां मातॄणामपत्यमिति विग्रहः दिक्संख्ये संज्ञायामिति नियमेनासंज्ञायां समासाऽभावात् तद्धितान्तस्य संज्ञात्वेपि समासस्यासंज्ञत्वात् आदिस्वरवृद्धिः षोडइति डत्वं क्वचिन्नत्वस्यापि नमः इति दस्य णः उः षाण्मातुरः द्वयोर्मात्रोरपत्यं द्वैमातुरः द्वैमात्रेयश्च विनायकः संमातुरपत्यं साम्मातुरः भद्रमातुरपत्यं भाद्रमातुरः शिवादेश्चाण् शिवादेरण स्यादपत्येऽर्थे इञोऽपवादोऽयं शिवस्यापत्यं शैवः लक्ष्यस्यापत्यं लाक्ष्यः गङ्गाया अपत्यं गाङ्गः पक्षे गाङ्गेयः एवं शिवककुत्स्यवत्सडजरत्कारुविपाश् तक्षन् विश्रवण रवण ऋषिषेण विरूपाक्षस्यादिः अतइञनृषेः ऋषिवाचकाद

ऊडरणि। संख्यासम्भद्रपूर्वस्य मातृशब्दस्य ऊत् ऊडभवत्यणि परे। षाण्मातुरः। द्वैमातुरः। साम्मातुरः। भाद्रमातुरः॥ शिवादेश्च। शैवः। गाङ्गः। अतइञनृषेः। अकारान्तान्नाम्नोऽनृषिशब्दादपत्येऽर्थे इञ्। दैवदत्तिः। श्रैधरिः। दाशरथिः। पौरन्दरिः। बह्वादेश्च। बाहोरपत्यं बाहविः। औडुलोमिः। गार्ग्यिः। वैदिः। नाडिः। कौञ्जिः॥ ॥ ॥

दन्तात् [illegible] भवति अनृषिवाचकमदन्तं यन्नामप्रातिपदिकं तस्मात् इञ् इति कारान्त- पत्यं तादि इञ् स्यादपत्येऽर्थे देवदत्तस्यापत्यं दैवदत्तिः श्रीधरस्यापत्यं श्रैधरिः दशरथस्यापत्यं [illegible] दाशरथिः पुरंदरस्यापत्यं पौरंदरिः बह्वादेश्च बह्वादिभ्य इञ् स्यादपत्येऽर्थे बाह्वादिराकृतिगणोऽयं बाहोरपत्यं बाहविः उडूनीव लोमानि यस्य सः [illegible] [illegible] इया मिस्सपरः॥ उडुलोम्नोऽपत्यं नो वेति टिलोपः औडुलोमिः बहुत्वे तस्मात् इणवणि तो वेल्लाणित्वान्ने वृद्धिः॥ [illegible] वैदिः नडस्यापत्यं नाडिः कुंजस्यापत्यं कौंजिः बाह्वादिर्यथा विद उर्वक कश्यप कुशिक भरद्वाज उपमन्यु चयितुं [illegible] इत्यादि॥ ॥ ॥ ॥

सुधा[illegible]मकड्ादेशः स्यात् इञ्प्रत्ययश्चापत्येऽर्थे डित्वादंत्यस्यस्थानेऽकङ्। सुधातुरपत्यं सौधातकिः वे
दा[illegible]सिः काश्यः [illegible]ण्[illegible]मो भीमसेन इतिवदेकदेशस्य ग्रहणं व्यासस्यापत्यमिति न संधिर्य्वोर्युट् चेति वक्ष्यमाणेनेडागमः
ततोहा[illegible]सकः। वरुडस्यापत्यं वारुडकिः। वरुडादयो जातिविशेषाः। निषादस्यापत्यं नैषादकिः। चंडालस्यापत्यं चांडालकिः। विंबस्यापत्यं
वैंबकिः [illegible]योयस्त्रीयाम गर्गनडादि[illegible]पितृवत्स्वादेः एयञ् आयनणच एयण् चणीयश्चेतेणयायन णेयणीयाः गर्गश्च नडश्च अत्रिश्च स्त्रीयो चपितृष्व

सुधातृव्यासवरुडनिषादचण्डालविम्बानामकङ् च। सुधातुरपत्यं सौधातकिः। वैयासकिः। वारुडकिः। नैषादकिः।
चाण्डालकिः। वैम्बकिः। एयायनसेयससीयाम गर्गनडात्रिस्त्रीपितृष्वस्रादेश्च। गर्गादेरेयोनडादेरायनण् अत्र्यादेस्त्री
प्रत्ययान्ताच्च एयण् पितृष्वस्रादेर्णीयोऽपत्येऽर्थे। गार्ग्यः। वात्स्यः। कात्यः। वाजसनेय्यः। आवट्यः। माण्डूक्यः। पैति
माष्यः। नाडायनः। चारायणः। गार्ग्यायणः। वात्स्यायनः। आमुष्यायणः। आत्रेयः। कापेयः। नैधेयः। गाङ्गेयः। माहे
यः। गौधेयः। नाटेयः। कल्याण्यादेरिनङ् च। काल्याणिनेयः। कौलटिनेयः॥ ॥ श्रीरामचंद्र ॥ ॥

सावर्णयां समाहारो गर्गनडात्रिस्त्रीपितृष्वसृ गर्गनडात्रिस्त्रीपितृष्वसृ आदिर्यस्य स गर्गनडात्रिस्त्रीपितृष्वस्रादिस्तस्मात् इहांने श्रूयमाणः आ
दिशब्दः प्रत्येकं संबध्यते स्त्रीशब्देन स्त्रीप्रत्ययस्य ग्रहणान्नादिशब्द प्रयोगः। इह स्वरूपग्रहणं अत्र्यादिषु तस्य तु नेष्टं सुग्रहात् यथाक्रमेण गर्गा
दिभ्यो यः आपत्येऽर्थे नडादेरायनणऽपत्येऽर्थे अत्र्यादेः स्त्रीप्रत्ययांताच्च एयण् अपत्येऽर्थे पितृष्वस्रादेर्णीयोऽपत्येऽर्थे इह आयनणेयणोरणं
त्वादीप्। अंत्रणकारपाठसामर्थ्यादर्थवद्ग्रहणपरिभाषाया अनित्यत्वात् अन्यथाएयणीयवत् आयनेणेयाविसेवब्रूयादिति गर्गादिर्यथा।

गर्गवत्सव्याघ्रपाद्पुलस्तिवसुमंडुवतंडकपिकतशंकलकण्वअगस्त्यकुंडिनीयाज्ञवल्कपराशरजमदग्निइत्यादिनडादिर्यथा कुंजब्रध्नशंख
शकहइत्यादि अश्वादिर्यथा अत्रिशुभ्रमृकंड अश्वादिमात्र विधवागोधाभ्रवाहणपांडुइत्यादि गर्गादिशब्दास्तदपत्येलाक्षणिकाः साक्षादप
त्येइत्येवानन्तरापत्येगार्गिभिरुक्तत्वात्॰ गर्गस्यापत्यमितिकार्यः॥गार्गेरपत्यंगार्ग्यः वत्सस्यापत्यंवात्स्यः कण्वस्यापत्यंकाण्वः वतंडस्यापत्यंवा ॥
तंड्यः॥अवटस्यापत्यमावट्यः मंडूकस्यापत्यंमांडूक्यः पूतिमाषस्यापत्यंपौतिमाष्यः स्त्रियांतुलदादित्वाद्दीप् हलस्तद्धितस्येतियलोपः
गार्गी।वात्सी।नडादित्वात्॰ स्त्रियामायनणिगार्ग्यायणी कात्यायनी वातंडीवातंड्यायनी मांडूक्यायनी अगस्त्यादित्वादाप्प्रत्यये आवट्या ॥
पौतिमाष्या नडस्यापत्यमितिकार्यः नाडेरपत्यंनाडायनः चरस्यापत्यंचारायणः एषांतानांमित्रंतानांचनडादित्वंबोध्यं॰ गार्ग्यस्यापत्यंगार्ग्याय
णः॥वात्स्यस्यापत्यंवात्स्यायनः॥दाक्षेरपत्यंदाक्षायणः॥ अमुष्यापत्यमामुष्यायणः॥षष्ठ्या अलुगत्र॥ अत्रेरपत्यमात्रेयः॥ कपेरपत्यंका
पेयः॥कल्याण्यादेरिनङ् च॥एषामिनङादेशः स्त्रीप्रत्ययांतत्वाद्ढक्प्रत्ययः कल्याणीसुभगादुर्भगाबंधकीपरस्त्रीकुलटा इत्यादि॰ कल्या
ण्या अपत्ये ढक् ढस्य एय्स्थाने इनङ् आदिस्वरवृद्धिः यस्येतिलोपः कल्याणिनेयः कुलान्यटति भिक्षार्थं हलादेरीषादावितिटेर्लोपः साकु
लटासती [illegible] इनङ् विधीयते असत्यां तु अभिचारार्थं कुलान्यटति तस्या एयण् प्रत्यये॰ कौलटेरः। एयणि तु कौलटेयः सतीपक्षे तु इनङ्॥
[illegible] कौलटेय [illegible] यांधकिनेयः स्यादृद्धुलश्वासतीसुतः॥ कौलटेरः कौलटेयो भिक्षुकी तु सती यदि॥ तदा कौलटि
नेयः [illegible] सुभगाया अपत्यमिति द्वयोरितिवक्ष्यमाणेनोभयपदवृद्धिः॥इनङ् सौभागिनेयः॥ ॥:॥

सि॰ चं॰ पु॰ टी॰ सु॰ १२३

...स्तोःपत्येऽर्थे गोधायाअपत्यं गौधारः नट्या अपत्यं नाटारः यस्येति लोपः पंडो नपुंसकत्वस्यापत्यं पां... गौधेरः नाटेरः पि... दिर्णपः पितुः स्वसेति मातृपितृभ्यां स्वसुरिति षत्वं पितृष्वसुरपत्यं पैतृष्वस्रीयः मातृष्वसुरपत्यं मातृष्वस्रीयः पितृष्वस्रादेरेयणि ढिलोपः पितृष्वस्रादेर्ढलोपः स्यादेयणि अ आदित्वादेयण पैतृष्वसेयः पांड्वोड्यण् पाण्डुशब्दात् ड्यण् स्यादपत्येऽर्थे तत्करणं तु पांड्या भार्यायामित्यत्र ह्रहितेनास्तद्धितस्यारक्तविकारार्थस्येति पुंवद्भावप्रतिषेधार्थं पांडोरपत्यं पाण्ड्यः चटकादैरण् चटकशब्दा... रण् स्यादपत्येऽर्थे प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणमिति परिभाषया स्त्रिया अपि चटकस्य चटकाया वापत्यं चाटकैरः॥

गोधादेरश्णेरणौ।गौधारः।नाटारः।पाण्डारः।गौधेरः।नाटेरः।पाण्डेरः।पैतृष्वस्रीयः।मातृष्वस्रीयः।पितृष्वस्रादेरेयणि ढिलोपः।पैतृष्वसेयः।मातृष्वसेयः।पाण्डोर्ड्यण्।पाण्ड्यः।चटकादैरण।चटकस्यापत्यं चाटकैरः।स्त्र्यपत्ये लुक् चटका।लुग्बहुत्वे क्वचित्प्रत्ययस्य।गर्गाः।वसिष्ठाः।भृगवः।अङ्गिरसः।वत्साः।कुत्साः।गोतमाः।अत्रयः।बिदाः।

स्त्र्यपत्ये लुक्।चटकादेरणो लुक् स्यात् स्त्र्यपत्ये चटका अजादित्वाट्टाप् ११ अङ्गाः।वङ्गाः।कलिङ्गाः।विदेहाः॥ ॥:०:॥ ॥

लुग्बहुत्वे क्वचित् क्वचिदपत्यप्रत्ययस्य लुक् स्यात् तत्कृते बहुत्वे अपत्यस्य लुक्॥ गर्गाः।वत्साः।तत्कृते इति किं प्रियो गार्ग्यो येषां ते प्रियगार्ग्याः॥

स्त्रियां तु न गार्ग्यः स्त्रियः अणो लुक् वसिष्ठाः।भृगवः।अंगिरसः।कुत्साः।गोतमाः।विदाद्यर्वा एयणो लुक् अत्रयः जनपदक्षत्रियवाचिनोऽपत्य नाम॰

प्रत्ययस्य लुक् स्यात् बहुत्वे अणो लुक् अङ्गाः वङ्गाः कलिङ्गाः विदेहाः तद्राजन्यर्थेष्वपत्यप्रत्यया भवंति इक्ष्वाकूणां राजेति निपातनात् ढिलो १२३

पः ऐक्ष्वाकः।पंचालानां राजा पांचालः बहुत्वे लुक् इक्ष्वाकवः पंचाला इत्यादि॥ एवमंगानां राजा आंग इत्याद्यपि बोध्यम्॰॥ श्रीकृष्णः ॥०

स्त्रियामवंतिकुन्तिकुरु शूरसेनादिभ्यो बहुत्वेपि·एभ्योऽपत्यार्थप्रत्ययस्य लुक् स्यात् स्त्रीप्रत्यये·अवंतेरपत्यमावंत्यः स्त्री अवंती कुंतेरपत्यं कौंतेयः स्त्री
कुन्ती·इतोमनुष्यजातेरितीप् कुरोरपत्यं कौरव्यः स्त्री कुरूः·ऊङुतः इत्यूङ्प्रत्ययः शूरसेनस्याऽपत्यं शौरसेनः स्त्री शूरसेनी मद्रस्यापत्यं माद्रः स्त्री मा
द्री जातित्वाद्ङीप्·देवतेदमर्थे देवता च इदम् च अनयोः समाहारो देवते इदं देवतेदं चासौ अर्थश्च देवतेदमर्थस्तस्मिन् देवतेदमर्थे सत्यमानद्र
येऽद्वंद्वस्य विशेषो देवता द्वंद्वांते श्रूयमाणत्वात्प्रत्येकमर्थशब्दः संबध्यते·देवतार्थे इदमर्थे च उक्ता वक्ष्यमाणाः कथ्यमिष्यमाणाः च प्रत्ययाः
स्युः·अण्·ढञ्यत्यः·आयनण्·ईयण्·णीय·आरण·एरण·ढञ्·ऐरण एतेउक्तप्रत्ययाः इन्द्रो देवता अस्येति ऐंद्रं हविः अत्र प्रथमांतात्प्रत्ययो द

स्त्रियामवन्तिकुरुकुन्तिशूरसेनादिभ्योऽबहुत्वेऽपि। अवन्ती कुन्ती।कुरूः।शूरसेनी॥ देवतेदमर्थे॥ देवतार्थे इदमर्थे
चोक्तावक्ष्यमाणाश्च प्रत्ययाः॥ इन्द्रो देवताऽस्य ऐन्द्रम्।सौम्यम्।आग्नेयम्।गृहमेधीयम्।वास्तोष्पतीयम्।अग्नीषो

वतारेति·षष्ठ्यर्थे अन्योक्तप्रत्ययेति तद्धिते नोक्ते संबंधे प्रथमा स्त्रियां तु नण ईप्·ऐंद्री दि ११ मीयम्॥ मरुत्वतीयम्॥ ९६॥
कु सोमो देवताऽस्येति सौम्यं त्यः नद्यादिस्त्रियां ङीप् सौमी ऋक् हलस्तद्धितस्येति यलोपः अग्निर्देवताऽस्येति आग्नेयं एयण्·अणंतत्वाद्ङीप्
आग्नेयी गृहमेधशब्दात् ततः गृहमेधो देवताऽस्येति नयणीयोणितोवेति वृद्धिः गृहमेधीयं गृहमेधं वास्तोष्पतिर्देवताऽस्येति वास्तोष्पतीयं
[illegible] तिः स्यरथ [illegible] मरः॥ वास्तोःपतिरिति॥ वास्तोष्पतिर्वेश्मभूर्वास्तुरस्त्रियामित्यमरः॥ अग्नीषोमौ देवते अस्येति॥
[illegible] यीयं [illegible] सौम्यं मरुत्वान् देवताऽस्येति मरुत्वतीयं मरुत्वं इन्द्रो मरुत्वान्मघवेत्यमरः॥ ॥ ॥ ॥ ॥

अपोनप्त्राद् [illegible] अपोनप्तृ अपांनप्तृ आदेशो ईयघयोः एतयोरपोनप्तृ अपांनप्तृ एतौ स्तः णो घप्रत्यये ईयप्रत्यये च अपोनपाद्देवताऽस्येति अपांन
[illegible] घप्रत्ययः अस्मादेव प्रत्ययः स्यात् देवतार्थे प्रवर्षतीति प्रावृट् नहिवृतीति दीर्घः ओतेः थैत्तु इकः प्रावृषि जातः प्रावृषिकः
प्रावृषेण्य [illegible] त्रयाभूमिवर्षा अथ शरत्स्त्रियामित्यमरः ॥ कस्येकारान्तादेशोऽनिको ब्रह्मा देवताऽस्येति यस्येति लोपात् परत्वादादिवृद्धिः ॥
आयु[illegible]काय्यं हविः कृविहृयोः ह्वयोमिति [illegible]तपदविशेषणं अग्नामरुतौ देवते अस्येति अग्नेर्मरुति वक्ष्यमाणेनेकारादेशः उभयत्र वृद्धिः आग्नि
मारुतमण् स्वाम्यर्थवाचकदेवताद्वंद्वे एव पूर्वोत्तरपदादिस्वरवृद्धिविधायिकमुदाहरणमेतत् तेनेह न स्कन्दविशाखयोरपमिति स्कन्दविशाखौ देवाऽस्य पार्व
तीनंदनः स्कंद इत्यमरः नेन्द्रस्य परस्य उभयत्र प्राप्तोऽपरसैन्द्रशब्दस्य वृद्धिर्न भवति देवताद्वंद्वे सोमेन्द्रौ देवते अस्येति सोमेन्द्रः परस्य अण परस्येति किमण

अपोनप्त्रपांनप्त्रोर्घः अपोनप्तृ अपान्नप्तृ आदेशो ईयघयोः परतः अपोनप्त्रियम् अपोनप्त्रीयम् अपांनप्त्रियम् अपान्न॰
प्त्रीयम् प्रावृषएण्यः प्रावृड् देवताऽस्य प्रावृषेण्यम् कः प्रजापतिर्देवताऽस्य कायम् कविहृष्योः पूर्वोत्तरपदाद्योस्स्वरयोः क्व
चिद्वृद्धिर्भवति ञ्णिति आग्निमारुतम् अग्नेरिद्वृद्धौ वृद्धिमत्युत्तरपदे अग्नेरिदादेशः स्यात् आग्निवरुणम् सौहार्दम् ॥
सौभागिनेयः सौभाग्यम् साक्तुसैन्धवः आनुशातिकम् ऐहलौकिकम् पारलौकिकम् पौर्ववानिकम् ॥ ॥ ❁ ॥ ॥

इन्द्राग्नी देवते अस्येति ऐन्द्राग्नोऽण् यस्येतीकारलोपः दीर्घात्परस्य वरुणस्य वृद्धिर्न भवति देवताद्वंद्वे इन्द्रावरुणौ देवते अस्येति देवताद्वंद्वे पूर्व
स्यत्वात् ऐन्द्रावरुणं मित्रावरुणौ देवते अस्येति मैत्रावरुणम् अगादीर्घात्किं अग्नीवरुणौ देवते अस्येति ईदग्नेः सोमवरुणयोरितीत्वं अग्नेरि
द्वृद्धौ अग्निशब्दस्येत्स्यात् वृद्धिमत्युत्तरपदे देवताद्वंद्वे अलौकिके वाक्ये आत्वमीत्वं च बाधित्वा इत्वविधानोपरे इत्वं न विष्णुशब्दे परे
निशब्दस्येत्वं आग्नावैष्णवम् अण् प्रत्ययः । आग्निवरुणं उभयत्र वृद्धिः सुहृदो भावः सौहार्दमण् सुभगाया अपत्यं सौभागिनेयः ॥ एषुपि

नेडाः हृद्दे सुभगस्य भावः॥ सौभाग्यं ष्यञ् सक्तुप्रधानाः सिंधवः सक्तुसिंधवः सक्तुसिंधुषु भवः साक्तुसैंधवः अण्वृद्धी शतेन क्रीतः शतिकः शतिकमनुगतो
अनुशतिकः अनुशतिकस्येदं आनुशातिकं अण्वृद्धी इहलोके भवं ऐहलौकिकं इकः परलोके भवं पारलौकिकं॥ ॥णितो वा अणादयः कादयश्च णितो वा
भवन्ति अणादीनां णित्वसिद्धे पक्षे निषेधार्थवचनं कादीनामणित्वसिद्धे पक्षे विधानार्थं स च क्वचिन्नित्यनिषेधः क्वचिद्वैकल्पिकः क्वचिदनिषेध एव श्वसुरपत्यं
श्वशुरीयः णीयः श्वशुरस्यापत्यं यस्येत्यलोपः श्वशुर्यः पितुरिदमिति क्वचित्स्वरवद्यकार इति स्वरत्वात् ० रत्वं पित्र्यं यत् गोरिदं गव्यं यत् स्वरत्वादेव पयसि भव-
यं कुले भवं कुल्यं यत् तस्येदं तदीयं तवेदं ममेदं त्वन्मदेकत्वे इति त्वदादेशः तदीयं मदीयं अन्यस्यदुक् अन्यशब्दस्य दुगागमो भवति णीये अषष्ठीतृतीयांतस्य॥

णितो वा। उक्ता वक्ष्यमाणाश्च प्रत्यया णितो वा श्वशुरीयः श्वशुरस्यापत्यं श्वाशुर्यः पित्र्यम् गव्यम् पयस्यम् कुल्यम् तदीयम्।
त्वदीयम् मदीयम् अन्यस्यदुक् अन्यदीयम् पितुर्भ्रातरि व्यः पितुर्भ्राता पितृव्यः मातुर्भ्रातरि डुलः मातुलः मातृपितृभ्यां
वेदं भोजयति यं यं ब्राह्मणं जानाति लभते विचारयति वा तं तं सर्वं भोजयतीत्यर्थः यावति विन्दजीवोः यावद्वेदं भुङ्क्ते यावल्लभते तावदि
त्यर्थः यावज्जीवमधीते विप्रः कर्म्मणोश्चर्मोदरयोः पूरे चर्म्मपूरं स्तृणाति उदरं पूरं भुङ्क्ते कर्म्मण्युपपदे पूरेरूलोपश्च वा वर्षप्रमाणे गम्ये
गोष्पदं प्र वृष्टो देवः गोष्पदपूरं म्वा मूषिकाविलप्रम् मूषिकाविलपूरं म्वा ॥ ॥ ॥ ॥

साकल्यन्तस्मिन् दृशिर्प्रेक्षणे विद ज्ञाने यावति विंदजीवोः यावच्छब्दे उपपदे विद्लृ लाभे जीव प्राणधारणे आभ्यां णमुल् स्यात् कर्मण्योश्च र्मोदरयोः पूरे चर्मो
दरयोः कर्मणोरुपपदयोः पूरी आप्यायने अस्मात् णमुल् स्यात् चरमपूरं स्तृणाति आच्छादयतीत्यर्थः कर्मण्युपपदे पूरेरूलोपश्च वा वर्षप्रमाणे गम्ये णमुल् स्यात्
स्य ऊलोपश्च वा वर्षप्रमाणे गम्ये वर्षस्य वृष्टेः प्रमाणं वर्षप्रमाणं तस्मिन् ॥ ॥ ॐ नमो भगवते वासुदेवाय नमो नमः ॥ ॥ ॥

चैलार्थेषु ...म्सूपपदेषु क्नोपेः ...णे चैलमर्थोयेषां तानि चैलार्थानि तेषु कर्मसूपपदेषु क्नूयी शब्दे उंदे च ण्यंतादस्मात् णमुल् स्यात् क्नूयी धातोः प्रयोजक णिजंतस्य
यहुजे· ह्रीह्लीक्नूयीस्मायीनामिति पुक् यवयोर्वसेहकारे चेति यलोपः पुकीति गुणः क्नोपयीति ण्यंतात् णमुल् णेरिति णिलोपः चेलक्नोपं पयसा ह्रीकरोतीति चेलक्नोपं नि
र्मूलसमूलयोः कषः निर्मूलसमूलयोः कर्मणोरुपपदयोः कष हिंसायामस्माद्धातोर्णमुल् स्यात्· शुष्कचूर्णरूक्षेषु कर्मसूपपदेषु हनादिभ्यो णमुल् स्यात्· हनादीनामेव
यथाविध्यनुप्रयोगश्च कर्तव्यः समूलोपपदाद्धंतेर्णमि कृते हनो घः इति घत्· ततोऽत उपधाया इति वृद्धिः समूलघातं जीवोपपदात् ग्रह्णातेर्णमि कृते वृद्धिः जीवग्राहं जी

चैलार्थेषूपपदेषु कर्मसु क्नोपेर्वर्षप्रमाणेणमुः चेलक्नोपं वृष्टो देवः वस्त्रक्नोपं वसनक्नोपम् निर्मूलसमूलयोः कषः कषादिषु यथावि
ध्यनुप्रयोगः प्रयोक्तव्यः अत्र प्रकरणे पूर्वकाल इति न सम्बध्यते ऽसम्भवात् प्रतीतिश्च निर्मूलकाषङ्कषति समूलकाषङ्कषति निर्मूलं
समूलं कषतीत्यर्थः शुष्कचूर्णरूक्षेषु कर्मसूपपदेषु पिषः शुष्कपेषम्पिनष्टि शुष्कम्पिनष्टीत्यर्थः चूर्णपेषम् रूक्षपेषम् समूलाकृतजीवे
षु कर्मसु हन् कृञ् ग्रहां णमुः समूलघातं हन्ति समूलं हन्तीत्यर्थः अकृतकारं करोति अकृतं करोतीत्यर्थः जीवग्राहं गृह्णाति जीवं गृह्णातीत्य
र्थः करणे हनः पादघातं हन्ति पादेन हन्तीत्यर्थः ॥ स्नेहने पिषः उदपेषं पिनष्टि केन पिष्टेत्यर्थः हस्तार्थे करणे वर्तिग्रहोः हस्तवर्तम्वर्त
यति करवर्तम् हस्तेन गुटिकां करोतीत्यर्थः ॥ हस्तग्राहं गृह्णाति करग्राहं पाणिग्राहम् धनार्थे करणे पुषः धनपोषं पुष्णाति स्व ॥ ४ ॥ कषादिषु यथाविध्यनुप्रयोगः ॥

वतीति जीवः नाम्युपधादिति कः जीवं तं गृह्णातीत्यर्थः करणे हनः करणकारकोपपदाभ्यां हन्तेर्णमुस्यात्· हन्तेरनुप्रयोगश्च नित्यसमासार्थमिदं सूत्रम्भ
भिन्नधातुसंबंधेषु हिंसार्थानामिति वक्ष्यते· स्नेहने पिषः स्नेहनकारणोपपदात् पिष्लृ संचूर्णने ऽस्मात् नमस्यात्· स्निह्यते येन तत् स्नेहनं तस्मिन्नुपपदे वा सदा हन
धिषु परे षु उदकस्योदादेशो वक्तव्यः इत्युदादेशः उदपेषं हस्तार्थे करणे वर्तिग्रहोः हस्तार्थकरणकारकोपपदाभ्यां वर्तिग्रहिभ्यां णमुस्यात्· अनयोर्यथा वि
ध्यनुप्रयोगश्च· वृतु वर्तने ण्यंतादस्मात् णमि कृते णेरिति णिलोपः हस्तवर्तं हस्तग्राहं गृह्णातीत्यर्थः ॥ ॥ श्रीरामचन्द्राय नमः ॥ ॥ ः०ः ॥

धनार्थेकरणेपुषः धनपर्यायोविशेषेचोपपदेपुषपुष्टावस्मात्णमुस्मात्‌ अनुप्रयोगश्च· आधारेवंधः अधिकरणोपपदाद्बंधवधनेस्मात्णमुस्मात्‌ अनुप्रयोगश्च·
संज्ञायांवभ्राते: संज्ञायांवाच्यायामस्मात्णमुस्मात्‌ कर्त्रोर्जीवपुरुषयोर्नशिवहोः जीवपुरुषकर्तकोपपदाभ्यांणम्‌ अदर्शनेवहप्रापणेआभ्यांनमुस्मात्तथा
विध्यनुप्रयोगश्च उर्द्धेकर्तरिशुषिपूरेः उर्द्धवत्रोपपदाभ्यां आभ्यांनमुस्मात्‌ अनयोरनुप्रयोगश्च ऊर्द्धशोषंशुष्यति वृक्षादिः ऊर्द्धएवतिष्ठन्‌ शुष्यतीत्यर्थः॥:

आधारेवन्धः चक्रबन्धंबध्नाति चक्रेबध्नातीत्यर्थः संज्ञायाम्बध्नातेः क्रौञ्चबन्धंवद्धः मयूरिकाबन्धंवद्धः अट्टालिकाबन्धम्बद्धः बन्ध
विशेषाणांसञ्ज्ञाएताः कर्त्रोर्जीवपुरुषयोर्नशिवहोः जीवनाशंनश्यति जीवोनश्यतीत्यर्थः पुरुषवाहंवहति पुरुषोवहतीत्यर्थः ऊर्द्धेक
र्तरिशुषिपूरोः ऊर्द्धशोषंशुष्यति ऊर्द्धःशुष्यतीत्यर्थः॥ऊर्द्धपूरंपूर्य्यते ऊर्द्धःपूर्यतेइत्यर्थः उपमानेकर्मणिकर्तरिच घृतनिधायंनिहितं
जलम्‌ घृतमिवसुरक्षितमित्यर्थः॥ अजनाशंनष्टः॥ अजइवनष्टइत्यर्थः कषादिषुयस्मात्णम्‌ विहितः सएवानुप्रयोक्तव्यः॥तथैवो
दाहृतम्‌ उपदंशस्तृतीयायाम्‌ इतःप्रभृतिपूर्वकालइतिसम्बध्यते मूलकोपदंसंभुङ्क्ते मूलकेनोपदंशम्‌ दंश्यमानस्यमूलकस्यभु
जिप्रतिकरणत्वात्तृतीया पद्यप्युपदंशिनासहनशासम्बन्धस्तथाप्यार्थोऽस्त्येव हिंसार्थानाञ्चानुप्रयोगधातुनासमानकर्म्मका
णान्तृतीयान्तउपपदे दण्डोपघातङ्गाःकलयति दण्डेनोपघातम्‌ दण्डताडम्‌ दण्डेनताडंवा समानकर्म्मकाणाङ्किम्‌ दण्डेनो
पचोरमाहस्यगाःकलयतीत्यर्थः॥ ॥ ❁ ॥ ॥ ऊर्द्धपूरंपूर्यते·ऊर्द्धमुखएवघटादिवर्षोदकादिनापूर्णोभवति·उपमानेकर्मणि

कर्तरिचउपमानेवाचकेकर्तरिकर्मणिचोपपदेधातोर्णमुस्मात्‌·तसैवधातोरनुप्रयोगश्च·उपदंशस्तृतीयायांतृतीयांतोपपदादुपदंशतेर्णमुस्मात्॥
मूलकोपदंशवाक्यमपिच मूलकेनोपदंशंहिंसार्थानामनुप्रयोगश्चसमानकर्मणांतृतीयांतेउपपदेतृतीयांतोपदादनुप्रयोगधातुनासहसमानकर्मका
हिंसार्थ[illegible]·हन्तेर्नेमि[illegible]हनोघदितिघत्वहद्भिःदण्डोपघातंगाःकालयतिकलविक्षेपेचुरादिः प्रेरयतीत्यर्थः॥ ॥ ❁ ॥ ॥ ९

वै० कु० टी० सु० ५३

दंडताडेत ... पदे ... तृतीयायांचोपपदेउपपीडरुधिकर्षः सप्तमीतृतीयांतोपपदेभ्यः उपपूर्वेभ्यः पीडादिभ्योणमुस्यात् द्वंद्वस्त्वेपीडादीनांसमाहारद्वंद्वं
तत्स्यास्पपूर्वःपीडारुधकर्षः इत्युतरपदलोपीसमासः कर्तव्यःसूत्रेपुंस्त्वंसौत्रंश्लेषंपंचम्यर्थेप्रथमाचज्ञेयापीडपीडायांरुधिरआवर्णेकृषविलेखनेअयंभौवादिकएव
गृह्यते·शुणस्पहितस्यरूपेरपानिर्देशात् ...तदादेस्तु दासः यद्यपिविलेखनेएवतौदादिकोपिपठ्यतेतथापिसूत्रविषयकविलेखनेएवतौदादिकःप्रयुज्यते एवं
चतौदादिकात्कर्षःकपूप्रत्ययएवभवति शेतेउपकृष्णहलेनोपकृष्येतितृतीयासप्तम्योरुपपदयोस्सन्निकर्षेधातोस्तृतीयासप्तम्योरुपपदात् धातोर्णमुस्यात् ०

सप्तम्यान्तृतीयायाश्चोपपदेउपपीडरुधकर्षः पार्श्वोपपीडंशेते पार्श्वयोरुपपीडम् पार्श्वाभ्यांवोपपीडम् व्रजोपरोधङ्गाःस्थापय ०

ति व्रजेनोपरोधम् व्रजेउपरोधंवा पाण्युपकर्षन्धानास्सङ्क्रामति पाणिनोपकर्षम् पाणावुपकर्षम् तृतीयासप्तम्योउपपदयोस्सन्नि

कर्षेधातोः केशग्राहंयुध्यन्ते केशेषुगृहीत्वा हस्तग्राहम् हस्तेनगृहीत्वा तृतीयासप्तम्योःप्रमाणेगम्येधातोः द्व्यङ्गुलोत्कर्षंख

ण्डिकाञ्छिनत्ति द्व्यङ्गुलेनोत्कर्षम् अपादानेद्वितीयाश्चत्वरयाङ्गम्यमानायान्धातोः शय्योत्थाय धावति यष्टिग्राहंयुध्यन्ते लोष्ट

सन्निकर्षेगम्येसतिकर्षस्संबन्धः तृतीयासप्तम्योःप्रमाणेगम्येधातोः तृतीयासप्तम्युपपदात् धातोर्णमुस्यात् प्रणम्येगम्येद्व्योरंगुल्योःसमाहारोद्व्यंगुलंद्व्यंगुलोत्कर्षंद्व्यंगु
लेनोपकृष्यपरिच्छिद्येत्यर्थः खंडिकाञ्छिनत्तिह्रस्वःखंडःखंडिकातां अपादानेद्वितीयाचत्वरयागम्यमानायांधातोः पंचमीद्वितीयांतोपपदाद्धातोर्णम् त्वरयांग रा० म०
म्यमानायांशय्योत्थायंधावतिशय्यायाउत्थायधावतीत्यर्थः आंतोयुगितियुकूउदःस्थास्तंभोरितिसलोपःयष्टिग्राहंयुध्यन्ते एवंखलुयुद्धायत्वरतेयष्ट्या ५३
दिमपिगृहीत्वाधावंतिनायुधंप्रतीक्षंतेइत्यर्थः ॥ ॥ ॥ ॥

अपगुरो वाणम्बोतः उरीडच्चमे इत्यस्यैकारस्यात्वं वा स्यात् णमिप्रत्यये अस्यपगारं युध्यंते असिमुद्यस्येत्यर्थः अध्रुवे स्वांगे द्वितीयांते धातोः द्वितीयांतात् अध्रुवस्वांगोपप
दात् धातोर्णमुस्यात् परिक्लिश्यमाने द्वितीयांते स्वांगे धातोः सर्वतो बाध्यमाने स्वांगे द्वितीयांते उपपदे सति धातोर्णमुस्यात् पिष्लृ संचूर्णने उरः प्रतिपेषं द्वितीयांते
विशिपतिपदिस्कंदां व्याप्यमानासेव्यमानयोर्गम्यमयोः द्वितीयांतोपपदेभ्यो विश्यादिभ्यो णमुस्यात् व्याप्तावर्थे पौनःपुण्ये चार्थे गम्ये वीप्सायां पदं द्विरिति क्रियासम
अपगुरो वाणम्बोतः अस्यपगारमस्यपगोरम्बा युध्यन्ते अध्रुवे स्वाङ्गे द्वितीयान्ते धातोः भ्रूविक्षेपं कथयति भ्रुवं विक्षेपम् अध्रुवे
किम् शिरउत्क्षिप्य कथयति येन विना न जीवनं तत् ध्रुवम् परिक्लिश्यमाने स्वाङ्गे द्वितीयान्ते धातोः उरःप्रतिपेषं युध्यन्ते कृत्स्नमुरः।
पीडयित्वेत्यर्थः॥ उरो विदारं प्रतिचस्करे नखैः॥ ध्रुवार्थमिदम् द्वितीयान्ते विशिपतिपदिस्कंदाम्व्याप्यमानासेव्यमानयोः गेहा
दिद्रव्याणां विश्यादिक्रियाभिस्साकल्येन सम्बन्धो व्याप्तिः क्रियायाः पौनःपुन्यसमासे वा गेहानुप्रवेशमास्ते एवं गेहानुप्रया
तम् गेहानुप्रपादम् गेहानुस्कंदम् असमासे तु गेहस्य णमन्तस्य च पर्यायेण द्वित्वम् गेहंगेहमनुप्रवेशम् गेहमनुप्रवेशमनु
प्रवेशनम् कालेषु द्वितीयान्ते षूपपदेषु क्रियाव्यवधाने वर्तमानयोरस्यतितृषोः द्व्यहात्यासम्ज्ञाः पाययति द्व्यहमत्यासं द्व्यह
तर्षम् असमनेन तर्षणेन च गवां पानक्रियाव्यवधीयते अद्य पाययित्वा द्व्यहमतिक्रम्य पुनः पाययतीत्यर्थः॥ ९॥ ४
मिहारे इति हि स्वतुनभवति समासेनैव वीप्सासमाहारयोरुक्तत्वात् यद्यपि पौनःपुन्येण मुक्त एव तथापि द्वितीयांतस्योपपदसंज्ञार्थ समासे वामिति पुनर्विधिः
स[?]गेहानु[?]गेहंगेहमनुप्र[?]नुप्रवेशमिति च क्रियांतरेषु कालेषु द्वितीयांतरेषूपपदेषु क्रियाव्यवधाने वर्तमानयोरस्यतितृषोः क्रियामंतरयति
व्यवधाने[?]तः[?]षु क्रियांतरत्वेषु कालेषु कालवाचिषु शब्देषु द्वितीयांतेषूपपदेषु सत्सु क्रियाव्यवधाने वर्तमानाभ्यामसुक्षेपणे ञितृषापिपासाया

वं॰कृ॰ नाम्नि... ...तेः आदिशिग्रहोः ॥ द्वितीयान्ते नामशब्दोपपदाभ्यां आङ्पूर्वकात् दिशि अतिसर्जने ग्रहउपादाने आभ्यां नमुः स्यात् नाम्नि द्वितीयान्ते आभ्यां णमु॰
टी॰सु॰ स्यात् अव्यये यथाभिप्रेताख्याने कृञः क्त्वाणमौ अव्ययपूर्वपदात्करणे क्त्वाणमौ स्तः अयथाभिप्रेताख्याने येयथाभिप्रेतं तथाख्यानमित्यर्थः अप्रियस्य नीचैः
५४ कथनं यथाभिप्रेताख्यानं तद्विपरीतं अयथाभिप्रेताख्यानमिति तिर्यगुपपदे समाप्तौ कृञः क्त्वाणमौ तिर्यक्शब्दोपपदात्करोतेः क्त्वा णमौ स्तः समाप्तौ गम्य
मानायां समाप्तौ किं तिर्यक्कृत्वा काष्ठं गतः अग्रतः स्थितं पार्श्वतः कृत्वा गत इत्यर्थः स्वाङ्गे तस्प्रत्यये कृभ्वोः तस्प्रत्ययान्ते स्वाङ्गे उपपदे कृञ् करणे भूसत्तायां

नाम्न्यादिशिग्रहोः नामादिसमासे नामग्राहमाह्वयति अव्यये यथाभिप्रेताख्याने कृञः क्त्वाणमौ वा अयथा
भिप्रेताख्यानं नाम अप्रियस्योच्चैः प्रियस्य नीचैः कथनम् उच्चैः कृत्य उच्चैः कृत्वा उच्चैःकारम्वा अप्रियमाचष्टे नीचैः कृत्य नीचैः
कृत्वा नीचैःकारम्वा प्रियम्ब्रूते तिर्य्यगुपदेसमाप्तौ कृञः क्त्वाणमौ वा तिर्य्यक्कृत्य गतः तिर्य्यक्कृत्वा तिर्य्यक्कारम् समाप्यगत इत्य
र्थः समाप्तौ किम् तिर्य्यक्कृत्वा काष्ठं गतः स्वाङ्गे तस्प्रत्यये कृभ्वोः मुखतः कृत्य गतः मुखतः कृत्वा मुखतः कारम् मुखतो भूय
गतः मुखतो भूत्वा मुखतो भावम् नाधार्थप्रत्यये च्व्यर्थे कृभ्वोः क्त्वाणमौ वा अनाना नाना कृत्य नाना कृत्वा नानाकारम् विना
कृत्य विनाकृत्वा विनाकारम् नानाभूय नानाभूत्वा नानाभावम् अनेकं द्रव्यमेकं कृत्वा एकधाकृत्य एकधाकृत्वा एकधाकारम्
॥ एकधाभूत्वा ॥ एकधाभावम् ॥ ॥

माभ्यां णमुः स्यात् तस्प्रत्ययो यस्मात्तत् तस्प्रत्यये किं मुखेन तस्यनीतिमुखतः कृत्वा गतः तमु
उपदेशे पेः स्मात् किं पिहते धातुत्वादि हत्वत्वसोः सावित्ति दीर्घो न भवति नाधार्थप्रत्ययान्ते च्व्यर्थे कृभ्वोः क्त्वाणमौ नाधार्थप्रत्ययान्ते च्व्यर्थे भूपपदे कृ —— राम॰
भूभ्यां क्त्वाणमौ स्तः विनञ्भ्यां नानाञौ विनिनाप्रत्ययः संख्यायाः प्रकारे धा इति धाप्रत्ययः द्वित्रिभ्यां मेधा धमुञ्नौ चेति एकाद्धमुञ्वेति च नाधार्थप्रत्ययाः ॥ ५४

अकर्मकाच्च सर्पिषोजानीते सर्पिषातुपायेनप्रवर्ततेइत्यर्थः अनुपसर्गात् ज्ञः अकर्मकाच्चेत्येवसिद्धेः सकर्मकार्थमारंभः अनुपसर्गात्किंस्वर्गलोकंनप्रजानातिकथंत
र्हिइत्यंवपः पूर्वंमवालुलोचेततततोऽनुजज्ञेगमनंसुतस्येतिभट्टिः कर्मणिलिट्रूपेणेति विपरिणामः संप्रतिभ्यामनाध्यानेउत्कंठापूर्वकंस्मरणमाध्यानं शतंसंजानी
ते अवेक्षतेइत्यर्थः शतंप्रतिजानीते अंगीकरोतीत्यर्थः अनुपसर्गाद्वा अनुपसर्गात्परस्यज्ञोवातस्मात् वेः शब्दकर्मणः कृञः शब्दंविकुरुते उच्चारयतेत्यर्थः ॥
शब्दकर्मणः किंचित्तंविकरोतिकामः अकर्मकाच्चवेरकर्मकात् कृञ आत्तस्मात् वि कुर्वतेसैंधवाः वाजिनोविकारंलभंतेइत्यर्थः भासनोपसंभाषाज्ञानप्र

अकर्मकाच्च सर्पिषोजानीते सम्प्रतिभ्यामनाध्याने शतंसञ्जानीते शतम्प्रतिजानीते अनाध्यानेकिम् मातरंसञ्जानाति॥ ॥
अनुपसर्गाद्वा गांजानाति जानीतेवा भासनोपसम्भाषाज्ञानयत्नविमत्युपमंत्रणेषुवदः शास्त्रेवदते भृत्यानुपवदते शास्त्रे
वदते क्षेत्रेवदते गेहेवदते उपवदते ब्राह्मणंपरदारान् मनुष्यादीनांसम्भूयोच्चारणे सम्प्रवदन्तेब्राह्मणाः व्यक्तवाग्विषयाद
नु पूर्वादकर्मकात् अनुवदतेश्रुतिकठःकलापस्य ॥ ॥ एयत्नविमत्युपमंत्रणेषुवदः वदतेएतस्मादेष्वर्थेषुशास्त्रेवदतेभासमानोब्र

वीतीत्यर्थः॥भृत्यानुपवदतेसांत्वयति उपसंभाषासांत्वनंशास्त्रेवदतेज्ञानंवदतिइत्यर्थः क्षेत्रेवदते क्षेत्रेप्रयत्नंवदतेइत्यर्थः॥गेहेविवदंतेविवादंवदं
तिइत्यर्थः उपवदतेप्रार्थयते उपमंत्रणमुपच्छंदनं एषुकिंकिंचिद्वदति मनुष्यादीनांसंभूयोच्चारणेवदतेएतस्मात् मनुष्यादीनांसहोच्चारणेर्थेव्यक्तवा
ग्विषयादनुपूर्वादवकर्मकात् एतादृशाद्वदतेएतस्मात् व्यक्तवाक्विषयोयस्यसव्यक्तवाग्विषयस्तस्मात् अनुवदतेकठः कालापस्यवेदशाखावच
नावपिकस्यकलापशब्दावत्र तद्ध्येतरिवर्तेते अनुः सादृश्यंकलापस्येतिसंबंधेषष्ठी अकर्मकात् किंउक्तमनुवदतिव्यक्तवाग्गितिकिं अनुवदतिवी

वं॰प्रा॰ वाग्विरुद्धोक्तौ विरुद्धोक्तिरूपेव्यक्तवाचांसमुच्चारणेर्थेवदेर्धात्‌ अप्राप्तविभाषेयं अवाद्ग्रिरतेः गिरतेरितितौनादिकस्यैवग्रहणंगणात्तेरवपूर्वस्यप्रयोगोनास्तीति॥भाष्यो
टी॰पु॰ क्तेः समः प्रतिज्ञाने समोगिरतेरात्मस्यात्‌ प्रतिज्ञानेर्थेसंगिरतेप्रतिजानीते इत्यर्थः प्रतिज्ञानेकिंसंगिरतिग्रासं उदश्चरः सकर्मकात्‌ धर्ममुच्चरतउदश्चरंग्धगच्छतीत्य
७७ र्थः सकर्मकात्‌ किंवाष्पउच्चरति उपरिष्टाद्गच्छतीत्यर्थः समस्तृतीयायुक्तात्‌ तृतीयांतयुक्तात्‌ समश्चरेरात्मस्यात्‌ रथेनसंचरतेप्रवधानेपिरथेनसमुच्चरते दाणश्चसा
चेच्चतुर्थ्यर्थे॰ तृतीयांतयुक्तात्‌ समोयच्छतेरात्मस्यात्‌ सातृतीयाचेच्चतुर्थ्यर्थेभवति दास्यासंयच्छतेदास्यैधनंददातीत्यर्थः दास्येति सम्प्रदानेतृतीयाउपाद्यमः

वाग्विरुद्धोक्तौ विप्रवदन्ति विप्रवदन्तेवावादिनः अवाद्ग्रिरतेः अवगिरते समःप्रतिज्ञाने शब्दन्नित्यंसंगिरते उदश्चरःसकर्म
कात्‌ धर्ममुच्चरते समस्तृतीयायुक्तात्‌ रथेनसंचरते दाणश्चसाचेच्चतुर्थ्यर्थे दास्यासंयच्छते कामुकःउपाद्यमःस्वीकारे
भार्यामुपयच्छते यमस्सिकिद्वा विवाहेरामतामुपायत उपायंस्तवा वेश्शब्दकर्मणःकृञः शब्दम्विकुरुते अकर्मकाच्च
विकुर्वतेसैन्धवाः ज्ञाश्रुस्मृदृशांसान्तानाम्‌ जिज्ञासते शुश्रूषते सुस्मूर्षते दिदृक्षते॥ ॥ ः॰ः ॥ ॥ श्री॰ ॥

स्वीकारे उपाद्यमेरात्मस्यात्‌ स्वीकारोविवाहस्तस्मिन्नर्थे यमःसिःकिद्वा यमे परःसिप्रत्ययोवाकित्स्यात्‌ विवाहेर्थेलोपस्त्वनुदात्तनामितिमलोपः उपायत रा॰
पक्षेउपायंस्तज्ञाश्रुस्मृदृशांसांतानां सन्प्रत्ययांतेभ्यएभ्यआत्स्यात्‌ अपहृवेज्ञइत्यादिनाज्ञ धातोःसमोगमृच्छीत्यनेनश्रुदृशिभ्यांचात्मनेपदेकृते ततःसन्प्रत्ययः ७७
सांतात्‌ पूर्ववदात्‌ इत्यनेनतदात्मनेपदंसिद्धमेवपुनर्ग्रहणंविषयांतरेप्यात्मनेपदार्थम्‌॰॥ ॥ ॐनमःशिवायइति ॥ ॥ ः॰ः ॥ ॥ ॐ ॥

अनोर्ज्ञानातेर्न अनोः संतात् ज्ञानातेर्न्न स्यात् प्रत्याङ्भ्यां श्रुवः आभ्यां संतात् श्रृणोतेर्न्न स्यात् स्वराद्यन्तोपसर्गाद्युजेरयज्ञे स्वरादेः स्वरान्ताच्चोपसर्गाद्युजेरेतत् नतु
यज्ञपात्रेर्थे समः क्ष्णुवः समः क्ष्णुतेरेतत्स्यात् भुजोऽपालने अभ्यवहारे इति वक्तव्ये अपालने इति पर्युदासग्रहणं प्रयोजनं इत्यर्थ रोधादिकस्यैव भुजेर्ग्रह
णमित्येके अभ्यवहाराद्यर्थातेरुपभोगादावप्यात्मनेपदं भवतीति द्वितीयं निषेधस्य निषेधः पर्युदासः भुजेरन्नस्यात् पालनेऽपालनेत्वात् उपभोगार्थे तु इष्टो

अनोर्ज्ञानातेर्न्न अनुजिज्ञासति पुत्रम् प्रत्याङ्भ्यां श्रुवः प्रतिशुश्रूषति आशुश्रूषति स्वराद्यन्तोपसर्गाद्युजेरयज्ञे प्रयुङ्
क्ते उद्युङ्क्ते अयज्ञे किम् पात्राणि प्रयुनक्ति समः क्ष्णुवः संक्ष्णुते शस्त्रं भुजोऽपालने ओदनम्भुंक्ते पालने तु महीं भुनक्ति
गृधिवंचिभ्यां प्रनाभ्याम्प्रतारणे माणवकम्वञ्चयते गर्द्धयते अपाह्नुदः न्यायमपवदते ॥ ॥ ॥ ॥

जनो दुःखशतानि भुंक्ते इतीह भुजेरुपभोगार्थः उपभोग इत्युपलक्षणं तेन बुभुजे पृथ्वीपालः पृथ्वीमेव केवलामित्यत्रात्मसात् करणमर्थः पृथ्वीं बुभुजे
स्वाधीनं चकारेत्यर्थः भुजकौटिल्ये इति तु तुदादेः स्वयमेव पाणिं विभुजति अपालने किं महीं भुनक्ति गृधिवंचिभ्यां गृधिवंचिभ्यां प्रतारणे परगामिफलार्थमिदम्
आत्मनेपदं प्रतारणे किं श्वानं गर्द्धयति अभिकांक्षामुत्पादयति अहिं वंचयति इति वर्जयतीत्यर्थः अपाह्नुदः अपाह्नुदतेरेतत्स्यात् अनुपसर्गाज्ज्ञः पूर्वम

चं०आ० कर्म्मव्यतिहारे धातोः क्रियाविनिमयेऽर्थे धातोः कर्त्तर्यात्मनेपदं स्यात् व्यतिभवते अन्यस्य योग्यं भवनमन्यतरः करोतीत्यर्थः एतदाने व्यतिराते नगतिहिंसार्थे
टी०स्तु पठजल्पहसादितद् इतरेतरान्योन्यपरस्परोपपदाच्च नगतिहिंसार्थेभ्यः पठजल्पहसेभ्य इतरेतरान्योन्यपरस्परोपपदेभ्य श्च धातुभ्यः आन्नस्यात् इत्यात्
७८ अनुपराभ्यां कृञः पं आत्मगामिफलेपरस्मैपदार्थमिदम् अभिप्रत्यतिभ्यः क्षिपः क्षिपप्रेरणे स्वरितेतः तस्यात्मगामिफलेपरस्मैपदार्थमिदं प्राद्वहः प्राद्वह

समुदाङ्भ्यो यमोऽग्रन्थे व्रीहीन्संयच्छते धान्यान्स्वीकरोतीत्यर्थः भारमुद्यच्छते भारमुद्वहतीत्यर्थः वस्त्रमायच्छते वस्त्रमादध
तीत्यर्थः अग्रन्थे किम् वेदमुद्यच्छति अधिगन्तुमुद्यमं करोतीत्यर्थः कर्म्मव्यतिहारे धातोः व्यतिभवते व्यतिराते नगतिहिं
सार्थपठजल्पहसात् व्यतिगच्छन्ति व्यतिपठन्ति व्यतिघ्नन्ति व्यतिजल्पन्ति व्यतिहसन्ति इतरेतरान्योऽन्यपरस्परोपपदाच्च न इतरे
तरस्य अन्योऽन्यस्य परस्परस्य वा व्यतिलुनन्ति अनुपराभ्यां कृञः पं अनुकरोति पराकरोति अभिप्रत्यतिभ्यः क्षिपः पम् अभिक्षिप
न्ति प्रतिक्षिपन्ति अतिक्षिपन्ति प्राद्वहः पम् प्रवहन्ति परेर्मृषश्च परिमृष्यति परिवहति ॥ इतिपदव्यवस्था ॥ ❈ ॥

तेः पं स्यात् स्वरितेत्वात् पदद्वये प्राप्ते आरंभः मृष आमर्षणे दिवादि स्तुरादिश्च परिमृष्यति नेरभावे परिमर्षति चकारात् वहेरपि पं भवति परिवहतीत्या
ङ्व्यपरिभ्यो रमः भ्वादौ व्याख्यातमिदं अकर्मकाद्वा अकर्मकाद्रमतेर्वा पं स्यात् उपाद्विसेवउपरमिति उपरमते वा निवर्त्तते इत्यर्थः बुधयुधनशजनेङ् एम०
प्रुद्रुस्रुभ्यो ण्यन्तेभ्यः पं इङ् को जीनामिस्यात्त्वं अध्यापयति प्रावयति प्रापयतीत्यर्थः द्रावयति विलापयतीत्यर्थः स्रावयति स्यंदयतीत्यर्थः ॥ इतिपद ७८

अथ भावकर्मणोर्लडादयः यक् चतुर्षु भुविकर्मणीति चाद्भुवीत्यतोनुवृत्तं अव्यवहितमपि कर्तरीतिनानुवर्तते उत्तरसूत्रेकर्तृग्रहणात् आख्यातप्रकरणादादितश्चतु
र्विधेष्वाख्यातेषु चतुर्शब्दोस्तितेन भावार्थकेषु कर्मार्थकेषु चतुर्षुपरतो धातोर्यक् स्यात्॰ आद्भुविकर्मणि भवनंभूः संपदादित्वात्क्विप्तस्यांभुविसुद्धेधात्व
र्थसाध्यरूपेभावेस्वार्थेइति फलितम् घनर्थोभावस्तुसिद्धरूपः उक्तंचक्रियायासिद्धतावस्थासाध्यावस्थाचकीर्तिता सिद्धता द्रव्यमिच्छंतितत्रैवेच्छंतिघ
ञ्विधिं १ भावोभावनाउत्पादना क्रियासाच धातुत्वेनसकल धातुषुवाच्यावर्तते उक्तंच व्यापारोभावनासैवोत्पादनासैवचक्रियेति उत्पत्त्यनुकूलो-
व्यापारइत्यर्थः तत्रसिद्धरूपोभावः घञादिवाच्यः तस्यतुसत्त्वरूपत्वमिष्टमेवेति उक्तंच भाष्यकृता कृदभिहितोभावोद्रव्यवत्प्रकाशतेइति द्रव्यधर्मा

यक् चतुर्षु धातोर्भावेकर्म्मणिचयक् प्रत्ययस्तिवादिषुचतुर्षुपरतः आद्भुविकर्म्मणि अकर्म्मकाद्भावेसकर्म्मकाच्चकर्म्म
ण्याद्भवति भावस्यैकत्वादेकवचनमेव नामाद्यविषयत्वेऽपिप्रथमातिक्रमेकारणाभावात्प्रथमः भूयते भूयेत भूयतां अभूयत

त्वलिंगसंभावस्त्वाख्यातवाच्यस्तस्यासत्त्वरूपत्वेद्वित्वाद्यप्रतीतेर्नद्विवचनादिभाष्येतुआसंते आशिकाशय्यंतेइतिशायिकाइत्यत्रधा॰॰ बभूवे ॥
तुल्यार्थनिर्देशेवुण्प्रत्ययः उपासिकाआस्य तेहतशायिकाः शय्यंतेइत्यत्रबहुप्ताणांयादृशान्यासनानिहतांयादृशनिशयनानितादृशानि देवदत्तादि
कर्तृकान्यासनादीनीत्यर्थः फलाश्रयंकर्मफलंचधातुनैवोक्तमित्याश्रयमात्रमाख्यातार्थः अनन्यलभ्यत्वात् अकर्मकेभ्योधातुभ्योभावेआतःसकर्मके
भ्यस्तुकर्मण्यात्स्यात् साध्यरूपस्यभावस्यात्मगतएवसंख्यानपेक्षत्वेनस्वस्यैकत्वादेकवचनमेवभवति तत्तुप्रथमस्यैवनमध्यमोत्तमयोर्युष्मदस्मदो
राख्यातवाच्यकारकवाचित्वाभावात् नाम्नोप्याख्यातवाच्यकारकवाचित्वाभावस्तथापिप्रथमोभवति तस्यानिष्पादनेवचनाभावात् तत्रैकवचन॥
स्वीकारःप्रथमपुरुषमंतराकथंसंभवेदित्यर्थः भावे यथाभूयतेइत्यादि॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

स्वरांतानांहनग्रहदृशां चभावकर्मणोः सितासीस्यपामिड्वाइट्एव च स्वरांतेभ्यहनिग्रहिदृशिभ्यश्च परेषांभावेकर्मणि चार्थे स्थितानांसितासीस्यपांप्रत्ययानामि
डागमोभवति सइट्इणीवेतीणवत्त सन्नस्यंतात् कार्यादेशोयंइणि परेपत् वृध्यादिकार्यंभवतिजदिणवदिटिपरेपीत्यर्थः यथाभाविताभाविष्यते इत्यादौवृ
द्धिः हनिता दानिष्यते इत्यादौघुक् घानिता घानिष्यते इत्यादौघत्वं प्रयोजकन्यंतात् शमेः कर्मण्याख्यातेकृते शामिता शमिता शामिष्यते शमिष्यते इत्या
दौमितांह्रस्वंतानामिताम् पधायावाद्दीर्घइत्यादि इणतन्यकर्तरि कर्तुरत्योऽकर्तानस्मिन अकर्तरिभावेकर्मणि चार्थेतनूप्रत्ययेपरे धातोरिणस्यात् अकर्तरीति
किं अकृत घटंकुलालः लुगितितनोलुक् अभावि अकर्मकोपिधातुः कुत्रचिदर्थांतरेसकर्मकत्वंभवति धातूनामनेकार्थत्वेनार्थांतरस्योपसर्गेणद्योतनाद्व

स्वरान्तानांहनग्रहदृशाञ्च भावकर्म्मणोस्सितासीस्यपामिड्वाइणवच्च भाविषिषीष्ट भविषीष्ट॥ ॥भाविता भविता भाविष्यते भविष्यते
अभाविष्यत अभविष्यत इणतन्यकर्तरि धातोस्तनि परेभावेकर्म्मणिचइण्प्रत्ययस्तेरपवादः लुक् अभावि अकर्मकोप्युपसर्गव
सात्सकर्मकोभवति सुखमनुभूयते स्वामिना लज्जासत्तास्थितिजागरणम्वृद्धिक्षयभयजीवितमरणम् शयनक्रीडारुचिदीप्त्यर्थ
धातुगणन्तमकर्म्मकमाहुः १ फलव्यापारयोरेकनिष्ठतायामकर्म्मकः धातुस्तयोर्धर्म्मिभेदेसकर्म्मकःउदाहृतः २ धातोरर्थान्त
रेवृत्तेर्धात्वर्थेनोपसङ्ग्रहात् प्रसिद्धेरविवक्षातः कर्म्मणोऽकर्म्मिकाक्रिया ३ ॥ ॥ ११ तोः यथाकर्मण्यात् स्वामिनासुखमनुमनभूयते
आत्मसात्क्रियतेइत्यर्थः। लज्जासत्तास्थितिजागरणं वृद्धिक्षयभयजीवितमरणं शयनक्रीडारुचिदीप्त्यर्थंधातुगणंतमकर्मकमाहुः अकर्मकधातुल
क्षणमाह आचार्यास्तंधातुगणमकर्मकमाहुः ब्रुवंति तंकं लज्जासत्तास्थितिजागरणान्यर्थाःसंति यस्यसः लज्जासत्तास्थितिजागरणास्तं पुनः वृद्धिक्षयभय एम० ७८
जीवितमरणान्यर्थाः संतियस्यसः वृद्धिक्षयभयजीवितमरणास्तं पुनः शयनक्रीडारुचिदीप्त्ययोऽर्थायस्यसशयनक्रीडारुचिदीप्त्यर्थस्तम् फल
व्यापारयोरेकनिष्ठतायामकर्मकः धातुस्तयोर्धर्मिभेदेसकर्मकउदाहृतः सकर्मकाकर्मकधातुलक्षणमाह॥ ॥ ॥ ॥

आचार्य्यैरकर्मकोधातुरुदाहृतः कथितः कस्तत्रा उत्पत्त्यनुकूलोव्यापारोधात्वर्थः ततोत्पादनाव्यापारः उत्पत्तिःफलंयथापचेः फूत्करणे धोदकोपस्करणा
दिलक्षणोव्यापारःविक्लित्यादि फलंतयोःफलव्यापारयोरेकनिष्ठतायांएकस्मिन्धर्म्मिण्याश्रयस्थितौसत्यामित्यर्थः धातुःसकर्मकउदाहृतः कस
नितयोः फलव्यापारयोर्द्धर्मयोर्द्धर्मभेदेश्चाश्रयभेदेसतिएकस्मिन्धर्मिणिफलं अन्यस्मिन्धर्मिणिव्यापारइत्यर्थः १ धातोरर्थांतरेवृत्तेर्द्धात्वर्थेनोपसं
ग्रहात् प्रसिद्धेरविवक्षातःकर्मणोकर्मिकाक्रिया १ कुत्रचित्सकर्मकस्यापिधातोःक्रियाधात्वर्थोऽकर्मिकाकर्मरहिताभवतीत्यर्थः कस्मात् अन्यो
र्थइत्यर्थांतरं तस्मिन्नर्थांतरेवृत्तेवर्तनाद्धेतोः यथानदीवहतिस्यंदतेइत्यर्थः पुनर्द्धात्वर्थेनकर्मण उपसंग्रहाद्धेतोःजीवतिप्राणान्बिभर्त्तीत्यर्थः पुनः

शीङोऽयङ्येक्ङिति शय्यते शिश्ये शायिषीष्ट अशायि अयकि घटःक्रियते त्वन्दुःखीक्रियसेरागैर्विरागैस्सुखंहंक्रिये चक्रेभाव्यते
भावयाञ्चक्रे भावयामासे भावयाम्बभूवे इणवदिटिणेर्ल्लोपः भाविता भावयिता भाविष्यते भावयिष्यते अभावि अभाविषाताम्
अभावयिषाताम् सन्नन्तात्तु बुभूष्यते बुभूषाञ्चक्रे यङन्तात्तु बोभूय्यते बोभूयाञ्चक्रे यङ्लुगन्तात्तु बोभूयते बोभवाञ्चक्रे बोभावि
षीष्ट बोभविषीष्ट स्तूयतेविष्णुः अस्नावि अस्नाविषातां अस्तोषातां अर्य्यते आरे आरिषीष्ट ऋषीष्ट स्मर्य्यते स्मारिता स्मर्ता॥
कर्मणः प्रसिद्धेर्हेतोःमेघोवर्षतिति जलमितिकर्मप्रसिद्धमेव पुनःकर्मणोऽविवक्षातो वक्तुमिच्छायाअभावाद्धेतोःयथायोहितात्संशृणुतेनसकिंप्रभुः
कुत्सितःप्रभुरित्यर्थः वचनमितिकर्माविवक्षितमत्र॥ ॥शीङोयङ्येक्ङिति॥ ॥शेतेरयङादेशःस्यात् किङितिङितिचप्रत्ययेपरे ङित्वादंतादेशः य
तइत्सल्लोपः शय्यते तुधातोरितियःशिश्येइणवद्भावाद्धाहढिःशायिषीष्ट शयिषीष्ट करोतेःकर्मण्यात् उरितिनगुणः कृषीष्ट चौरादिकात्ण्यंतात्
ड्भावेयःतेकर्मण्यात् णेरितिणिलोपः भाव्यते इणवदिटिणिलोपोवा णेलोपोवास्यात् इणवदिटिपरेणिलोपेभाविता पक्षेसिसतेतीटिच भावयिता स
प्रत्ययांतादुभूषते भावेऽस्मात् यतइत्सल्लोपः बुभूष्यते यङ्प्रत्ययांतात् यतइत्सल्लोपे बोभूय्यते यङ्लुङंताद्भावेऽस्मात् बोभूयते स्तौतेःकर्मण्यात्॥०

चं॰प्र॰ ति॰सु॰ ८० येद्रुति दीर्घः स्तृयते ऋगतौ कर्मण्यात् गुणोर्तीतिगुणः अर्यते इणवदिटि तु धातोर्नामिनइति वृद्धिः आरिता स्मृचिंतायां गुणोतीतिगुणः स्मर्य्यते यजतेः
कर्मण्यात् यजामितिसंप्रसारणं इज्यते लिटिईजे आशिषिलिङि यक्षीष्ट ॥ ॥तनोतेर्वायकि॥ ॥तनेरकारांतादेशोवास्यात् यक्प्रत्ययेपरे जनेर्वाय
कि जनेरकारांतआदेशोवास्यात् यकिपरे तपोनेणकर्मकर्तर्य्यनुतापेच तपेरिण्प्रत्ययोनस्यात् अनुतापेऽर्थेकर्मकर्तर्य्यर्थेच। अन्वतप्तदेवदत्तः पा
पेन पापेनकर्त्रा अभ्याहतइत्यर्थः भावेपीदं वो ध्यं पापेनपापवतापुंसा विचार्यकर्महत्वा पश्चादशोचीत्यर्थः कर्मकर्तरीतितु अतप्ततपस्तापसइत्यत्र तपस्तप
कर्मकस्येत्यनेनकर्तुः कर्मवद्भावः डुदाञ्दाने दादेरिरिलं येद्रुति दीर्घः दीयते आतोनपीत्यालोपे ददे आतोयुक् आदंतस्य धातोर्युकुस्यात् इतिप्रत्य

तनोतेर्वा आत्वंयकि तायते तन्यते तनिषीष्ट अतानि जायते जन्यते तपोनेइणकर्म्मकर्त्तरि अनुतापेच अन्वतप्तपापेन दादेरिः दी
यते ददे आतोयुक् इणिञ्चिणिकृतिच दायिषीष्ट दासीष्ट अदायि अदायिषाताम् अदिषाताम् धीयते स्थीयते ग्लायते अ
ग्लायि हन्यते हनोघ्नो जघ्ने घानिषीष्ट वधिषीष्ट घानिता हन्ता अघानि अघानिषाताम् अहसातां अवधि अवधिषाताम्॰ ॥

येञिणिणितिकृत प्रत्ययेचपरे घञिदायः बुणिदायकः इणवदिटि दायिषीष्ट इणवदिटोभावे दासीष्ट लुङि अदायि इणवदिटि अदायिषाताम् तद
भावे अपिद्वाधास्थामितीत्वं अदिषातां एवंधास्था धातून्लेहर्षक्षये इणवदिटियुक् अम्लायिषातां हन्तेः कर्मण्यात् हनोघदित्यनेन घदादेशो
न इणवर्जितेइत्युक्तत्वात् पूर्वोहं तेरितिघः जघ्ने हनोलुङ् लिङोरितिवावधः यतइत्यल्लोपः वधिषीष्ट पक्षेहनोघ्नेइतिघः अतउपधायाइ एम॰ ८०
ति वृद्धिः घानिषीष्टः इणव द्भावेवधादेशस्यवाधकोत्येयः हन्तइतीट् हनिष्यते लुङि इणवदिङभावे हनःसिः किदीतिकित्वात्नलोपस्त्वत्र
दात्ततनामितिनलोपः अहसातां गृह्णातेः कर्मण्यात् ग्रहामितिसम्प्रसारणं गृह्यते॰ ॥ ॥ ॥ ॥ श्रीकृष्णायनमोनम

इणवदिटोनदीर्घः ईटोग्रहामितिसूत्रेण सिसतेत्यादि लक्षणेनविधीयमानस्यैवेटोदीर्घोभवतिनेणवदिट इत्यर्थः दृशेः कर्मण्यात लुङि इटिपरेउपधाया इतिगुणः अदर्शिषातां पक्षेझलशषेतिषत्वं षढोःकःसीतिकः हशषांतादितिसक तुन नतुदृशेरित्युक्तत्वात सिस्योरितिनगुणः अदृक्षातां शमेर्भावे आदकर्मकत्वात् मांतस्यसेटोन वृद्धिरिणि ञिणितिकृतिचनत्वाचमिकमिवमीनांसेटो मांतस्यधातोः वृद्धिर्नस्यात इतिञितिणितिकृत प्रत्ययेचपरे आचमिकमिवमीनांतुवृद्धिर्भवतीत्यर्थः घञिशमः इमवुणिशमकः इमकः कथंतर्हि हारंदक्रामिपदैकैकेनखमितिश्रीहर्षप्रयोगइतिचेदुच्यते निवृत्तप्रेषणाद्धातोः प्राकृतेर्थेणिचिष्यते इतिप्रकृतेर्थेणिचस्ततइण वोध्यः सेटः किं अगामि कमुकांतौ कमेःस्वार्थेणिङि तिणिङ् वांतेरितिणिलोपः काम्यते लुङि णिङभावेप्र

इणवदिटोनदीर्घः आहिता ग्रहीता दर्शिषीष्ट दृषीष्ट दर्शिता दृष्टा अदर्शि अदर्शिषातां अदृक्षातां शम्यते मुनिना मांतस्यसेटोन वृद्धिरिणिञ्णितिकृतिचानत्वाचमिकमिवमीनाम् अशमि अदमि आचामि अकामि अवामि ननांतु शम्यते मोहो मुनिना शमया ञ्चक्रे मितांह्रस्वनामिणिणा मिचवादीर्घः शामिता शमिता शमयिता अशामि अशमि अशामिषातां अशमिषातां अशमयिषातां वधहिंसायां जनिवध्योर्नवृद्धिः अवधि भञ्जेरिणिनलोपोवा अभाजि अभञ्जि० ॥ ॥ ११ कामिञिजिङोरप्येवं ण्यंतात्शमेः कर्मण्यात ॥

णेरितिणिलोपः शम्यते कासादिप्रत्ययादित्याम् शमयाञ्चक्रे मितांह्रस्वनामिणिणामिचवादीर्घः मित्संज्ञिकानांह्रस्वांतानांधातूनांवावृद्धिर्भवति इणप्रत्ययेणाम् प्रत्ययेचपरे इणवदिटि णेरितिणिलोपः वृद्धिश्चवा शामिता शमिता पक्षे सिसतेतीटिगुणः शमयिता यङंतकृतिकस्यंतात् शंसमेः कर्मण्यात ओपतोऽनपिच हसादितिपलोपः यत इत्यल्लोपः ततोयकि णेरितिणिलोपः शंशम्यते लुङि शंशामिता शंशमयिता लुङि अशंशामि अशंशमि णमप्रत्ययेतु ॥ ॥ शंशामं शंशमं वधहिंसायां हसांतः भंजेरिणिनलोपोवा भंजोआमर्दने इत्यस्यनस्यलोपोवास्यादिणिप्रत्ययेपरे ॥

लभेश्चिस्मोर्तुमर्वा इत्तमञ्जाञ्ञाविसस्यनुमागमोवास्यात इतिप्रत्ययेणामिप्रत्ययेचपरे प्रादेर्निसंनुम प्रपूर्वस्यालभेर्निसंनुमस्यात णमिप्रत्यये प्रलंभं प्रलं
भं अथमेहिकर्मकाधातवस्तेभ्यश्चात कृत्यक्तखलर्थप्रत्ययाः किंमुख्येकर्मणिउत गौणेकिं चोभयोरितिसंदेहे व्यवस्थामाह गौणकर्मणिदुह्यादेः प्रधानेनी
हृकृषवहांबुद्धिभक्षार्थयोः शब्दकर्मकाणांनिजेच्छया १ प्रयोज्यकर्मण्यन्येषांण्यंतानांलादयोमताः दुह्याचीतिकारकेउक्त दुह्यादेर्द्वादशसंख्यस्य धातो
गौणेकर्मणिलादयः प्रत्ययानताः नीप्रभृतीनांचतुर्णांप्रधानेकर्मणिलादयोमताः बुद्धिभक्षार्थयोर्ण्यंतयोः शब्दकर्मकण्यंतानांचप्रयोज्य प्रधानयोरन्यतरेक
र्मणिघत्रालादयोमताः अन्येषांण्यन्तानान्तु प्रयोज्यकर्मणिलादयोमताः कार्केगतिबुद्धीत्यनेनकर्तुर्मत्कर्मकारकं तत्तत्रप्रयोज्यकर्मज्ञातव्यम लाद

लभेरिस्मोर्तुम्वा अलम्भि अलाभि गौणेकर्म्मणि दुह्यादेः प्रधानेनीहृकृषवहाम बुद्धिभक्षार्थयोश्शब्दकर्म्मकाणान्निजेच्छया अप्रयोज्येक
र्म्मण्यन्येषांण्यन्तानांलादयोमताः गौर्दुह्यतेपयः अजाग्रामन्नीयते ह्रियते कृष्यते उह्यते बोध्यते माणवकन्धर्म्मः माणवकोधर्म्ममिति
वा भोज्यते माणवकमोदनः ओदनम्माणवकोवा पाठ्यते माणवकम्वेदः माणवकोवेदमितिवा देवदत्तोग्रामङ्गम्यते ०॥ ॥९॥ ४

मइत्यत्रादिशब्देनकृत्यक्तखलर्थाः प्रत्ययाग्राह्याः दुह्यादेर्गौणकर्मण्यात उदाहरणमाह गौर्दुह्यतेपयइत्यत्र गौरितिगौणं कर्मतत्राख्यातेनोक्तत्वादत्यो
क्तइत्यनेनप्रथमा पयइतिमुख्यं कर्मतत्रकर्मणिद्वितीया कर्तरित्वनुक्तत्वात्तृतीया देवदत्तेनेति न्यादीनांप्रधानकर्मण्यात उदाहरणमाह अजा
ग्रामंनीयते इत्यत्राजेतिमुख्यंकर्मतत्रोक्तत्वात प्रथमाग्राममितितु गौणंकर्म कर्त्तानुक्ततृतीयांततोऽध्याहार्यः बुद्धिभक्षार्थयोः शब्दकर्म्मकाणांचण्यंतानांप्र
योज्येमुख्येचकर्मण्यात० उदाहरणमाह ० बोध्यतेमाणवकंधर्म्मइत्यत्रधर्म्मइतिमुख्यंकर्ममाणवकमिति प्रयोज्यंकर्मतत्रनिजेच्छयाख्यातादिः॥
कर्त्तव्यः भोज्यतेमाणवकमोदनइत्यत्रौदनमुख्यं कर्ममाणवकमितिप्रयोज्यकर्मतत्रनिजेच्छया ख्यातादिः याचतेमाणवकंवेदइत्यत्रवेदइतिमु
ख्यंकर्ममाणवकमितिप्रयोज्यकर्मतत्रनिजेच्छयाख्यातादिः तृतीयांतः कर्ताध्याहार्यः ण्यंतस्यप्रयोज्यंकर्मण्यात उदाहरणमाह देवदत्तोग्रामंगम्यते ॥

इत्यत्र मासमिति सुखं कर्म देवदत्त इति प्रयोज्यं कर्म तत्राख्यातादिः कर्मण उक्तत्वात् प्रथमा कर्तातु तृतीयान्तोऽध्याहार्यः अकर्मकाणां कालादिकर्मकाणां कर्मणि भावे च लकारः कालादिकर्मकाद् अकर्मकाद्धातोर्भावे कर्मणोऽर्थे आख्यातो भवति कारकेऽकर्मकधातुभिर्योगे इति सूत्रेण कर्मसंज्ञायेषां धातूनां हतानि कालादिकर्मकाः कालादिकर्मकस्य कर्मण्याप्तत् उदाहरणमाह मासं आस्यते इत्यत्र कालवाचिकर्मण आख्यातेनोक्तत्वात् प्रथमा कर्तातु तृतीयान्तोऽध्याहार्यः भावे तु मासमास्यते देवदत्तेनेत्यत्र कर्मणोऽनुक्तत्वात् मासमिति द्वितीया कर्तुरनुक्तत्वात् देवदत्तेनेति कर्तरि तृतीया ण्यंतात् कालादिकर्मकाद्धातो सुखं प्रयोज्यकर्मण्येवाख्यातादिः मासमास्यते माणवक इत्यत्र कालवाचिकर्मणोऽनुक्तत्वात् मासमिति द्वितीया माणवक इति प्रयोज्यकर्मतत्राख्यातेनोक्तत्वात् ०

अकर्मकाणां कालादिकर्मकाणां भावे कर्मणि च लकारः मासं मासो वास्यते देवदत्तेन कोशः कोशं वास्यते कुरवः कुरून् वास्यंते गोदोहः गोदोहो वास्यते ण्यन्तात्तु प्रयोज्ये प्रत्ययः मासमास्यते माणवकः ॥ इति भावकर्मप्रक्रिया समाप्ता ॥ अथ कर्मकर्तृप्रक्रिया ॥ ॥

यदा सौकर्यातिशयं द्योतयितुं कर्तृव्यापारो न विवक्ष्यते तदा कारकान्तराण्यपि कर्तृसंज्ञां लभन्ते साध्वसिश्छिनत्ति काष्ठानि पचन्ति स्थाली पचति पच्यते ओदनेन अपाचि भिद्यते काष्ठेन अभेदि लेनोक्ते कर्मकर्तरि यगादिशिणवदिटः पच्यते ओदनः अपाचि भिद्यते काष्ठम् अभेदि सकर्मकाणां तु न अजा ग्रामं नयति ॥ ॥ ११ प्रथमा कर्तरि त्वनुक्तत्वात्तृतीया देवदत्तेनेति ॥ इति भावकर्मप्रक्रिया समाप्ता ॥ ॥ अथ कर्मकर्तरि प्रक्रिया प्रारम्भः ॥ ॥ सकललकारकारणं मंगानरव्यापारो वर्तते ० तत्र स्वव्यापारे स्वातंत्र्यं व्यापारहीनस्य कारकत्वात् व्यापारभेदाः कारकाणां करणादित्वसंभव तत्र यदा कारकांतराणां सौकर्यातिशयं द्योतयितुं प्रतिपादयितुं कर्तुर्व्यापारो न विवक्ष्यते तदा कारकान्तराण्यपि कर्तृसंज्ञां प्राप्नुवंति ० स्वव्यापारे स्वतंत्रत्वात् सुष्ठु करोतीति सुकरस्तस्य भावः सौकर्यं [illegible] कारकांतराणां पूर्वं करणत्वादिसत्त्वेऽपि सांप्रतं कर्तृसंज्ञाकरणात् कर्तर्याख्यातो भवति साध्वसिश्छिनत्ति सत्र करणस्य कर्तृसंज्ञा आख्यातेन कर्तुरुक्तत्वात् असिरित्यत्र प्रथमा काष्ठानि पचतीत्यत्रापि करणस्य कर्तृसंज्ञा कर्तुराख्याते

नोक्तत्वात् काष्ठानीति प्रथमा स्थालीपचतिइत्यत्रापि आधारस्य कर्तृसंज्ञायां स्थालीति प्रथमा कर्मणस्तु कर्तृत्वविवक्षायां प्राकृतसकर्मकाअपि प्रायेणाऽ
कर्मकाः कर्मणः सौकर्य्यातिशयं द्योतयितुं यदा कर्तृविवक्षा ततः प्राकृतसकर्मका अपि धातवोऽकर्मका प्रायेण भवंति प्रायेणेत्युक्तत्वादेककर्मकाः छि
दिभिदिप्रभृतय एवाकर्मकाः भवंति नतु द्विकर्मकाः अकर्मकत्वस्य फलमाह तेभ्यो भावे कर्तरि च लकारः कर्मकर्तर्यकर्मकाद्यातो भावे कर्तरि चार्थेऽ
ख्यातप्रत्ययो भवति भावे आख्यातस्योदाहरणमाह पच्यते ओदनेन भिद्यते काष्ठेनेत्यत्र कर्मणः कर्तृसंज्ञा आख्यातस्तु भावे कर्तुरनुक्तत्वात् ओदनेने
त्यादौ तृतीया कर्मकर्तर्याख्यातस्योदाहरणमाह कर्मवत्कर्मणा तुल्यक्रियः कर्मस्थया क्रियया तुल्यक्रियः कर्त्ता कर्मवद्भवति कार्यातिदेशोऽयं कर्मणो य
त्कार्य्यं भवति तत्कर्मकर्तुरपीत्यर्थः तेन यक् चतुर्थिचेतिपक् आद्गुणीत्यात् इणतनीतीण स्वरंतानामितीण वदिह इत्यादिकार्य्याणि कर्मकर्तरि भवंति का
ष्ठं भिनत्ति इत्यत्र काष्ठस्य या विदारणात्मत्वरूपा क्रिया सैव काष्ठं भिद्यते स्वयमेवेत्यत्र तस्मिन्कर्तृभूतेपि भवति अयं कार्य्यातिदेशः कर्मस्थभावकानां क
र्मस्थक्रियाणां च धातूनां भवति नतु कर्तृस्थभावकानां कर्तृस्थक्रियाणां च धातूनां भवति यत्र कर्मणि दृष्टे क्रियाऽनुमातुं शक्यते तत्कर्मस्थक्रिया तत्तोऽन्यक
र्तृस्थक्रियाः पक्वेषु तंडुलेषु भिन्नेषु काष्ठेषु दृष्टेषु दृष्टः कर्तृव्यापारोऽनुमीयते तदुक्तं च कर्मस्थः पचतेर्भावः कर्मस्था च भिदेः क्रिया आशासिभावः कर्तृ
स्थः कर्तृस्था च गमेः क्रिया १ यद्यप्याधारभावयोरित्यत्र भावशब्देन क्रियापि गृह्यते तथाप्यत्र भेदो विवक्षितः द्रव्यमुपादानात् परिस्पंदरूपो धात्व
र्थः छिदादिक्रिया अपरिस्पंदरूपो विक्लित्त्यादिभावः पचत्योदनं भिनत्ति काष्ठं च देवदत्तः पच्यते ओदनः भिद्यते काष्ठं स्वयमेवेत्यत्राख्यातेन कर्म
कर्तुरुक्तत्वात् प्रथमा कर्तृस्थक्रियाया उदाहरणमाह आशास्ते घटं देवदत्तः आशास्ते घटः स्वयमेव गच्छति ग्रामं देवदत्तः गच्छति ग्रामः स्वयमेवेत्य
त्र घटग्रामयोर्दृष्टयोर्नहि देवदत्तस्य व्यापारोऽनुमातुं शक्यत इति कर्तृस्थत्वक्रियायाहेतोः द्विकर्मकाणां न द्विकर्मकधातूनां कर्मकर्त्ता कर्मवत्तु न भवति
अजां ग्रामं नयती त्यत्र प्रधान कर्मणः कर्तृसंज्ञा प्रधानेनीहृकृष्वहामित्युक्तत्वात् आख्यातेनोक्तत्वात्प्रथमा इह प्रतिषेधाभावे यक् स्यात् क्रियाफल

दुहिपच्योः सकर्मकयोर्वा अनयोः कर्मकर्त्ता कर्मवद्वा भवति दुहस्नुनमांकर्मकर्त्तरियग्गिणोन एभ्योयग्गिणौ प्रत्ययौ न भवतः कर्मकर्त्तर्यर्थे दुहेरनेनयक् निषिध्यते
इण्तुविकल्पेन वक्ष्यते गौः पयो दुग्धे इत्यत्र गौणकर्तृविवक्षा गौणे कर्मणि दुह्यादेरित्युक्तत्वात् स्वरांतानांकर्मकर्त्तरीण्वा तनि स्वरांतेभ्यो धातुभ्य इण्प्रत्य
यो वा भवति कर्मकर्त्तर्यर्थे तनि परे स्वरांतानां किं अभेदिकाष्ठं कर्मकर्त्तरि किं अकारि घटः कुलालेन कर्मकर्त्तरि लुङ् यथा अकारि घटः स्वयमेव पक्षे लोपो ह्र
स्वादिति सिलोपः अकृत दुहस्नु दुहेरिण् प्रत्ययो वा भवति कर्मकर्त्तर्यर्थे तनि परे कर्मकर्त्तरि किं अदोहि गौर्देवदत्तेन कर्मकर्त्तरि लुङ् यथा इण्प्रत्यये अदोहि
पक्षे हसपांतादिति सक् दुहदिहलिहगुहूभ्य इति सको वा लुक् अधुक्षत पक्षे लुक् अदुग्ध फलं पच्यते उदुंबरः इत्यत्र गौणकर्मण उदुंबरस्य कर्तृसंज्ञा गौणे

दुहिपच्योस्सकर्मकयोर्वा दुहस्नुनमाङ्कर्मकर्त्तरियग्गिणोन गौः पयो दुग्धे दोग्धि वा स्वरान्तानां कर्मकर्त्तरीड्वा तनि अकारि अ
कृत कटस्स्वयमेव दुहस्नु अदोहि अधुक्षत अदुग्ध उदुम्बरः फलं पच्यते पचति वा प्रस्नुते पयः स्नुक्रमोरणितिनेट् प्रास्नोष्ट नम
ते दण्डः अनंस्त सृजेः श्रद्धोपपन्ने कर्तरि च सृज्यते स्रजं भक्तः असर्जि ॥ ॥ २१ कर्मणि दुह्यादेरित्युक्तत्वात् तत्र कर्मवद्भावस्ते नयगा।
दीणवदिटो भवंति स्नुप्रस्रवणे प्रस्रवणमुत्कंठावत्तोगां प्रस्नौति उत्कंठयति गौः कर्मणः कर्तृत्वविवक्षायां प्रस्नुते गौः लुङि स्वरांतानां हनग्रहेतीण
वदिट् प्रास्नाविष्ट पक्षे स्नुक्रमोरणितिनेट् प्रास्नोष्ट नमते दंड इत्यत्र कर्मणः कर्तृसंज्ञा आख्याते नोक्तत्वात्तत्र प्रथमा लुङि अनंस्त अत्र कर्मकर्त्तर्या
त्मनेपदमेव जातं अत्र वानन्तरभाविन्यर्थो बोध्यः सृजेः श्रद्धोपपन्ने कर्त्तरि वा सकर्मकस्य सृजेः कर्त्ता कर्मवद्वा भवति श्रद्धायुक्तकर्त्तर्यर्थे सृज्यते स्र
जं भक्त इत्यत्र कर्तरि आख्यातः कर्तुः कर्मवद्भावात् आद्यग्गिणो भवंति अद्वयानि व्यासस्य तीत्यर्थः॥ ॥ ॥ ॥ ॥ ॥ ॥

युजेर्वाऽसकर्मकस्य युजेः कर्त्ता कर्मवद्वा भवति युज्यते योगं ब्रह्मचारी स्वत्र कर्त्तरि आख्यातः कर्तुः कर्मवद्भावादात्मनेपदादिः यगिणो न तपः कर्मकस्य तपः कर्मकस्य
तपेः कर्त्ता कर्मवद्भवति तप्यते तपस्तापसः इत्यत्र कर्त्तर्याख्यातः कर्तुः कर्मवद्भावादात्मनेपदादिः अर्जयतीत्यर्थः लुङि तपो नेणित्यनेन णत्वं अत
प्त भूषावाचिनां किरादीनां सांतानां च यगिण इष्वद्दिटो न भूषार्थेभ्यः किरादिभ्यः सप्रत्ययांतेभ्यश्च धातुभ्यः कर्मकर्त्तरि यगिण इष्वद्दिटो न भवंति ॥
आत्मनेपदमेव भवतीत्यर्थः तुदाद्यंतर्गणः किरादिः कॄ विक्षेपे गॄ निगरणे दृङ् आदरे धृङ् अवस्थाने प्रच्छ ज्ञीप्सायामिति पंचकः अलंकुरुते क
न्या स्वत्र कर्मणः कर्तृसंज्ञा आख्यातेनोक्तत्वादत्र प्रथमा एवमग्रेपि ज्ञेयं तुदादेरिसः ऋत इद्धातोर् अवकिरते लुङि दृङ् दृञ् ऋदंतास्सिसोरितिवे इट्
युजेर्वा युज्यते ब्रह्मचारी योगं युनक्ति वा भूषावाचिनां किरादीनां सान्तानां च यगिणिण्वद्दिटो न अलंकुरुते कन्या अलमकृत
अवकिरते हस्ती अवाकीर्ष्ट अवगिरते पुष्पम् अवागीर्ष्ट आद्रियते दानं आदृत ध्रियते अधृत पृच्छते अपृष्ट चिकीर्षते
कटः चिकीर्षां चक्रे चिकीर्षां बभूवे अचिकीर्षिष्ट ॥ ॥ ११ दृङ् दृञ् ऋदंतानामितिवा दीर्घः अवाकरीष्ट इड्भावे उरित्तिगुणो न०॥
ऋत इद्धातोर् पुनः सिसोरितिगुणो न अवाकीर्ष्ट एवं गॄ तुदादेरिसप्रत्यये अयकीतिरिङ् ततो नु धातोरितीयु आद्रियते लुङि उरित्तिगुणो न लोपो
ह्रस्वादितिसिलोपः आदृत एवं धृङ् तुदादेरिसप्रत्यये ग्रहामितिसंप्रसारणं पृच्छते लुङि छ्शषेतिषत्वं रुसादितिसिलोपः अपृष्ट चिकी
र्षते कट इत्यत्र कर्मणः कर्तृसंज्ञा आख्यातेनोक्तत्वात्तत्र प्रथमा लुङि सिस नेतीट् यत इत्यस्य लोपः अचिकीर्षिष्ट ॥ ॥ ६ ॥ ॥ ५ ॥
ञिश्रिञ् ब्रूञ् ग्रंथि ग्रंथा द्विकर्मकाणां यगिणो न ञिप्रत्ययांतेभ्यः श्रिब्रूञ् ग्रंथिग्रंथिभ्य आत्मनेपदविधानकर्मकेभ्यश्च धातुभ्यो यगिणो न भवतः
कर्मकर्त्तर्यर्थे आदिणवद्दिटौ भवत इत्यर्थः कारयते घट इत्यत्र ञ्यंतात् कर्मकर्त्तर्याख्यातः तत्रोक्तत्वात् प्रथमा लुङि ञेरङि त्यङ् द्वित्वे अडिल

चानिस्सुपधाह्रस्वः पूर्वस्मेकारस्य लघोरितिपूर्वदीर्घः णेरनिटीतिणिलोपः अचीकरत उच्छ्रयते दंड इत्यत्र कर्मणः कर्तयोरख्यातः अपुकर्तरीत्यप् लुङि णिश्रिस्रुद्रु
भ्यइतिङे हिलं तुधातोरितीयङ् उदशिश्रियत ब्रूतेकथेत्यत्र कर्मणः कर्तृसंज्ञा आख्यातेनोक्तत्वात् तत्र प्रथमा लुङि ब्रुवोऽनपातिवच् असमाविक्कीतिङः॥
ङेवचेरित्युमागमः अवोचत अथिग्रंथ्यो ग्रथ्यो गदिकयोर्णेरभावपक्षे ग्रंथ्यते ग्रंथ्यते ग्रंथ इत्यत्र कर्मणः कर्तृविवक्षा तत्राख्यातेनोक्तत्वात् प्रथमा लु
ङि अग्रंथिष्ट अग्रंथिष्ट क्र्यादिकयोस्तु ग्रथ्नीते ग्रथ्नीते च मेखलास्स्वयमेव आत्मनेपदविधौ योऽकर्मकस्तमुदाहरति विकुर्वते सैंधवा इत्यत्राकर्मका
वेतनेन आद्विधानं आख्यातेनोक्तत्वात् कर्मकर्तरि प्रथमा वलवतीत्यर्थः लुङि इणवदिटि व्यकारिष्ट व्यकारिषातां व्यकारिषत इणवदिङभावे

णिश्रिग्रंथ ग्रंथिमन्यादकर्मकाणां युगिणो न कारयते कटः स्वयमेव अचीकरत उच्छ्रयते दण्डः उदशिश्रियत ब्रूतेकथा
अवोचत मन्यते मेखला मन्यते ग्रन्थः अग्रन्थिष्ट विकुर्वते सैन्धवाः व्यकारिष्ट व्यहृत व्यहृषातां कुषिरञ्जेःकर्मकर्तरि वाऽऽ
दिवादौ। कुष्यति कुष्यते वा पादः अकोषि रज्यति रज्यते वा वस्त्रम् अरञ्जि ॥ ॥ इतिकर्मकर्तरिप्रक्रिया ॥ ॥

लोपो ह्रस्वादितिसिलोपः ॥ व्यहृत व्यहृषातां व्यहृषत कुषिरंजोः कर्मकर्तरि वा दिवादौ कुषिरंजिभ्यामुभयपदं भवति कर्मकर्तर्यर्थेत्तिवादिचतुष्टे
येपरतः अनपित्वा त्मनेपदमेव भवति कुषनिष्कर्षे क्र्यादिकः रंजरागे दैवादिकः कुष्यति कुष्यते वा पाद इत्यत्र कर्मणः कर्तृविवक्षाया
माख्यातः कर्तृकर्मवद्भावादात्मनेपदादिः लुङि इण तनीतीणः ॥ अकोषि रज्यति रज्यते वा वस्त्रमित्यत्रापि कर्मकर्तर्याख्यातः तत्राख्यातेनोक्त
त्वात् प्रथमा लुङि अरंजि अरंसातां अरंसत इह कर्मकर्तरि प्रकरणे भिद्यते काष्ठं स्वयमेवेत्यादौ सर्वत्र स्वयं शब्दः करणार्थको ज्ञेयः
आत्मना करणेनेत्यर्थः ॥ कर्त्रर्थे तु कर्मण्याख्यातः स्यादित्यर्थः ॥ ॥ इतिकर्मकर्तृप्रक्रियासमाप्ता ॥ ॥ ❀ ॥

०स्मृतिवाचिन्युपपदे भूतानद्यतने धातोर्लृट् धातोर्लृट् भवति स्मृतिवाचकशब्दे उपपदे सति न तु लङ् वत्स्यामः अवसाम इत्यर्थः एवं बुध्यसे चेतयसे इत्यादि योगेऽपि यद्योगे उक्तं न स्मृतिवाचकशब्दे उपपदे सत्यपि यद्शब्दयोगे भूतानद्यतने लृट् न भवति किं तु लङेव उत्तमपुरुषे चित्तविक्षेपादिना पारोक्ष्यं मत्त्व प्राह्विभिः कश्चित् स्वापनगतमेव न वेत्ति पश्चादन्येभ्यः श्रुत्वा मयि सुप्ते किल शब्दोऽज्ञानसूचकः सुप्तः सन् अहं विललापेति असंतापह्नवे लिट् असंताप ...र्थे लिट् भवति कलिंगो नाम निषिद्धो देशः उक्तं च अंगवंगकलिंगेषु सौराष्ट्रमगधेषु च तीर्थयात्रां विना गत्वा पुनः संस्कारमर्हति १ इति केचित् ०॥ कश्चित् पृष्टः त्वं कलिंगेषु अवात्सीः तत्र गत्वा त्वया चिरं स्थितमित्यर्थः स आह नाहं कलिंगं जगामेति केवलमवस्थानमेव न निषिद्ध्यते किं तु तद्धेतुभूतं गम

स्मृतिवाचिन्युपपदे भूतानद्यतने धातोर्लृट् लङोऽपवादः स्मरसि कृष्ण गोकुले वत्स्यामः यद्योगे उक्तं न अभिजानासि कृष्ण यद्वने ऽभुञ्ज्महि उत्तमपुरुषे चित्तविक्षेपादिना पारोक्ष्यम् सुप्तोऽहं किल विललापः असन्तापह्नवे लिट् आसन्नकाले पृच्छ्यमानेऽर्थे लङ् लिटौ कलिङ्गेष्ववात्सीः नाहं कलिङ्गाञ्जगाम हशश्वतोर्लिड्विषये लङ् लिटौ अगच्छत् किम् जगाम किम् अनासन्ने तु कंसे जघान किम् स्मे लट् लिटोऽपवादः यजति स्म युधिष्ठिरः भूतानद्यतने लट् स्मयोगे एवं स्म पिता ब्रवीति ननौ पृष्टप्रतिवचने भूते लट् अकार्षीः किम् ननु करोमि भोः॥ ॥ एतमर्थीसंतापह्नवो भवति हशश्वतोर्लिड्विषये लङ् लिटौ हशश्वत् निपातयोर्योगे लिडर्थे लङ् लिटौ भवतः आसन्नकाले पृच्छ्यमानेऽर्थे लङ् लिटौ आसन्नकालिके भूतानद्यतने परोक्ष इति धात्वर्थे प्रष्टव्ये लङ् लिटौ भवतः पंचवर्षाभ्यंतर आसन्नकालः पंचवर्षातीतविप्रकृष्टकालः पृच्छ्यमाने किं जगाद वा लिडेव अनासन्ने तु लिडेव कंसं जघान किं स्मे लट् स्मयोगे लट् भवति न तु लिट् स्मेत्य व्ययं भूतकालद्योतकं भूतेऽनद्यतने लट् स्मयोगे लङोऽपवादः ब्रवीति स्म अब्रवीदित्यर्थः ननौ पृष्टप्रतिवचने भूते लट् पृच्छ्यते इति पृष्टः कर्मणि क्तः पृष्टस्य प्रतिवचनं पृष्टप्रतिवचनमिति षष्ठीसमासः भावे क्तप्रत्यये तु पृष्टं प्रश्नं पृष्टपूर्वं च तत् प्रतिवचनं पृष्टप्रतिवचनमिति मध्यमपदलो०

नन्वोर्वा ननुनिपातयोर्योगे पृष्टप्रतिवचने भूते वा लट् भवति पक्षे लुङ्लिटौ पुराशब्दयोगे भूतानद्यतने वा लुङ्लटौ ननुस्मे पक्षे लङ्लिटौ स्मेइतिकिं यजतिस्म
पुरा युधिष्ठिरः यावत् पुरानिपातयोर्भविष्यति लट् यावद्भुंक्ते पुराभुंक्ते निश्चितं भोक्ष्यते इत्यर्थः निपातावेतौ निश्चयं द्योतयतः निपातयोः किं यावद्दास्यते तावद्भोक्ष्यते
करणभूतया पुरा यास्यति वर्तमानसमीपे भूते भविष्यति च वर्तमानवद्वा कदागतोसीति भूतकालेन प्रश्नवाक्यं अयमागच्छामी त्युत्तरं भूतकालाभिव्यक्तये
यमिति अयोयस्त्विदानीमेवागतमिति वर्तमानसमीपभूतकालद्योतनायते नह्यागमनाविनाभूतं रूपं धूलीधूसरताप्रस्वेदादियुक्तं तत्र प्रतिनिर्दिश्यते॥
नन्वोर्वा अकार्षीः किम् नकरोमि नाकार्षम् अहं नु करोमि अहं न्वकार्षम् पुराशब्दयोगे भूतानद्यतने वा लङ्लटौ ननुस्मयो
गे वसन्तीह पुराछात्राः अवात्सुः अवसन् ऊषुर्वा स्मे किम् यजतिस्म पुरा युधिष्ठिरः यावत्पुरा निपातयोर्भविष्यति लट् यावद्भु
ङ्क्ते पुराभुङ्क्ते कदाकर्ह्योर्वा भविष्यति लट् कदाकर्हि वा भुङ्क्ते भोक्ष्यते भोक्तावा वर्तमानसामीप्ये भूते भविष्यति च वर्तमानवद्वा
कदाऽऽगतोसि अयमागच्छामि अयमागमम् कदागमिष्यसि एषु गच्छामि गमिष्यामि वा क्षिप्रवचने लृट् वृष्टिश्चेत् क्षिप्रमाशु
त्वमि नम्वायास्यति तदाशीघ्रम्वस्यामः॥ ॥ एवं कदागमिष्यतीति भविष्यत् कालेप्रश्नवाक्यं एव गच्छामीत्युत्तरं भविष्यत् कालाऽभिव्य
क्तये एषइतिप्रयोगस्य इदानीमेव गमिष्यामीति वर्तमानसमीपभविष्यत् कालद्योतनायते नगमने नाविनाभूतं यत्र परिकरबंधादियुक्तं तत्र प्रतिनि
र्दिश्यते तत्र कदेतिप्रश्ने उत्तरवाक्ययोः कालाऽनुपादानात् अयमेवशब्दाभ्यामिदानीमिति कालावगमः क्षिप्रप्रवचने लृट् वचनग्रहणम् स्वरूपग्रह
णं निरासार्थं क्षिप्रपर्यायेउपपदे लृट्॥ ॥ ॥ गर्हायां लडपिजात्वोः कालत्रये आभ्यां योगे लट् स्यात् गर्हायां कालत्रयेपरत्वात् लुङा
दीनयं वाधते अपिजायांत्यजसि त्यक्ष्यसि अत्याक्षीः इत्यादिविषये त्यजसीत्यादिलडेव प्रयुज्यते इतिभावः एवं योजायां अत्यजत् तत्याजत्यक्ष्य
सि अत्यासीत् इत्यादिविषये योजामामपित्यजतीति जातु गणिकामारत्से गर्हितमेतत् वाक्यम् लिङ्लटौ गर्हायां कालत्रये पक्षे लिङ्॥ ॥ ॥

चं०प्रा० लिट् लुट् लृट् लङ् लुङः भूतानद्यतनेलङ् कथंधर्ममसृजः परोक्षेऽनद्यतनेभूतेलिट् कथंतसर्ज भविष्यत्यनद्यतनेलुट् कथंधर्मंत्वंस्रष्टासि भविष्य
टी०सु० त्सामान्येलृट् कथंधर्मंत्वस्रक्ष्यसिक्रियातिपत्तिकमेलृङ् कथंधर्ममस्रक्ष्यत् भूतसामान्येलुङ् कथंधर्ममस्राक्षीः जातुयत्तयदायदियोगेलिङ् अनवक्लृ
८५ प्त्यमर्षयो र्लङ्स्यादेषांयोगे ॥ अनवक्लृप्तिरसंभावना अमर्षोऽक्षमा लटोपवादः लृङ् तुक्रियाऽनिष्पत्तौभूतेवाभविष्यतितुनित्यमित्यर्थः जातुभवान्
हरिमनिंदिष्यदित्याद्युदाहर्तव्यं अगर्हायामिदं गर्हायांतु जातुयोगेलङुक्तः उताप्योर्वाढार्थयोर्लिङ् सामर्थ्यार्थयोरनयोर्योगेलिङ् वाढार्थयोः किं उतदंडः
पतिष्यति अपिधास्यति द्वारं अत्रप्रश्नः प्रच्छादनंचगम्यते स्वाभिप्रायाविष्करणेगमेर्लिङ् ननुकच्चितिकालत्रयेसर्वलकारापवादः कच्चितिकिं॥

गर्हायांलडपिजात्वोः कालत्रयेअपिजायान्त्वमजसि जातुगणिकामादत्से वाकथमितिलिङ् लटोगर्हायाङ्कालत्रये कथन्धर्म्मंन्त्सजेःत्सज
सिवा जातुयत्तयदायदियोगेलिङ् लटोपवादः जातुयत् यदायदित्वा दृशोहरिन्निंदेत् नावकल्पयामि नामर्षयामि उताप्योर्वा
ढार्थयोर्लिङ् कालत्रये उतअपिवाहन्यादघंहरिः स्वाभिप्रायाविष्करणेगमेर्लिङ् कालत्रये ननुकच्चिति कामोमेभुञ्जीतभवानितिक
च्चिदितिकिम् कच्चिज्जीवतिमेमाता हेतुहेतुमतोर्भविष्यतिलिङ्वा कृष्णंनमेच्चेत्सुखंयायात् कृष्णन्नंस्यतिचेत्सुखंयास्यति इच्छार्थे
षु लिङ्लोटौ कामप्रवेदने इच्छामिभुञ्जीत भुङ्क्ताम्भवान् इच्छार्थेभ्योलिङ्लटौ वर्त्तमानार्थे कामयते कामयेत ॥ ॥ ः॰ः॥ ॥

कामोमेकच्चित्जीवतिवर्तमानसमीपे इतिलट् हेतुहेतुमतोर्भविष्यतिलिङ्वा हेतुःकारणंहेतुमत्फलंपक्षेलृङ् कृष्णंनमेच्चेत्सुखंयायात् कृष्णनतिः। राम०
सुखप्राप्तेर्हेतुः भविष्यत्येवेष्यते नेहहंतीतिपलायते इच्छार्थेषुलिङ्लोटौ कामइच्छाप्रवेदनं प्रकाशनंतस्मिन्नर्थे इच्छार्थेभ्योलिङ्लोटौ इच्छार्थो ८५
येधातेइच्छार्थास्तेभ्यः तेनवसकांनाविस्यादयोपीच्छार्थाग्नाह्याः ॥ ॥ ः॰ः ॥ ॥ ॐनमोभगवतेवासुदेवाय ॥ ॥ ः॰ः ॥ ॥

पौनःपुन्येभृशार्थेचधातोर्लोट् सर्वलकारविषयेलोटोहिस्वौसर्वंतुवादिविषयेतध्वमोर्विषयेवा पौनःपुन्यंभृशार्थश्चधातोरेवार्थःलोट्तुद्योतकइतिभावः॥ मवुतुवादीनामादेशस्त्वेपि तांस्थानेविहितस्यहेःस्थानिवद्भावेनपित्वात् ङिच्चपिन्नपिच्चङिन्नेतिभाष्योक्तत्वात् ङित्वाभावेलुनीहीत्यत्र ईहल्यघोरितीत्वंन स्यात् ब्रूहिइत्यत्र ब्रुवःपञ्चानामादितआहोब्रुवः इत्यादावीप्रुपितिङ्प्रत्यये ब्रवीहीतिचस्यात् तृणेढ़इत्यत्रतु तृणेहोनमिहलीतीत्यागमः पितीतिइमागमेतृणेढिइतिचस्यात् अतोलोटो हिस्वाविस्युक्तं सकलपुरुषवचनविषये परस्मैपदेभ्योहिःकर्तरिआत्मनेपदेभ्यःस्वोभावकर्मकर्तृषुक्रियासमभिहारे द्वेइतिद्वित्वंयस्माद्धातोर्लोट् विहितस्तस्यैवधातोरनुप्रयोगश्चकर्तव्यः अनुप्रयोगात् यथायथंलडादयः तिबादयश्चकर्तव्याःततःसंख्याकालयोःपुरुषविशेषार्थस्यचाभिव्यक्ति


पौनःपुन्येभृशार्थेचधातोर्लोटःसर्वलकारविषये तस्यलोटोहिस्वौ
सर्वंतुवादिविषये तध्वमोर्विषयेवा क्रियासमभिहारे द्वित्वन्तस्यै
वधातोरनुप्रयोगश्च ॥ ॥ॐनमोभगवतेवासुदेवाय० ॥ ॥

र्भवति अत्रलोडंतविषयेसंख्याकारकादीनांहिस्वांतादप्रतीतिस्तद्बोधनायाऽनुप्रयोगोन्यायतएवयाहिइतियातिपुनःपुनरतिशयेनवायानंहिप्रत्ययांन स्यार्थःएककर्तृकंवर्तमानंयानंयातिइत्यस्यार्थः। इतिशब्दस्तुभेदाऽन्वयेतात्पर्यंग्राहयति मध्यमपुरुषबहुवचनेनशब्देतुयातयातेतियूयंयाथप [illegible]याहि याहीति यूयं याथ एवंभूतभ[illegible]णोरप्युदाहरणं यास्यति इति याहि याहि मध्यमपुरुषबहुवचने ध्वंशब्देतु अधीध्वं अधीध्वमिति यूयम धीध्वे पक्षे अधीष्वा[illegible]धीघ्व[illegible] [illegible]भावकर्मणोस्तु भूयस्व भूयस्वेति भूयते पच्यस्व पच्यस्वेति पच्यते इत्यादिज्ञेयम् ॥ ॥ ॥ ॥

अनेकक्रियासमुच्चयेतुवालोट् तस्यहिस्वौतध्वमोर्विषयेवासामान्यार्थस्यधातोरनुप्रयोगातिवादयः चिनोतेर्भावेस्वरादन्प्रत्ययेक्तनेसमुद्दीयतइतिसमु
च्चयः अस्मिन्नर्थेयोनः पुनेभक्षार्थेचेत्यः अनुवर्त्तनात् द्विलमकत्वेवोदाहरति तध्वमोस्तुः पिवतखादतेति यूयं अभ्यवहरथपक्षे पिवखादेति यूयंभ्र
भ्यवहरथ भुंग्ध्वं आस्वादध्वमिति यूयं अभ्यवहरध्वे पक्षेभुंक्ष्व आस्वादस्वेति यूयं अभ्यवहरध्वे लोट अभावपक्षेसक्तून्पिवतिधानाःखादतीत्य
न्नंभुंक्ते दाधिकमास्वादते धानाभ्रष्टयवेस्त्रियः इत्यमरः दध्नासंस्कृतं दाधिकंव्यंजनादिपुंस्यवस्कंदलुनीहिनं दनं सुषाणरत्नानिहरामरांगनाः विग्द

अनेकक्रियासमुच्चयेवालोट् तस्यहिस्वौ तध्वमोर्विषयेवा समानार्थस्यधातोरनुप्रयोगात्तिवादयः याहि याहीति याति एवंया
तः यान्ति यासि याथः यात यातेति यूयम् याथ यामि यावः यामः याहि याहीति यास्यति अयासीत् अधीष्वाधीष्वेत्यधीते ॥
एवमन्यत्रापि ध्वम्विषये प्राग्वत्पक्षे अधीध्व मधीध्व मिति यूयमधीध्वे सक्तून्पिवधानाः खादेत्यभ्यवहरति पिवत खाद
तेत्यभ्यवहरथ अन्नम्भुंक्ष्व दाधिकमास्वादस्वेत्यभ्यवहरते भुंग्ध्वमास्वादध्वमित्यभ्यवहरध्वे ॥ इतिआख्यातप्रक्रियास

ह्यपक्के नमुचिद्विषावलीयइत्यमस्वास्थ्यमहर्निशंदिवः ॥ १ ॥ अवस्कंदनलवणमोषणाहरणादिरूपाभूताऽनद्यतनेपरोक्षाएककर्त्तृका अस्वास्थ्य
क्रियतेत्यर्थः ॥ ॥ इतिलकारार्थप्रक्रियासमाप्तम् ॥ ॥ बुद्धिमांद्यवशात्किञ्चिद्यद्शुद्धमलेखिततत् द्वेषभावंसमुत्सृज्यशोधनीयंमनीषि
भिः ॥ १ ॥ इतिसिद्धांतचन्द्रिकाव्याख्यायामाख्यातकाण्डंसमाप्तिमगमत् ॥ ॥ मतोऽष्टम्यजगन्नाथसदानंदेनसंमुदा ॥ ॥ सिद्धान्तचन्द्रि
काद्यत्तिः क्रियतेद्धत प्रकाशिका ॥ १ ॥ ॥ शुभम्भूयात् ॥ ॥ सम्वत् ॥ १९२५ ॥ ॥ शाके ॥ १७९० ॥ ॥ वैशाखशुक्ले ८ गुरुवासर ॥



॥ ॥अथरुद्रजप्रारम्भः॥ ॥

॥ श्रीगणेशाय नमः ॥ ॥ ॐ प्रतोष्य जगन्नाथं सदानंदेन संमुदा सिद्धांतचन्द्रिकावृत्तिः क्रियते कृत्प्रकाशिका १ कृत्कर्तरि कृदन्तर्गतः कर्तरीति बोध्यं तृच्ण्वुलौ०
धातोरेतौ स्तः कर्तरि कृत्प्रत्ययमाह पचतीति विग्रहः चोः कुरिति कः कृत्तद्धितेति नामसंज्ञायां स्वादिर्विभक्तिः सुरुत्वविसर्गाः स्यात् सेयदिति सेपत्वं टिलोपश्च पक्ता
पाकानुकूलकृतिमान् देवदत्त इत्यर्थः कृतः धातोः परस्य वसादेः कृतः प्रत्ययस्येट् वसेति प्रत्याहारः ककारेऽत्र पवर्गीयः भवतीति भविता कुटकौटिल्ये तुदादिः कु
टादेर्ञ्णिद्धर्जमिति प्रत्ययस्य ङित्त्वान्न गुणः कुटतीति कुटिता एधते इति एधिता गुपू रक्षणे आयादय आर्धधातुके वेति वाऽऽयः आयपक्षे कृत इति नित्यमिट् अन्यत्र
ऊदितो वेति वेट् गोपायतीति गोपायिता गोपिता गोप्ता षह मर्षणे इषु सहेति वेट् सहते इति सहिता हुडभावे हो ढ इति हस्य ढः तथोर्ध इति धस्य धः ष्टुत्वं ढि ढ

॥ श्रीगणेशाय नमः ॥ कृत्कर्तरि वक्ष्यमाणः प्रत्ययः कृत्संज्ञकः स च कर्तरि तृच्ण्वुलौ धातोः पक्ता कृतः वसादेः कृ
तइट् भविता कुटकौटिल्ये कुटिता एधते इति एधिता गोपिता गोपायिता गोप्ता सहिता सोढा एषिता एष्टा युवोरनाकौ

वाचकः पाचकः भावकः धावकः दायकः घातकः जनकः घटकः धाटकः दरिद्रायकः कोटकः शमकः नियामकः

इति ढलोपः पूर्वदीर्घो सहिवहोरोदवर्णस्येत्योत्वं सोढा इषु इच्छायां इषु सहेति वेट् इच्छतीति एषिता इडभावे ष्टुत्वं एष्टा वुण् प्रत्ययमाह णकार इद्ध्यर्थः
युवोरनाकौ युश्च वुश्च युवू तयोः युवोर्वकौ इति वाचकः पचति पाचयतीति वा पाचकः भवतीति भावयतीति वा भावकः यदि ण्यंतात् वुण्विधिः तदा णेरिति०
णिलोपः ददातीति आतो युगिति युक् दायकः हंतीति हनो घदिति घत् घातकः जनी प्रादुर्भावे दैवादिकः जनजनने जुहोत्यादिः जनयतीति जनवध्यो
रितिन वृद्धिः णेरितिणिलोपः जनकः घटयतीति मितां ह्रस्व इति ह्रस्वः णेरितिणिलोपः घटकः दरिद्रातीति आतो युगिति युक् दरिद्रायकः तृच्प्रत्यये तु कृत
इतीट् दरिद्रातेरनपीत्यालोपः दरिद्रिता कुटकौटिल्ये कुटादेर्ञ्णिद्धर्जमिति वुणो ङित्त्वाद् उपधायाल घोरितिगुणः कुटतीति कोटकः शमु उपशमे मांतस्य से

दीनेतिनवृद्धिः शाम्यतीतिशमकः यमउपरमेनियच्छतीतिमांतस्यसेटइतिवृद्धिनिषेधस्तुनप्रवर्तते अस्यानिट्त्वात्नियामकः॥ ॥क्रमेः कर्तर्यात्मने॰ द्विषयात्० कृतइण्न आत्मनेपदविषयात्क्रमेःपरस्यकर्तरिकृत्प्रत्ययस्यइण्नभवति प्रोपाभ्यांसमर्थाभ्यामितिक्रमेरात्मनेपदविषयता प्रक्रमेतिइतिप्रक्रंतात्प्र त्ययः कर्तरीतिकिं प्रक्रम्यतेइतिप्रक्रमितव्यं आत्मनेपदेतिकिंसंक्रामतीति संक्रमिता नाम्युपधात्कप्रत्ययमाह प्रत्ययाद्यालशकवर्गाइत्संज्ञकाभवंति॥ तद्धितवर्जे किलाद्गुणोनवोधयतीतिबुधः क्षिपप्रेरणे क्षिपतीतिक्षिपः कप्रत्ययेतुदेशावुणितुक्षेपकः वर्ततेइतिवृत्तः प्रकृज्ञाभ्यश्चएभ्योपिकः प्रीञ्तर्पणे प्रीणातीतिप्रधातोरितीयप्रियः कृविक्षेपेकिरतीति ऋतइद्धातोः किरः जानातीति आतोनपीसालोपः ज्ञः उपसर्गे आदंतात्कः उपसर्गेपूर्वपदे।

क्रमेः कर्तर्यात्मनेपदविषयात्कृतइण्न प्रक्रन्ता नाम्युपधात्कः क्षिपः बुधः वृतः प्रीकृज्ञाभ्यश्च प्रियः किरः ज्ञः उपसर्गे आदन्ता त् प्रदः सुज्ञः सुग्लः सुस्थः पचिनन्दिग्रहादेरयुणिनि पचादेः नन्दादेर्युः ग्रहादेर्णिनिः पचः वदः चलः पतः चरः चरिच लिपतिवदीनाम्वाद्वित्वम्पूर्वस्य आक् अप्रत्ययेपरे चराचरः चलाचलः पतापतः वदावदः हन्तेर्हस्य घत्वञ्च घनाघनः॥

आदंताद्धातोःकः प्रददातीति आतोनपीसालोपः प्रदः सुष्ठुजानातीतिसुज्ञः ग्लैहर्षक्षयेसुष्ठुग्लायतीतिसुग्लः पचिनंदिग्रहादेरयुणिनि द्वंद्वांते श्रूय माणाः शब्दः प्रत्येकंसंबध्यते इत्यादिशब्दः प्रत्येकंयोज्यः पचादेर्धातोरप्रत्ययः नंद्यादेर्धातोर्युप्रत्ययः ग्रहादेर्धातोर्णिनिप्रत्ययः। अप्रत्ययमाह॰ पचतीतिपचः वदतीतिवदः चलसंचलने चलतीतिचलः पत्लृपतने॥ पततीतिपतः चरतीतिचरः चरिचलिपतिवदीनांवाद्वित्वंपूर्वस्याक् अप्रत्यये अत्रह्रस्वइतिह्रस्वः पूर्वस्यहलादिशेषइत्यादिशेषश्चनभवति आगमस्यदीर्घत्वसामर्थ्यात् चराचरइत्यादि हंतेर्हस्यघत्वंच हंतेर्द्वित्वंपूर्वस्यहस्यघ त्वंवा प्रत्ययेचकारात् पूर्वस्याक् उत्तरहस्यतुपूर्वोहंतेरिति घः घनाघनः ॥ ॥ ॥

के॰ कु॰ पाटेर्णिलुक् चोकु च दीर्घश्च पूर्वस्य यद्यपि णेरित्यनेनैव णिलोपः सिद्धः तथापि प्रत्ययलक्षणेनोपधावृद्धिर्माभूदित्येवमर्थं लुक्करणं पूर्वे णिलुक् ततऊगाग
तौ॰ सु॰ मपूर्वदीर्घश्च पाटयतीति पाटूः पटः इहापि हन्त्रस्य हसादिः शेषयोरभावः पक्षे हंतीति हनः णेरिति णिलोपः पाटः सुप्रत्ययमाह सुवोरित्यनादेशः टुणदि समृद्धौ
२ नन्दयतीति णेरिति णिलोपः नंदनः टुवम् उद्गिरणे ग्लास्नावनुवमामिति वैकल्पिकमीत्त्वाभावे वामयतीति वामनः दुषवैकृत्ये दुषेर्णाविति दीर्घः णिरिति
णिलोपः दूषयतीति दूषणः साधसंसिद्धौ साध्नोति साधयतीति वा साधनः वृधु वृद्धौ वर्द्धते इति वर्द्धनः शोभते इति शोभनः रोचते इति रोचनः रुशब्दे रावयती
ति णेरिति णिलोपः रावणः सहमर्षणे सहते इति सहनः तपऐश्वर्ये दैवादिकः तप्यते इति तपनः दाम्यतीति दमनः जल्पतीति जल्पनः कुचशब्दे कोच

पाटेर्णिलुक् चोकु दीर्घश्च पूर्वस्य पाटूः पटः हनः पाटः नन्दनः वामनः दूषणः साधनः वर्द्धनः शोभनः रोचनः रावणः स

हनः तपनः मदनः जल्पनः प्लवनः कुचसंकोचने कोचनः म्लेछ अव्यक्ते शब्दे म्लेच्छनः लवणः णत्वं निपात्यम् ग्राही उत्सा

ही उद्भावी छायी पायी मन्त्री आयाची मंत्री तंत्री आवादी अपराधी दृशादेशः दृशपाघ्राध्माधेटांशः शिति चतुर्वत् च

तुर्षु तिवादिषु यत्कार्यमुक्तं तच्छिति परे भवति पश्यः धयः धमः जिघ्रः पिबः ॥ ९ नः म्लेछ अव्यक्ते शब्दे म्लेछतीति म्लेच्छनः लुना
तीति लवणं नंद्यादिगणेनिपातनात् णत्वं णिनिप्रत्ययमाह ग्रहस्था चौच वर्गटवर्गा विनोत्सः इति णिन्सा दत्वउपधायाइति वृद्धिः गृह्णातीति ग्राही हन्ति
ति सोदीर्घः नान्नोनइति नलोपः ग्राही षहमर्षणे उत्सहते इति उत्साही उद्भासते इति उद्भासीति भवतीति आतो युगिति युक् स्थायी छो छेदने छ्यतीति छायी
पिबतीति पायी मंत्रिगुप्तभाषणे चुरादिः मंत्रयतीति णेरिति णिलोपः मंत्री टुयाचृ याञ्चायां आयाचते इति णिनोऽदादेशः आयाची नवदतीति आवा
दी राधसंसिद्धौ अपराध्यतीति अपराधी दृशादेशः दृशपाघ्राध्माधेट् भ्यः शप्रत्ययो भवति शप्रत्ययमाह यस्येत्संज्ञा शिति चतुर्वत् पश्यतीति दृश सम॰
देरिति पश्यादेशः अपूकृतरीति अपूअदेरित्यलोपः पश्यः पापाने पा रक्षणे इत्ययं तु न गृह्यते लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहण २
मिति न्यायात् पिबतीति पिबः घ्रागंधोपादाने जीघ्रतीति जिघ्रः ध्माशब्दाग्निसंयोगयोः धमतीति धमः धेट् पाने धयतीति धयः ॥ ॥ ⁘ ॥ ॥ ९ ॥

घ्रः संज्ञायां न संज्ञायां वाच्यायामस्मात् शेन विशेषेण जिघ्रतीति उपसर्गे आ दत्तादिति कः आतो न पीत्यालोपः व्याघ्रः अनुपसर्गेभ्यो लिंपविंद धारि पारि वेद्युदेजि चेति सा तिसाहिभ्यः शः लिपू उपदेहे विद्लृ लाभे तौ दादिकौ विमौ संभवादुभौ निर्दिष्टौ तेन ज्ञानार्थस्यैव विदेर्ग्रहणं न तु सत्ताद्यर्थकस्य लिंपतीति विंदतीति तुदादेरिति श्रदेरि त्यलोपः। विदः मुचादेरिति नुम् धृञ् धारणे धृङ् अवस्थाने अनयोर्द्वयोरपि ग्रहणं धारयतीति धारयः पार कर्म्म समाप्तौ चुरादिः पृ पालनादौ इति ण्यंतो वा पार यतीति पारयः विद चेतनादिषु चुरादिः ज्ञानाद्यर्थानामन्यतमो ण्यंतो वा वेदयतीति वेदयः उत्पूर्वः एजृ कंपने ण्यंतः उद्धेजयतीति उद्धेजयः चित्त संचेतने चुरादिः चेतयतीति चेतयः सातिः सुखे सौत्रः सातयतीति सातयः क्विप्रत्यये तु सात्परमात्मा सात विद्यते येषां ते सात्वंतो भक्ताः षह मर्षणे चुरादिः प्रयोज्यक ण्यंतो वा सा

इङ्धार्य्योरकृच्छ्रिणि कर्त्तरि शतृ अकृच्छ्रं सुखसाध्यो धात्वर्थः आभ्यां शतृप्रत्ययः स्यात् अकृच्छ्रिणि कर्त्तरि पुनः शतृप्रत्ययमाह इङ् आत्मनेपदत्वात् शतृप्रत्ययो न सिध्यति धा रयतेरपि आत्मगामिनि क्रियाफले शतृप्रत्ययो न सिध्यति तदर्थोऽयमारंभः इङ् अध्ययने अधीते इति अदादित्वाच्छपो लुक् तनु धातोरिति ीय् अधीयन् धारयतेरिति अपधारयन् द्वि षः शत्रौ द्विषः अशत्रौ अस्मात् शत्रुवाच्ये शतृप्रत्ययः स्यात् द्विषोऽमित्रे द्विषन् अर्हेः पूजायामस्मात् शतृप्रत्ययः स्यात् पूजायामर्थे अर्हतीति अर्हन् शीले तृन् तृन्प्रत्ययमाह नरक स्तरार्थे कर्त्तरि वर्त्तमाना ये प्रत्ययास्ता आक्वौ इत्यादिषु बोध्याः करोतीत्येवंशीलः कर्त्ता कटं इष्णुच् उकञ् शीले धातोरेते प्रत्ययाः शीले ऽर्थे इष्णुच् उकञ् प्रत्ययानाह उकञ् ककारो गुणनिषेधार्थः अलंकरोतीत्येवं अलंकरिष्णुः निराकरोत्येवंशीलः निराकरिष्णुः जनी प्रादुर्भावे प्रजायते इत्येवंशीलः प्रजनिष्णुः जिभुवोर्नेह गुणोऽत्रो जयतीत्येवंशीलः जिष्णुः भूष्णुः ग्लास्नुः त्रा सोद्वेगे हृ वत्योरिति णं त्रस्नुः गृधु अभिकांक्षायाम् गृध्नुः ञिधृषा प्रागल्भ्ये धृष्णुः क्षिप प्रेरणे क्षिप्नुः षाकोकण: षाक उ उकण प्रत्ययानाह षाकस्य षः ष्टुत्वं द्वार्थः उकणो ॥

इङ्धार्य्योरकृच्छ्रिणि कर्त्तरि शतृ अधीयन् धारयन् द्विषः शत्रौ द्विषन् अर्हेः पूजायाम् अर्हन् शीले तृन् कटं कर्त्ता इष्णुच् उकञ् शीले त्रसि गृधिधृषिक्षिपिभ्यः क्नुप्रत्ययः अलंकरिष्णुः निराकरिष्णुः प्रजनिष्णुः जिभुवोर्न्नेट् गुणो स्नौ जिष्णुः भूष्णुः ग्लास्नुः त्रस्नुः गृध्नुः धृ ष्णुः क्षिप्नुः षाकोकण: शीले ऽर्थेषा उ उकण इत्येते प्रत्ययाः जल्पाकः भिक्षाकः कुट्टाकः लुंठचौर्य्ये लुण्ठाकः वराकः चिकीर्षुः आशंसुः भिक्षुः लाषुकः पातुकः पादुकः स्थायुकः भावुकः वृषु सेचने वर्षुकः घातुकः कामुकः गामुकः शारुकः ॥० ॥ ॥०

णो वृङ्वर्थे जल्पतीत्येवं जल्पव्यक्तायां वाचि जल्पाकः भिक्ष भिक्षायाम् भिक्षाकः कुट्ट भेदने लुंठ स्तेये चौरादिकाविमौ कुट्टाकः लुंठाकः वृङ् सम्भक्तौ वराकः सांताशंसु भिक्षिभ्य उ सः प्रत्ययः तदंतो धातुरुच्यते आङः शासु इच्छायामयमेव गृह्यते न तु शंसु स्तुतौ आङा सह निर्देशात् भिक्ष भिक्षायाम् भिक्षुः आशंसुः कर्तुमिच्छति सन्प्रत्यये ॥ द्वित्वाद्विषः सेदति इत्वं से दीर्घः इति दीर्घः अत इत्वं रषोर्विहस्य इति दीर्घः षत्वं चिकीर्षं नियत इति अलोपः चिकीर्षुः लष कांतौ उकञ् लाषुकः पतॢ पतने पातुकः पद गतौ पा दुकः ष्ठा गति निवृत्तौ स्थानो युक् स्थायुकः भू सत्तायाम् भावुकः वृषु सेचने उपधायाल घोरिति गुणः वर्षुकः हन हिंसागत्योः हनो घ इति घत् घातुकः कमु कांतौ कामुकः गम्ल गतौ गामुकः शॄ हिंसायां शारुकः ॥०

शृवंद्योरारुः शृहिंसायां वदि अभिवादनस्तुत्योः आभ्यामारुः आरुप्रत्ययमाह शरारुर्घातको हिंस्रः वंदारुरभिवादक इत्यमरः स्पृहिगृहिपतिदयिनिद्रातंद्राश्रद्धाशीङ्भ्य आलुः
आलुप्रत्ययमाह स्पृह ईप्सायां गृह ग्रहणे पत गतौ एते त्रयश्चुरादावदंताः अतोलोपस्य स्थानिवत्त्वान्नोपधाया गुणवृद्धी णेरनिटि णिलोपो न तु विडामंते इति निषेधात् णेर्गुणे कृते स्पृह
यालुः गृहयालुः पतयालुः दयालुः द्राकुत्सायां निपूर्वः आतोनपीत्यालोपः निद्रालुः तत् पूर्वो द्रा तत् शब्दस्य समासेन त्वं निपात्यते तंद्रालुः श्रत् पूर्वो डुधाञ् धारणादौ धे
ट्पाने अयं तु न गृह्यते श्रत् पूर्वस्य धेटः प्रयोगाभावात् शीङ् स्वप्ने शयालुः कथं तर्हि कृपालुरिति कृपायां श्रद्धायां च लातीति विग्रहे मृगय्वादित्वात् कुः शमादिभ्यो घिनुण्
शमु तमु दमु श्रमु भ्रमु क्षमु क्लमु मुद इति शमादयोऽष्टौ घिनुणप्रत्ययमाह ककारः उच्चारणार्थः घित्वात् चजोरिति कगौ णित्वाद्वृद्धिः शाम्यतीत्येवंशीलं मांतस्य सेट्त्वान्न वृद्धिः इनहन

शृवन्द्योरारुः प्रत्ययः शरारुः वन्दारुः स्पृहिगृहिपतिदयिनिद्रातंद्राश्रद्धाशीङ्भ्य आलुप्रत्ययः स्पृहयालुः गृहयालुः पतयालुः दयालुः
निद्रालुः तदो नात्वम् तंद्रालुः श्रद्धालुः शमादिभ्यो घिनुण् शमी दमी तमी चजोः कगौ घिति चकारजकारयोः ककारगकारौ स्तो
घिति परे सम्पर्की संसर्गी योगी विवेकी त्यागी रागी भागी विकाषी विलासी प्रलापी प्रसारी प्रमाथी प्रवासी निंदादेर्वुञ् निन्दकः हिंस
कः परिक्षेपकः परिवादकः ॥०

इति दीर्घः शमी तमी दमी श्रमी भ्रमी क्षमी क्लमी प्रवेस्य दीर्घः श मादी आदि शब्देनान्येपि ग्राह्याः पृची संपर्के चजोरिति कः संपर्की सृज वि
सर्गे संसर्गी युज समाधौ युजिर् योगे वा योगी विचिर् पृथग्भावे विवेकी त्यज हानौ त्यागी रञ्ज रागे रागी भज सेवायां भागी कष हिंसायाम् विकाषी लस श्लेषण क्रीडनयोः
विलासी लप व्यक्तायां वाचि प्रलापी सृ गतौ प्रसारी मंथ विलोडने प्रमाथी वस निवासे प्रवासी निंदादेर्वुञ् वुण्प्रत्ययेनापि सिद्धे वुञ् वचनं ज्ञापकं शीलादिप्रत्ययेषु जा
तीयेन भवंतीति वुञ् प्रत्ययमाह णिलोपवृद्धिः युवोरनाकौ इत्यकादेशः णिदि कुत्सायां निंदकः हिसि हिंसायां हिंसकः क्षिप प्रेरणे क्षेपकः वद व्यक्तायां वाचि णिजंतः णेरनिटि णे

चलनशब्दार्थादकर्मकात्युः। चलनार्थादकर्मकात् शब्दार्थाच्च युः स्यात् युप्रत्ययमाह युवोरित्यनादेशः चलकंपने चलनः चुपमंदायांगतौ चोपनः कपि चलने कंपनः शब्दशब्दे अदंतः चुरादिः णेरिति णिलोपः शब्दनः रुशब्दे रवणः अकर्मकात् किंपठिताविद्याम् अनुदात्तेतो हसादेरकर्मकात्युः स्यात् वृतुवर्तने वर्तनः अनुदात्तेतः किम् भविता हसादेः किम् एधिता अकर्मकात्किम् वसिता वस्त्रम् ज्वादेश्च युः जुगतौ वेगे च जवनः सृगतौ सरणः गृधु अभिकांक्षायां गर्द्धनः क्रुध क्रोधे क्रोधनः रुषरोषे रोषणः मडिभूषायाम् मंडनः भूष अलंकारे भूषणः ज्वादेरिति इनिप्रत्ययमाह इकार उच्चारणार्थः जिजये जि अभिभये च इनहनिति दीर्घः। जयी जुगतौ वेगे च प्रजवी हृङ् आदरे दरी क्षिक्षये क्षिनिवासगत्योश्च क्षयी दादेरुप्रत्ययमाह डुदाञ्

चलनशब्दार्थादकर्म्मकाद्युः युवोरनाकौ चलनः चोपनः कम्पनः शब्दनः रावणः इगिगतौ ज्योतिषि इङ्गति ज्योतिरिङ्गणः
अनुदात्तेतो हसादेरकर्म्मकाद्युः वर्तनः ज्वादेश्च युः जुगतौ वेगे च जवनः सरणः गर्द्धनः क्रोधनः रोषणः मण्डनः भूषणः ज्वा
देरिनिः जयी प्रजवी दरी क्षयी दादेरुः दारुः मेरुः सृघस्यदः क्मरः सृमरः घस्मरः अद्मरः भञ्जभासमिदो घुरः भङ्गुरः भा
सुरः मेदुरः विदिभिदिच्छिदेः कुरः विदुरः भिदुरः छिदुरः ॥ ९ दाने दो अवखंडने देङ् पालने त्रयाणामेषां ग्रहणं दारुः ननु दाणदा

योर्ग्रहणं डुधाञ् धारणादौ धारुः मिञ् बंधने मेरुः सृघस्यदः क्मरप्रत्ययः स्यात् क्मरप्रत्ययमाह कित्वात् गुणो न सृगतौ सृमरः घस्लृ अदने घस्मरः अद भक्षणे अद्मरः भंजभासमिदो घुरः एभ्यो घुरप्रत्ययः स्यात् घुरप्रत्ययमाह घित्वात् चजोरिति कुत्वं भंजो आमर्दने भंगुरः भासृ दीप्तौ भासुरः ञिमिदा स्नेहने मेदुरः विदिभिदिच्छिदां कुरः कुरप्रत्ययमाह कित्वात् गुणो न विद ज्ञाने अस्यैव ग्रहणं न तु विद्लृ लाभे इत्यस्य संप्रदायात् विदुरः भिदिर् विदारणे भिदुरः छिदिर् द्वैधीकरणे छिदुरः कुरः कर्त्तरि भवति तथा च भाष्यः प्रियतमाय वपुर्गुरुमत्सरच्छिदुरयादुरयाचितमंगनाः इह अदु

दुग्णानशजिम्तिभ्यः क्करट्पूएभ्यः क्करट्पृप्रत्ययःस्यात्तृटित्वात्ङीपुपित्वात्तुक् इणागतौ इत्वरः इत्वरी स्त्रीणश अदर्शनेनश्वरः जियये जित्वरः सृगतौ सृत्वरः गम्लृगतौ मलोपोनिपात्यते गत्वरः जागर्तेरूकः ऊकप्रत्ययमाह जागृनिद्राक्षये जागरूकः यङूऊक : एभ्यो यङंतेभ्यः ऊकःस्यात् यजेर्यङि कृते हित्वादि अातइति पूर्वस्यदीर्घः अतिशयेन यजतीति यायज्यते पापज्यते इतियायजूकः जपव्यक्तायांवाचि अतिशयेन जपतीति अमजपामिति पूर्वस्यनुक् जं जप्यते जपतेइति जंजपूकःदंशदशने अतिशयेन दशतीति नुक्दंदशूकः नोलोपइति नलोपः वदव्यक्तायांवाचि अतिशयेन वदतीतिवा वद्यते इति वाव दूकः भियः क्रुक्क्रुक्लुकाः जिभीभये अस्मादेते प्रत्ययाःस्युः क्रुक्क्रुक्लुप्रत्ययानाह कित्वान्नगुणः भीरुः भीलुकः भीरुकाः इत्यमरः नमादेरः रप्रत्ययःस्या

दुग्णानशजिसृभ्यः क्करट्पू इत्वरः इत्वरी नश्वरः जित्वरः सृत्वरः गमेर्हलोपश्च गत्वरः जागर्तेरूकः जागरूकः यङऊकः य जजपदंशवदिभ्यो यङन्तेभ्य ऊकश्शीले लुक् ऊकेसति यङोलुक् यायजूकः जंजपूकः दंदशूकः वावदूकः भियः क्रुक्क्रु। क्लुकाः भीरुः भीरुकः भीलुकः नमादेरः नम्रः कम्रः स्मेरः नञ्पूर्वोजसिः क्रियासातत्ये अजस्रम् हिंस्रः दीप्रः कम्रः विन्दुइच्छु एतौनिपात्यौ वेत्तित्तच्छीलो विंदुः इच्छतीतिइच्छुः ॥ ॥ ॐनमोभगवते० ॥ ॥ ❁ ॥

त रप्रत्ययमाह णमप्रह्वत्वेशब्देच नम्रः कपिचलने कम्रः स्मिङ ईषद्धसने स्मेरः जसुमोक्षणेच नञ्पूर्वनेत्यः अजस्रम् कमुकांतौ कम्रः हिंसिहिंसायाम् हिंस्रः दीपीदीप्तौ दीप्रः विन्दुइच्छु एतौ निपात्यौ वेत्तेर्नुम् इषेश्छत्वंच निपात्यते विदज्ञाने इत्यस्यैवग्रहणं नेतरेषाम् इषुइच्छायामित्यस्यैवग्रहणम्० ॥ नतुइषुगतौ इषआभीक्ष्ण्ये इत्यनयोः अनभिधानान्निपातनाद्वावेत्तीत्येवंशीलो विंदुः इच्छतीत्येवंशीलः इच्छुः विदुशब्दः पवर्गीयादिस्तुविदि अवय वे अस्मान्मृगय्वादित्वात्कुप्रत्ययेबोध्यम् ॥ ॥ ❁ ॥ ॥ ॥

स्वपित्पिध्वषेनर्जिङ् एभ्यो नजिङ् प्रत्ययः स्यात् नजिङ् प्रत्ययमाह ङित्वान्नगुणः इकारउच्चारणार्थः ञिष्वपूशये चोः कुरितिजस्यगः स्वप्नक् जितृषपिपासा
यांतृष्णक् निधृषाप्रागल्भे धृष्णक् स्यादेर्वरः एभ्यो वरः प्रत्ययः स्यात् वरप्रत्ययमाह ष्टागतिनिवृत्तौ स्थावरः ईशऐश्वर्येहवत्सोरितीणन्ईश्वरः भासृदीप्तौ
भास्वरः पिसगतौ पेस्वरः कसगतौ कस्वरः अदृतः किद्द्विश्चभूते किप्रत्ययमाह कित्वान्नगुणः किप्रत्यये द्वित्वादि पापाने दित्वादि आतोनपीत्यालोपः पपिः डु
दाञ्दाने ददिः डुकृञ् करणेचक्रिः वृङ् संभक्तौ वव्रिः हृञ्हरणे आजह्रिः जनीप्रादुर्भावे गमामिस्युपधालोपः जग्मिः हृषमर्षणे वहप्रापणे चलकंपने ए
तेभ्यङ्ता अतिशयेन सहते इति आजइति पूर्वस्यात्वं सासहांचक्रे इति यङइत्यलोपः अनपि अनपिच हसादित्ययलोपः सासहिः अतिशयेन वहतीति॰

स्वपित्पिधृषेर्नजिङ् प्रत्ययः स्वप्नक् तृष्णक् धृष्णक् स्यादेर्वरः स्थावरः ईश्वरः भास्वरः पिसपेसगतौ पेस्वरः क
स्वरः आदृतः किद्द्विश्चभूते आदंता दृदन्ताच्च जनिगमिनमिभ्यः सासहि वावहि चाचलि पा पतिभ्यः किङ्प्रत्ययोभूतेशीले
धातोश्च द्विलम् किल्लिङ्वद्भावः रामसोमंपपिर्यज्ञे ददिः गाश्चक्रिरद्भुतम् याचकान्वव्रिराजह्रिंपौण्डरीकेऽमहाद्विजान् १
यममहूत्तेशब्देच लोपः परांकिल्त्वंचास्य नेमिः जग्मिः सासहिः ॥ अथोणादयः ॥ सदोणादयः ॥ सर्वस्मिन्कालेउणादयः

वावह्यते वावहांचक्रे इतिवावहिः अतिशयेनचलतीति चांचल्यते चाचलांचक्रे इतिचाचलिः अतिशयेन पततीति पनीपत्यते पनीपतांचक्रे इति वं
चुस्तु इतिप्राप्तस्य नीकाभावोनिपात्यते रामः सोमंपपिर्यज्ञे ददिर्गाश्चक्रिरद्भुतम् ॥ याजकान्वव्रिराजह्रिः पौण्डरीकेऽमहाद्विजान् १ रामःसोमं प
पाविति पपिः आकादाविति वर्जवान्नकर्मणि षष्ठीरामो यज्ञेगाः सुरभिः ददाविति ददिः रामोयज्ञे अद्भुतमाश्चर्यं चकारेति चक्रिः रामोजवेयाजकान्
यत्तेकान् वव्रेइति वव्रिः रामः पौंडरीके नाम्नियज्ञेमहांतश्चतेद्विजाश्चते महाद्विजास्तान् आजह्रिः इतिसमाप्तम् अथोणादयः ॥ ॥ ॐ

कादेरुण उणप्रत्ययःस्यात् उणप्रत्ययमाह णित्वाद्वृद्धादिः डुकृञ् करणे करोतीति कारुः रूढियोगिकाभ्याम् उणादौ शब्दाः सिद्धंतियौगिकेतु धात्वर्थप्रतिका
रकान्वयोभवत्येव तथाच भट्टिः राघवस्यतथाकार्यंकारुर्वानरपुंगवः सर्ववानरसेनानामाऽऽश्वागमनमादिशदिति १ विश्वकर्मणिनाकारुः त्रिषुकारुकशिल्पि
नोरिति मेदनीकारुः शिल्पिनिकारके इतिधरणिः वागतिगंधनयोः आन्तोयुगिति सुकृ वायुः पापाने पारक्षणे पिबत्यनेनतैलादिकमिति पायुःसुकु गुदंत्वपा
नं पायुनेत्यमरः पातिरक्षतिविघ्न हेरम्बकोपिपायुः जि अभिभवेनजयत्यभिभवति० रोगानू इतिजायुः औषधभेषजौषधभेषजान्यऽगदोजायुरित्यमरः डुमि
ञ्प्रक्षेपणे मिनोति प्रक्षिपति देहे ऊष्माणमिति मिनाति मिनोति दोडामि स्यात्वसुक् चमायुः पुल्लिंगसाहचर्यात् मायुःपुंसिमायुः पित्तंकफः श्लेष्मइत्यम
रः गांवाचांविहतामिनोति तत्रक्षिपति इतिगोमायुः शृगालः स्वदऽऽस्वादने स्वदतेरोचते इतिस्वादुः साधसंसिद्धौ साध्नोतिपरकार्यमितिसाधुः स्वादुसाधू ॥

कादेरुण कारुः वायुः पायुः जायुः मिनोतीति मायुः स्वादुः साधुः आशुः दीर्य्यते इतिदारुः सानुः जनेर्जुण जानु चाटु चारु । ॥

किंशृणोतीति किंशारुः जरण्मेति जरणुः तोरस्मलः तरन्त्यनेनवर्णा इतितालु कृकेवच ऽऽकश्च कृकेनगलेनवक्तीति कृकवाकुः

भ्रादेरुः भरतिविभर्त्तिभरुः म्रियतेऽस्मिन्मरुः शत्रुः तरुः त्सरुः छद्मगतो खड्गमुष्टिः त्सरुः तनुः मनुः धनुः अणुर्ल्लेशः अणुः ।

कटुः वटुः शृणातीतिशरुः स्वरुर्वज्रम् स्वरुः त्रपुः असवः वसुः उन्देरिच्चादेः उनत्तीति उन्दुः ॥ ॥ ॥ ॥

विशेषनिघ्रो अश्नुतेव्याप्तो अश्नुते इत्याशुः आशुर्व्रीहिः पाटलःस्यात् क्लीवेशीघ्रादिमत्त्वेस्या त्रिषुषांभेद्गामिय दित्यमरः दृदारणे दीर्यते दारुःकाष्ठदा० रा०
विधनंत्वेधः इत्यमरः षणदाने सानुःस्नुःप्रस्थः सानुरस्त्रियामित्यमरः जनेर्जुण० जुणप्रत्ययमाह जकारणवित्तो अनुबंधद्वयसामर्थ्यात् जनिवध्योश्चेति १८
वृद्धिनिषेधोनप्रवर्ततेजल्पजंत्ति जानुनी चरणतो चारुत्वम् चटभेदे च चटः चटप्रियंवाक्यमिति हट्टचंद्रः चाटुर्नप्रियोक्तिःस्यादितिरत्नमाला तथाच
माघः चकारचवहुचाटून् प्रौढयोषिद्धृहस्यैतिमाघेतुक्लीवेपिचाटु चाटुतकसंभ्रमसामिति शृहिंसायां किंशारुः किंशारुर्नरिसस्यसूके विशिषेकंकप

[illegible] ॥ ० ॥ उणादि

वह्नौ कृतान्नामादेशेच जरायुः गर्भाशयः चोरस्सलः त्सरू इतिप्रसिद्धम् द्वयोरपिसवर्णे दीर्घे कृते चौतयोस्त्रोः त्सप्लवनसंतरणयोः त्सरुगतौ आभ्यांपरस्परस्यलः स्यात् ॥
मिणातिरुद्धोभ्यस्याम् तालुः इत्यर्ति अर्यते वाग्भालुः कर्कयालुर्गलंतिका इतिहकेवचः कम्बवचः कांतादेशः स्यात् ऊणिकुक् वाकुर्मधुरेचस्वरदेश्चरणायुधे इतिवि
श्वः म्रादेरुः उमस्यचः स्यात् उमस्तममाह मडूः प्राणत्यागे म्रियंते अस्मिन्भूतानि इतिमरुः निर्जलदेशः मरुः स्वर्णहरे पुंसीति मेदिनी मरुर्भत्स कनकयोरिति
हेमः शीङ्स्वप्ने शेते इतिशयुः अजगरे शयुर्वाहस इत्युभाविस्मरः त्सप्लवनसंतरणयोः तरंति अस्मिन् वानरकमनेनरोपका इतितरुः वृक्षः चरगतौ च
रंति भक्षयंति इममितिचरुः चरुर्भांडेचहव्यान्ने इति चणपकमन्नमित्यर्थः त्सरछद्मगतौ त्सरुः खड्गादिमुष्टिः तनुविस्तारे तनुकायेत्वचिस्त्रीस्यात् त्रि
षल्पेकृशे इतिमेदनी स्त्रियांमूर्तिस्तनुस्तनूरित्यमरः धनधान्ये धनुः स्यात्तनुः स्तनुषासार्द्धं धनुषाच धनुर्विदुरितिविश्वः उकारांतेऽमीहर्षः सुहृद्वंशजनि
तोपिगुणस्यस्यानतामनुभवन्नपिशक्तः छिद्रपूर्णेन सजस्समाम सपक्षसायकं धनुरिवाजनिवक्तः १ धनुः पुमान्प्रियालाद्रौ राशिभेदेशरासने इतिसांतेमेद
नी अयाम्स्त्रियांधनुस्थाणाविस्मरः डुमिञ्प्रक्षेपणे मीनाति मिनोति इत्सात्वंतुनेहबाहुलकात् मयुः तुरंगवदनोमयुरित्यमरः मयुस्तुरंगवदनोमडोपि
मयुमिष्यते इतिविश्वः डुमस्जोशुद्धौ मज्जतिपानीये इतिन्यंकादित्वात्कुगः रुवेरुवा इतिसस्वदः मद्गुः पानीयकाकयो इतिरभसः अणशब्दे अणुर्व्रीहिः
भेदस्त्वगुणः पुमान्इति लवलेशकणाणाव इत्यमरः कटेवर्षावरो कटतिरसंगमिति कटुः कटुः स्त्रीकटुरोहिण्यांलतागजिकयोरपि नपुंसकमकार्येस्यात्
त्रुहिगारसमाचके त्रिषुतहत्सुगंधौ अमत्सरेपिरवुरेपिचेतिमेदिनी वटवेष्टने वटतीति वटुः वटुर्हिजसुतः स्मृत इति संसारावर्तः स्पृहिंसायांशरुः कोपेश
रवज्रेइतिहैमः स्रगाद्वोपतापयो: स्वरुः शतकोटिः स्वरुः शंब इत्यमरः त्रपूषलज्जायाम् अग्निंदृष्ट्वात्रपतेलज्जतेइतित्रपुः रंगसीसकयोस्त्रपुरितिमे
दनी असुक्षेपणे अस्यंतिक्षिपंति शरीरमिति असवः पुंसि भूम्न्यःसवः प्राणाः इत्यमरः वसनिवासे वसुः वसुर्हदेश्मोयोक्तौशो वसुनोयेधनेमणौ हर्नाहिं
सागत्योहनुः पुमान् परो गडादितिवर रुचिकोशस्त्रीलिंगोप्ययं हनुर्हट्टविलासिन्यांनत्सारंभेगदेस्त्रियाम् द्वयोः कपोलावयवे इतिमेदिनी मनुमस्य
येहनुमान् पादिकोदीर्घोनिपात्यते हनूमान् च बंधबंधने स्नेहनेवध्नातीति बंधुः बंधूकपुष्पेस्यात् बंधुर्भ्रातरिबांधवे इतिविश्वः मनज्ञानेमनु

उ॰ कौ॰ टी॰ उ॰ १८ आदि राजोनैतः वविति भवयेव विदुः स्यंदे संप्रसारणं धश्च स्यंदू प्रस्रवणे अस्य यकारस्य संप्रसारणे दस्य धश्च स्यात् उप्रत्यये सिंधुः देशेन द विशेषे सिंधुर्नासरति स्त्रिया मित्यमरः उंदेरिच्चादेः उंदी क्लेदने अस्योकारस्य इः स्यात् उःप्रत्यये इन्दुः॥ ॥स्कंदेस्सलोपश्च॥ ॥स्कंदिर् गतिशोषणयोः अस्य सस्य लोपः स्यात् दुप्रत्यये स्कंद तीति शोषतीति स्कंदुः क्लीवेंवरीषं भ्राष्ट्रोनाकं दुर्वास्विदिनी स्त्रियामित्यमरः कंदुर्वानाइति पूर्वेणान्वया द्धा पुमान् इत्यर्थः स्कंदति जानन्नापोऽस्मिन्निति व्युत्पत्त्याभोगस्थानं कंदुरिति चेकित् सृजेरसुम् लोपश्च सृज विसर्गे आगमस्य कारस्युत्वेनशः कर्मे इति जः सृजतीति रज्जुर्वेण्यां गुणे योषिदिति मेदिनी फ लेर्गुक् गुगागमः स्यादुप्रत्यये फलनिष्पत्तौ फलगुः काकोदुंबरिकाभवेत् फलगुर्निर्थकमिति हैमः नदी च पाटेः पटिरादेशः स्यात् पटगतौ अंतः पाटयतीति प टुः मनेर्धः धांतादेशः स्यादुप्रत्यये मनज्ञाने मन्यतेति मधुः मधुश्चैत्रे च दैत्ये च मधुपुष्परसे मधुरिति रुद्रचंद्रः मकरंदस्य मद्यस्य माक्षिकस्यापि वाचका अर्थ

स्कन्देस्सलोपश्च कन्दुः सृजेरसुम्सलोपश्च रज्जुः फलेर्गुक् फल्गुः ॥ पाटेर्णृपटिः अटिरस्स्यात् पाटयतीति पटुः मनेर्धः मधुः जने

स्तुः जायते जन्तुः बलेर्गुक् बल्गुः नमेर्नाकिः नम्यतेऽनेनेतिनाकुः अस्तेर्णकुः स्वच्च शिशुः याभ्यांहिश्च ययुः बभ्रुः व्यधे

ऽङ्कुः विधुः कृग्रोरुरड् कुरुः गुरुः रपेरस्येत् अरिष्टं रपतीति रिपुः ॥ ॥ एर्चोदिगणे पाठात् पुंनपुंसकयोर्मधुइति शास्त्रतः जनेर्मा नां तादेशः स्यादुप्रत्यये जनी प्रादुर्भावे जायते जन्तुर्लोक्षा बलेर्गुक् गुगागमः स्यादुप्रत्यये बल संवरणे दंसोष्टपादिः बल्गुः स्याच्छगले पुंसि सुंदरे चाभिधेयवदि ति मेदिनी नमेर्नाकिः णम प्रह्वत्वे शब्दे च नाकुः वामलूरश्च नाकुश्च वल्मीकं पुंनपुंसकमित्यमरः अस्तेः कुः स्वच्च कुप्रत्ययः स्यात् स कुः सप्रत्ययवद्भव ति तेन सप्रत्यये यत्कार्यं द्वित्वादि तत् कुप्रत्यमाह कित्वान्न गुणः शोतनूकरणे कुप्रत्यये संध्यक्षराणामित्यात्वं द्वित्वम् यःसेइति पूर्वस्येत्वम् अत्तानपी त्यालोपः शिशुःबालकः याभ्यांहिश्च आभ्यां कुःस्यात् धातोर्द्वित्वं च या प्रापणे भृञ् भरणे यातीति ययुः बभ्रुः ययुरश्वोऽश्वमेधीयबभ्रुर्वैश्वानरे शूलपाणौ पाद॰ च गरुडध्वजे विशालेन कुले पुंसि पिंगलेत्वभिधेयवदिति मेदिनी बभ्रुर्मन्वन्तरे विह्लौ वभ्रुर्नकुलपिंगलौ इति धरणीकोशः चादन्यतोपि चकुः १८ कर्त्ता जह्नुः हर्त्ता ययुःपालकः व्यधेः कुः कुप्रत्ययः स्यात् व्यध ताडने ग्रहादिमिति सम्प्रसारणम् विरहिणं विध्यतीति विधुः विधुःशशांके कर्पूरे॰

हृषीकेशे वराहसे इतिविश्वः कृञोरुश्च । आभ्यां कुः स्यात् उदङ् नादेशश्च डुकृञ् करणे मशब्दे करोतीति कुरुः कुरुर्नृपान्तरे भक्ते पुमान् पुंभूम्नि वृत्तीति मेदिनी मणाति तत्वमिति गुरुः रपेः स्यात् रपेः कुमत्ययस्मात् अकारस्येत्वरपराणौ अनिष्टं स्यतीति रिपुः अर्जिदृशिकम्यमिपशिबाधामृजिपशितुक्धुक् दीर्घहकाराश्च अर्ज अर्जने अस्य ऋजि आदेशः एभ्यः कुप्रत्ययश्च अर्जयति गुणानिति ऋजुः दृशिर् प्रेक्षणे अस्य पशि आदेशः पशुः चादिगणे पठितः पशुदृश्ववर्थमव्ययम् इति धरणिः कमु कान्तौ अस्य तुगागमः कन्तुः कन्तुर्मकरकेतन इति त्रिकाण्डशेषः अमरोगे अमगत्यादौ वा अस्य धुगागमः अन्धुः कूपः पशि नाशने शौनः अस्य दीर्घः पडि पसि नाशने चुरादिरदन्तो वा पांसुर्नानहयोरज इत्यमरः तालव्यापिदन्त्याश्च शंवः शूकरपांशवः बाधृ विलोडने अस्य हादेशः बाहुः बाहुः स्त्रीपुंसयोर्भुज इत्यमरः ॥ अकारान्तोप्ययं बाहोच भुजयोः पुमानिति दामोदरः आयन्तोपि बाहा भुजे पुमान् मानभेदाश्च वृषवाग्नुषु इति मेदिनी प्रथिम्रदिभ्रस्जां सम्प्रसारणं सलोपश्च क्षिपः कु

अर्जिदृशिकम्यमिपशिबाधामृजिपशितुक्धुक्दीर्घहकाराश्च अर्जयति गुणान् ऋजुः सर्वानविशेषेण पश्यतीति पशुः
कन्तुः अन्धुः कूपः पांशुः बाधन्त बाहुः प्रथिम्रदिभ्रस्जां सम्प्रसारणं सलोपश्च पृथुः मृदुः न्यंक्वादेः कुः न्यङ्कुः भृज्जति तपसा भृगुः
लङ्घिवंह्योर्नलोपश्च लघुः बालमूललघ्वङ्गुलीनां वा लस्य रः रघुः वहुः ऊर्णोतेर्णुलोपश्च ऊरुः ॥

((मस्रयः त्रयाणां संप्रसारणं च भ्रस्ज सलोपश्च प्रथ प्रख्याने प्रथते इति पृथुः स्यान्महति त्रिषु त्वक्पत्र्यां कृष्णजीरे च पुमानग्नौ नृपान्तरे इति मेदिनी म्रद मर्दने म्रदितुं शक्यते अकठिनत्वादिति मृदुः कोमलः भ्रस्ज पाके न्यंक्वादेः कुः न्यंक्वादिगुणे कुत्वं निपात्यते नितरामञ्चतीति न्यंकुः न्यंक्वादित्वात् कुत्वं भृगुः शुक्रे प्रपाते च जमदग्नौ पिना इति विश्वः लङ्घिवंह्योर्नलोपश्च लङ्घि गतौ लघुः पक्कायां स्त्री लघुः क्लीबे शीघ्रे कृष्णागुरुण्यपि इति त्रिकाण्डशेषः लघुरगतौ मनोज्ञे निःसारे वाच्यवत् क्लीबे शीघ्रे कृष्णागुरुणि च पक्कायामोषधौ स्त्रियामिति मेदिनी बालमूललघ्वङ्गुलीनां वा लस्य रः एषां लोरत्वमापद्यते वा रघुः नृपभेदः रवेत्रधातोर्गमनार्थमर्थं विघ्नकारनाम्ना रघुमात्मसंभवमिति रघुः वहि वृद्धौ वहुः वहुसंख्यादिसंस्यास्तु विपुले त्वभिधेयवदिति मेदिनी ऊर्णोतेर्नुलोपश्च ऊर्णुञ् आच्छादने ऊर्णूयते आच्छाद्यते इति ऊरुः कर्मणि कुप्रत्ययः ॥

महति ह्रस्वश्च अस्यतीति कर्तरि कुप्रत्ययः उरुमहत् आङ्परयोः खनिशृभ्यां डिच्च अनयोरुपपदयोः आभ्यां कुः स्यात् स डिच्च डित्वाट्टिलोपः खनविदारणे आखुः शृहिंसायां परं शृणातीति परशुः पृषोदरत्वात् दकारलोपे पर्शुरपि पर्शुः पर्शुना सह तीति विश्वः द्रोश्च द्रु गतौ अस्मात्कुः स च डित् द्रवतीति द्रुः द्रुमः शाखावनहानद्रुमः शतद्रुस्तु शतद्रिः स्यात् इत्यमरः मृगय्वादयो निपात्याः कुप्रत्ययान्ता निपात्यन्ते याम्प्रापणे आतो नपीति आलोपः मृगं यातीति मृगयुः मृगयुः पुंसि गोमायौ व्याधपरमेष्ठिनोरिति मेदिनी मृगयुर्ब्रह्मणि स्यात्तो गोमायुर्व्याधयोरपीति विश्वः शकिशंकायां शंकते अस्मात् इति शंकुः शंकुः कीलगरे शास्त्रे संख्याप्यादपभेदयोः पादे नेदेवपापे च स्थाणावपि च दृश्यते इति विश्वः शंकुर्ना कीलशल्ययोः लगिगतौ अस्मात् कुप्रत्यये नेदीर्घं च निपात्यते नात् हृतौ नीलंगुः केचित्तु नीलशब्दे उपपदे गमेः ऊप्रत्यये लिटोपपूर्वपदस्य पाक्षिकदीर्घश्च निपात्यते इत्याहुः नीलंगुः क्रिमिजातौ स्यात् भंभराली प्रसूनयोरिति विश्वः नीलांगुः स्यात्॰

महति ह्रस्वः उरुमहत् आङ्परयोः खनिशृभ्यां डिच्च आखनतीत्याखुः परशुः द्रोश्च द्रुः शतधा द्रवति शतद्रुः मृगय्वादयो निपात्याः मृगं यातीति मृगयुः शङ्कुः नीलङ्गुः मद्यादेरुरः मन्दुरा वाश्यन्तेऽस्यामिति वा शुरा मथुरा चतुरः अङ्कुरः। मद्गुरादयो निपात्याः माद्यतीति मद्गुरः कर्बुरः बन्धूरः बन्धुरः कुक्कुरः कुकुरः असुरः मसुरः ॥

((क्रिमौ पुंसि भंभराल्यां तु योषिति इति मेदिनी नीलांगुरपि निलंगुरिति विश्वः मंद्यादेरुरः उरप्रत्ययमाह मदिस्तुत्यादौ मंदुरा वाजिशाला तु मंदुरा इत्यमरः मंथविलोडने मथुरा चते याचने चतुरः वाश्शब्दे वासुरा वाश्यंतेऽस्यामिति वा सुरा रात्रिगर्दभोपि अकिलक्षणे अंकुरः अंकुरो रुधिरे लोम्नि पानीयेऽभिनवोद्भिदि खर्जूरादित्वादूरप्रत्यये अंकूरोपि अंकुरो कूर एवेति विश्वप्रकाशः मद्गुरादयो निपात्याः कुरप्रत्ययान्ता निपात्यन्ते मदी हर्षे वुगागमनिपात्यन्ते माद्यते मद्गुरः मत्स्यभेदः कबवर्णे रुगागमो धातोः निपात्यते कर्बुरः कर्बुरं बुरः श्वित्रराक्षसोः वधबंधने बध्नातीति बंधूरः बंधुरौ स्यातां नम्रसुंदरयोः स्त्रियां पिसलिले हेम्नि कर्बुर पापरक्षसोः कर्बुरः

शब्देपुनरस्त्यवदितिमेदिनी कर्बुरश्चित्रएतस्यौवंधवंधने बध्नातीतिवंधूरः वंधूरोस्यातांन असुदस्योस्त्रिषिचिनिरतिदेवः कुक्कुशब्दाने कोकतेर्वाकुगागमोनि
पात्यते कुक्कुरः कुकुरः कुकुरोमनद्यांनिहरचंद्रः कुकुन्दरस्यारमे येनाऽमंथिवर्णे नपुंसके इतिमेदिनी असुक्षेपणे असुरः अशा मत्सये आसुरः मसिपरिणामे म
सुरकरप्रत्यये मसूरापि मसूरा मसूरा व्रीहिप्रभेदे पण्ययोषितिति मसूरा मसूरा वानावेश्याव्रीहिप्रभेदयोः मसूरीपापरोगेस्यादुपधानेपुनःपुमानितिमेदि
नी मल्लस्तसरोवाद्याविति विश्वः॥ ॥शावशेराप्नौ॥ आशुशब्दस्यनिपातनादाकारलोपश्च तस्मिन् सुशब्देउपपदे आ श्नोगम्यमानायां आशूड व्याप्ताविस्यस्मा
द्धातोरुप्रत्ययः स्यात् श्वशुरः पतिपत्न्योःप्रसूश्वश्रूः स्वशुरस्तुपितातयोरित्यमरः अविमह्योरिषट् इषट्प्रत्ययः स्यात् इषट्प्रत्ययमाह टित्वात्ङीप्रितङीप् ॥
अवरक्षणादौ अविषः अविषो राज जलधीइत्युक्तत्वात् अविशशब्देनराजासमुद्रश्च महपूजायां महिषः महिषीराजयोषितीतिहैमः अमेर्दीर्घः स्यादिष

शावशेराप्नो शुइति आशवर्थे श्वशुरः अविमह्योरिषट् अविषः महिषः अमेर्दीर्घश्च आमिषम् रुहेर्वृद्धिश्च रौहिषः कि
लेर्बुक्च किल्बिषम् मद्यादेः किरः मदिरा मुदिरः मन्दिरम् तिमिरम् मिहिरः रुचिरः रुधिरम् बधिरः शुषिरम्॥ ⁘ ॥

ट्प्रत्ययश्च अमगत्यादौ आमिषं आमिषत्वस्त्रियामासेनयास्यात् भोग्यवस्तुनिरुहेर्वृद्धिः अस्यवृद्धिः स्यात् इषट्प्रत्ययश्च रुहवीजजन्मनिरौहिषः शंवरौहि
षः इत्यमरः रोहिषोमत्स्यभेदः स्यात् रौहिषंचतृणंमतमितिसंसारावर्तः किलेर्बुक् किलश्वैत्यक्रीडनयोरस्मादिषट्प्रत्ययोधातोर्बुगागमश्चस्यात् किल्विषंपा
परोगयोरपराधेपीतिमेदिनी मद्यादेः किरप्रत्ययः स्यात् किरप्रत्ययमाह किलाल्लघुशुरा महीहर्षे मदिरा सुरा मुदहर्षे मुदिरः कामुकाभ्रमयोरितिमेदिनी मदि
सुत्यादौ मन्दिरंनगरं क्लीबेनागृहरालये इतिमेदिनी तिम आर्द्रीभावे तिमिरंतिमिरंध्वांतं नेत्रामयनके इतिमेदिनी मिहसेचने मिहिरः सूर्यवृद्धयोरिति
मेदिनी रुचदीप्तौ रुचिरं सुंदरं रुचिरं चारु इत्यमरः रुधिर आवरणे रुधिरोंगारकोपुंसिक्लीवंतुकुंकुमास्रजोरितिमेदिनी वंधवंधने नोलोपइतिनलोप
बधिरः श्रोत्रविकलइतिः शुषशोषणे शुषिरंवंशादिवाद्ये विवरेचनपुंसकं शुषिरंविवरंविलं छिद्रमित्यमरः॥ ॥ ⁘ ॥ ॥ श्रीराम

चं॰ कृ॰ टी॰ सु॰ २१

अजिरादयो निपात्याः किरच्प्रत्ययांता निपात्यंते अज गतौ अजेर्वीभावाऽभावः अजिरं दशपादीवृत्तौ तु नञ्पूर्वस्य जीर्यतेः ककारलोपो निपात्यते इत्युक्तं न जीर्यतीत्य
जिरः अजिरं प्रांगणे काये विषये दर्दुरे निले इति मेदिनी शश प्लुतगतौ शशेरुपधाया इत्त्वं निपात्यते शिशिरं शिशिरं स्याद्वृतोर्भेदे तुषारे शीतलेऽन्यवत् इति वि
श्वः शिशिरो ना हिमे न स्त्री ऋतुभेदे जडे त्रिष्विति मेदिनी श्रथ मोचने धातोरुपधाया इत्त्वं रेफलोपः प्रत्ययपरे कस्य लत्वं च निपात्यते शिथिलं ष्ठा गतिनिवृत्तौ
आतो न पीत्यालोपः स्थिरं निश्चलं तिष्ठतेर्वुक् ह्रस्वत्वं च निपात्यते स्थविरः स्फायी वृद्धौ यलोपः इति यलोपः आतो न पीत्यालोपः स्फिरं भूयः दभ्रं पुरु स्फिरं इति है
मः खद स्थैर्ये खदिरः खदिरी शाकभेदे स्त्री ना चंद्रे दंतधावने इति मेदिनी॰ शीङ् स्वप्ने शीङो वुक् ह्रस्वश्च निपात्यते शेरतेऽस्मिन् राजबलानीति शिविरं विवे

अजिरादयो निपात्याः अजिरम् शशाति इति शिशिरम् श्रथ मोचने शिथिलम् स्थिरम् स्फायी स्फिरम् स्थविरः खदिरः ॥

शीङो शिविरम् शल्ल गतौ शलिलम् अनिलः महिला कोकिला कुटिलः कमु कान्तौ कपिलः मथ्यन्ते रिपवोऽत्रेति मिथिला

शः शिविरं खंड इत्यमरः शल गतौ शलिलादयः इलच्प्रत्ययांता निपात्यंते शलति गच्छति निम्नमिति शलिलं अन प्राणने अनिलः मह पूजायां महिला पृषोदरादि
त्वात् महेलापि महिला फलिनी स्त्रियोरिति मेदिनी प्रियंगुः फलिनी फली इत्यमरः दमयंतीकाव्ये प्रयोगो यथा परमहेलारतोऽप्यपारदारिकः अत्र परस्य हेला स्त्री अयं
च परमा उत्कृष्टा हेला क्रीडा तत्र रत इत्यर्थः कुक आदाने कोकिलः कुट कौटिल्ये बाहुलकाद्गुणाभावः कुटिलः कमु कांतौ मस्य निपातनात् पः कपिलः क राम॰
पिलो रेणुकायां च शिंशपा गो विशेषयोः पुंडरीककरिण्यां स्त्री वर्णभेदे त्रिलिंगकः ना अनले वासुदेवे च मुनिभेदे च कुक्कुटे इति मेदिनी॰ मंथ विलोडने २१
अकारस्येत्वं निपात्यते॰ मथ्यंते रिपवोऽत्रेति॰ मिथिला नगरी॰ ॥ ॥

कुवेरादयोऽपि निपात्यंते कुवि आच्छादने अस्मादेरप्रत्ययो न लोपश्च निपात्यते कुंबत्यन्येषामैश्वर्यमिति० कुबेरः कुवेरस्त्र्यंबकसख इत्यमरः कद्रुवरणे अस्मादो तप्रत्ययो वकारस्य पत्वं च निपात्यते कपोतः २ स्याच्चित्रकंठे पारावत विहंगयोरिति मेदिनी कपोतः पक्षिमात्रे स्यादिति त्रिकांडशेषः भातेर्डवतुः डवतुप्रत्ययमाह टित्वात् टिलोपः उदित्वान्नुम् ईश्वभातीति भवान् भादीप्तौ सर्वादिशब्दोऽयं किशोरादयो निपात्यंते उरप्रत्ययांता उलप्रत्ययांताश्च किम् पूर्वस्य श्रृणातेष्टिलोपः किमोंऽत्यलोपश्च निपात्यते ॥ शृहिंसायां किशोरः किशोरोऽश्वस्य शावके तैलपर्ण्योषधौ च स्यात् तरुणावस्थस्य सूर्ययोरिति मेदिनी कठकृच्छ्रजीवने कठोरः कठिनः। पूर्णश्च कठोरताराधिपतौ छनच्छविरिति माघः चकतृप्तौ चकोरः पक्षिभेदः कपिचलने नो लोपो निपातनात् कपोलः उलप्रत्ययोऽप्येभ्यो निपातनात् पटगतौ पटोलः पटोलवस्त्रभेदे नौषध्यां ज्योत्स्नांतुयोषितीति मेदिनी मीनातेरूरः ऊरप्रत्ययमाह मीञ्हिंसायां म यूरः स्यंदेः सम्प्रसारणम् स्यंदूप्रस्रवणे

कुवेरादयो निपात्याः कुबेरः कद्रुवरणे कपोतः मीनातेरूरः मयूरः स्यन्दतेस्सम्प्रसारणम् सिन्दूरम् स्यादेस्तुः सिनोति सेतुः तन्तुः मस्तुः सक्तुः धातुः क्रोष्टा अर्तेस्तुक् ऋतुः मन्तुः जंतुः चायःकि केतुः वस्तु आगारे णित् वास्तुः कृञ

अस्मादूप्रत्ययः सम्प्रसारणं च स्यात्० सिंदूरः सिंदूरस्तरुभेदे स्यात् सिंदूरं रक्तवर्णके इति मेदिनी स्यादेस्तुः तुप्रत्यय ११ ५ कतुः ॥ कृतुः ॥ ॥

माह षिञ्बंधने सेतुः सेतुरालौ स्त्रियां पुमान् इत्यमरः सेतुर्नालौ कुमारके इति मेदिनी तनुविस्तारे तंतुः हवस्तोरितीरण स्त्राणि कटितंतव इत्यमरः मसीप रिणामे मस्तु मंडं दधिभवं मस्तु इत्यमरः षचसेचने सच्यंते इति सक्तुः चोः कुभितिकः अर्हं चादिः डुधाञ् धारणपोषणयोः धातुः धातुर्नाइन्द्रियेष्वपि च शब्द योनिमहाभूततद्गुणेषु रसादिषु मनःशिलादौ श्लेष्मादौ विशेषाद्गैरिकेऽस्यनीति मेदिनी० श्लेष्मादिरसलोहादि महाभूतानि तद्गुणाः इन्द्रियाण्यश्मविकृतिः शब्दयोनिश्च धातवः इत्यमरः क्रुशश्चाक्रोशे छशषेति षत्वं ष्टुत्वं तृज्वत्क्रोष्टाक्रोष्टारमित्यादि क्रोष्टारो अर्तेस्तुक् तुक्प्रत्ययमाह कित्वान्न गुणः ॥ ॥ ऋगतौ अर्तेरतुः ऋतुर्वर्षादिषट्सु च आर्तवे मासि च पुमानिति मेदिनी० ॥ ॥

ऋतुः स्त्री कुसुमेपि चेत्यमरः ऋतुः स्त्री पुष्पकालयोरिति विश्वः पुनः तुप्रत्ययमाह मनज्ञाने मंतुः मंतुः पुंस्यपराधेपि मतुष्येपि प्रजापतौ इति मेदिनी जनी प्रादुर्भा
वे जंतुः प्राणी चाय्‌ः किः चाय्‌ पूजानिशामनयोः अस्मात् तुप्रत्यये धातोः किरादेशश्चस्यात् केतुः केतुर्ग्रहपताकयोरिति विश्वः केतुर्ना रुक् पताकारिग्रहोत्पाते
षु लक्ष्मणीति मेदिनी वस निवासे तुः वस्तुः आगारे णित् अगारेऽर्थे वसेस्तुण् स्यात् तुण्प्रत्ययमाह णित्वाद्वृद्धिः वास्तु वेश्मभूर्वास्तुरस्त्रियामित्यमरः कृ
ञः कतुः कतुप्रत्ययमाह कित्वान्न गुणः डुकृञ् करणे क्रतुः क्रतुर्यज्ञे पुंसीति मेदिनी॥ ॥जीवेरातृको वृद्धिश्च जीव प्राणधारणे अस्मादातृक प्रत्ययः स्यात्
धातोर्वृद्धिश्च आतृकप्रत्ययमाह जैवातृकः २ पुमान्सोमे कृषकायुष्मतोस्त्रिष्विति मेदिनी जैवातृकस्त्विंदुभिषगायुष्मत्कृषीवलेष्विति अस्मादातुप्रत्ययोपि जी
वातुरस्त्रियां भक्ते जीविते जीवनौषधे॥ ॥कृषादेरूः ऊप्रत्ययमाह कृषविलेखने कर्षूः कर्षूः पुंसि करीषाग्नौ कर्षूर्नद्यां स्त्रियां मतेति विश्वः कर्षूः पुमान् करीषाग्नौ

जीवेरातृको वृद्धिश्च जैवातृकः जीवप्राणधारणे कृष्यादेरूः कर्षूः षर्ज व्यथने खर्जूः वहो धश्च वधूः कषेश्छश्च
कच्छूः कस्वादयः कासूः पादूः अलाबूः कशेरूः दरिद्रा दद्रूः॥

१स्त्रियां कुल्यात्म्यसवात्मयो रिति मेदिनी खर्ज व्यथने खर्जूः खर्जू
रीकीटकंडूषु इति हेमः पामा च वहो धश्च वह प्रापणे अस्य धांतादेशः ऊप्रत्ययश्च स्यात् वधूः वधूस्तु पानवोढा स्त्री भार्या स्नुषांगनासु चेति विश्वः वधूर्जायास्नु
षास्त्रीषु इति एका च महिला वधूरिति त्रिकांडशेषः कषेश्छश्च कष हिंसायां अस्मादूप्रत्ययः स्यात् अंतस्य छश्च कच्छूः कच्छूर्ना तु याम पामा विचर्चिका इत्यमरः का
स्वादयः ऊण्प्रत्ययांता निपात्यंते णित्वाद्वृद्धिः ऊण्प्रत्ययमाह कस गतौ कासूः कासूर्विकलवाचि स्यात् तथा शक्त्यायुधे स्त्रियामिति मेदिनी कासूः शक्त्या
युधे रुजि बुद्धौ विकलवाचि स्यादिति हेमः पद गतौ पादूः चरणधारणीलविस्रंसने नञ्युपपदे नंवेर्नलोपो निपात्यते नलंवतेजलेइत्यलाबूः तुंब्यलाबूरुभे
समे इत्यमरः शृ हिंसायां कषशब्दे उपपदे शृणातेरूप्रत्ययः ऋकारस्य इकारादेशश्च निपात्यते कशेरूः बाहुलकादूप्रत्ययोपि कशेरूः कसेरुस्तृणकंदे स्त्रीति दरिद्रा
दुर्गतौ ऊप्रत्यये इकारस्याकारस्य च लोपो निपात्यते दद्रूः कुष्ठभेदः मृगय्वादित्वात् कुप्रत्यये दद्रुरपि दद्रुणो दद्रुरोगी स्यादित्यमरः॥ ॥ ः०ः ॥ ॥ उ०म०
२२

चुपमंदायां गतौ धातोरुपधाया अत्वं निपात्यते कलप्रत्ययेन च चपलः स्पारदे मीने चोरके मत्स्यांतरे चपला कमला विद्युत्पुंश्चली पिप्पलीषु च नपुंसके च शीघ्रे । स्यात् वाच्यवत्तरले चले इति मेदिनी शक्लृ शक्तौ शकलं शकलं त्वचि खंडे स्यात् रागवस्तुनि वल्कले इति मेदिनी रोहितादीनां त्वचि तद्योगात् शाकली मत्स्यः शमु उपशमे शमलं छो छेदने अस्य गुगागमो ह्रस्वश्च निपात्यते छगलः छगलं नीलवस्त्रे ना छगे स्त्री वृद्धदारके इति मेदिनी ञमंताड्डः ञमप्रत्याहारेणा द्धातोर्डः स्यात् डप्रत्ययमाह दमु उपशमे बाहुलकात् डुस्य नेत्संज्ञा दंडः दंडोऽस्त्री लगुडेऽपि स्यादित्यमरः रमु क्रीडायां रंडा रंडा मूषकपर्ण्यां च विधवायां च योषिति इति विश्वः खनु अवदारणे खंडः खंडोऽस्त्री सकले चेक्षुविकारमणिभेदयोरिति मेदिनी कवर्गादिभ्यः किच्च डः कृत्स्यात् कित्त्वाद्गुणो न डकुप्रत्ययमाह गुड गतौ गुडः अव्यक्ते शब्दे च गुडो गोलेक्षुपाकयोरित्यमरः गुडः स्याद्गोलके हस्तिसन्नाहे इक्षुविकारयोः गुडा स्नुह्यां च कथिता गुडिकायां च योषितीति मेदिनी स्यादेरल

चुपमन्दायां गतौ चपलम् शकलम् छो छेदने छगलः ञमान्ताड्डः दण्डः रण्डा खण्डः कवर्गादिभ्यश्च किच्च गुडः स्यादेरलः स्थालम् स्थाली पतिचण्डिभ्यामालञ् पातालम् चण्डालः तमादिभ्यश्च कालः तमालः विशालः बिडालः मृणालः कुलालः ॥

ष्ठ आलट् प्रत्ययमाह ष्ठा गतिनिवृत्तौ स्थालं स्थालं भाजनभेदेऽपि स्थाली स्यात् पाटलौषधौ इति मेदिनी पतिच ११ कपालम् पलालम् ॥ ४ ॥ ण्डिभ्यामालञ् आलञ् प्रत्ययमाह णित्वाद्वृद्धिः पत्लृ पतने पतंत्यस्मिन्नधर्मेण इति पातालं अधोभुवनपातालबलिसद्मरसातलं इत्यमरः पातालं नागलोके स्याद्विवरे वडवानले इति मेदिनी चडि कोपे इदित्वान्नुमि कृते उपधाया अभावान्न वृद्धिः चंडालः अण्प्रत्यये चांडालः तमादिभ्यः कालः कालप्रत्ययमाह कित्त्वान्न गुणः तमु कांक्षायां तमालः तमालस्तिलके खड्गे तापिच्छे वरुणद्रुमे इति मेदिनी विश प्रवेशने विशालः विशाला त्विंद्रवारुण्यामुज्जयिन्यां तु योषिति च पुंल्लिंगे विशालः पुंसि पृथुले त्वभिधेयवदिति मेदिनी बिड आक्रोशे बिडालः बिडालो नेत्रपिंडे स्यात् वृषदंशकके पुमानिति मेदिनी ओतुर्बिडालो मार्जारो वृषदंशक आखुभुक् इत्यमरः मृण हिंसायां मृणालः मृणालं नलदे क्लीबं पुन्नपुंसकयोर्बिसे इति मेदिनी कुल संस्त्याने कुलालः कुलालः कुक्कुभे कुंभकारे [illegible] जनांतरे इति मेदिनी ॥ ॥ ॥ ॥

उ० वृ० टी० सु० २३

कुलालो घु...पक्षिणि कुकुभे कुंभकारे चेति हैमः कपि चलने नलोपो निपात्यते कपालः कपालोऽस्त्री शिरोऽस्थ्नि स्यात् घटादेः शकले व्रजे इति मेदिनी पल
गतौ पलालं ॥ ॥पतादिभ्योऽङ्गः॥ अंगप्रत्ययमाह पत्लृ पतने पतंगः पतंगः शलभे शालिप्रभेदे पक्षिसूर्ययोः क्लीबं सूते इति मेदिनी सूते पारदे इत्यर्थः॥
तॄ प्लवनतरणयोः तरंगः तरंगस्तु गरादीनामुत्फाले वस्त्रभंगयोरिति विश्वः लूञ् छेदने लवंगं लवंगं देवकुसुमे इत्यमरः विडादेः कित् अंगकृत्प्रत्ययमाह ०
कित्वान्न गुणः विड आक्रोशे विडंगः क्रिमिसंघघ्ने विडंगो नागरेऽन्यवदिति विश्वः विडंगस्त्रिषु भिज्ञे स्यात् क्रिमिघ्ने पुंनपुंसकमिति मेदिनी मृद क्षोदे मृदं
गः मृदंगः पटहे घोषे इति मेदिनी गमादेर्गः गप्रत्ययमाह गम्लृ गतौ गंगा छो छेदने छागः खड भेदने खड्गः खड्गो गंडकशृंगे स्यात् निस्त्रिंशे गंडकेऽपि
चेति शब्दतरंगिणी खड्गो गंडकशृंगासि बुद्धभेदेषु गंडके इति मेदिनी भृंगादयः गक्प्रत्ययान्ता निपात्यन्ते डुभृञ् धारणपोषणयोः प्रत्ययस्य नुट् निपा

पतङ्गादिभ्योऽङ्गः पतङ्गः तरङ्गः लवङ्गः विडादेः कित् विडङ्गः मृदङ्गः गमादेर्गः गङ्गा छागः खडभेदने खड्गः भृङ्गाद
यः भृञ् भृङ्गः शॄ हिंसायां तस्य ह्रस्वः शृङ्गः म् शार्ङ्गः पूगः मुद्गः शरदादयोऽदिप्रत्ययान्ताः शॄ शरत् दॄणातेः दरत् धुग्घ्रस्वः
दृ दृषत् सृजेः स्रद् तनेः तद् यजेः यद् इण एतद् ॥ ॥ ९ ततः भृंगः भृंगः षिङ्गालिधूम्याटा इति विश्वः भृंगो धूम्याटषिङ्गयोः मधु

व्रते भृंगराजे पुंसि भृंगं गुडत्वचीति मेदिनी शॄ हिंसायां शृणातेर्ह्रस्वो गप्रत्ययस्य नुडागमश्च निपात्यते शृंगं शृंगं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयंत्रके विषाणकर्षयोश्चाथ
शृंगः स्यात् कूर्चशीर्षके स्त्री विषाणे स्वर्णमीनभेदयोर्ऋषभौषधौ वितिमेदिनी शृंगं विषाणमाख्यातं शैलाग्रे जलजंत्रके मीनौषधी स्वर्णानां भेदे शृंगी प्रभु।
ज्यते इत्यलिंगी कोशः शृणातेः शकुनौ वाच्ये यण् प्रत्ययः तस्य नुट् च निपात्यते शित्वाद्वृद्धिः शार्ङ्गः पक्षी शार्ङ्गं धनुरिति तु शृंगस्य विकार इत्यर्थेऽण्प्रत्यये बो
ध्यं पूङ् पवने पूयते सुखमनेनेति पूगः पूगस्तु क्रमुके वृन्दे इति मेदिनि० मुद हर्षे मुद्गः सस्यभेदः शरदादयोऽदिप्रत्ययान्ताः निपात्यन्ते शॄ हिंसायां अदिप्रत्ययः रा० म०
इकार उच्चारणार्थः शरत् शरत्स्त्री वत्सरेऽप्यृतौ इति मेदिनी दॄ विदारणे दरत् दरत्स्त्रियां प्रपाते च भयपर्वतयोरपीति मेदिनी दृणातेः धुक् ह्रस्वो गुणाभाव २३
श्च निपात्यते दृषत् दृषल्लिप्ष्येषणशिलापट्टप्रस्तरयोः स्त्रियामिति मेदिनी सृज वयोहानौ निपातनात् ऋलोपः स्रद् तनु विस्तारे निपातनात् ऋलोपः तद् यज
देवपूजादौ दिलोपो निपातनात्० यद् इण् गतौ अस्य गुणे कृते नुगागमो निपात्यते एतद् ॥ ॥:०:॥ ॥

अन्द्वादयः कूप्रत्ययान्ता निपात्यन्ते आदिर्बन्धने अन्दूः स्त्रियां स्यान्निगडे प्रभेदे भूषणस्य चेति मेदिनी अन्दुको हस्तिनिगडे इत्यमरः संज्ञायां कप्रत्यये पूर्वस्य ह्र स्वः केचित्तु अमगतौ अस्मादुगागमे कूप्रत्यये च अन्दुर्वुद्धिरिति व्याचख्युः जनेर्वुक् जनी प्रादुर्भावे अस्य वुगागमः स्यात् कूप्रत्यये जंवूः जंवू अदने अस्मात्ते केवाहुलकात्कप्रत्ययोपि जंवुः उक्तंच विक्रमादित्यकाव्ये तस्य जंवोः फलरसो नदीभूय प्रवर्त्तते इति परिणत जंवुफलोपभोगहृष्टा इति भारविः डुधाञ् धा रणादौ आतो नपीस्यालोपः निपातनात्पूर्वपदस्य नुम् कर्कंदधातीति कर्कंधूः कर्कंधूर्वदरीकोलिरित्यमरः षो अंतकर्मणि दिधिं धैर्यं स्यति त्यजती ति संध्यक्षराणामित्यात्वे आतो नपीत्यालोपे च दिधिषूः केचित्तु दधातेरित्त्वं ह्रित्वं षुक्चनिपात्यते दधात्यसावितिदिधिषूरिति व्याख्यातं पुनर्भूर्दि धिषूरूढा द्विरित्यमरः द्विरूढा द्विवारं विवाहितेत्यर्थः मृग्वोरुतिः उतिप्रत्ययमाह इकार उच्चारणार्थः मृङ् प्राणत्यागे मरुत् अणप्रत्यये मारुतः मरुत्

अन्द्वादयः आदिर्बन्धने अन्दूः जनेर्वुक् जम्बूः कर्कंदधातीति कर्कंधूः दिधिं धैर्यं स्यति दिधिषूः पुनर्भूः मृग्वोरुतिः मरु त् गरुत् गिरतेरुतिस्तस्य मुट् गर्मुत् चटेरुलः चटुलम् ह्रादेरितिः हरित् सरित् रोहित् युष इति सौत्रधातुः योषित् ता डेर्णिलुक् च तडित् शमेः ढः शण्ढः ॥ ॥ रशब्दो प्यत्युत्पन्नोस्ति मरुतः स्पर्शनः प्राणः समीरणमारुतो मरुदिति विक्रमादित्यकोशः कायंवा

तीति सदाश्विनात्यमरुतः इति कविराजश्लोकः गृ निगरणे गिरतेरुतिस्तस्य मुट् अस्मात्परस्योत्प्रत्ययस्य मुडागमः स्यात् गर्मुत् गर्मुत्स्त्री स्वर्णलाभयोरिति मेदिनी चटेरुलः उलप्रत्ययमाह चट भेदने चटुलं शोभनं ह्रादेरितिः इतिप्रत्ययमाह इकार उच्चारणार्थः हृञ् हरणे हरित् हरित्ककुभि वर्णे चतृणवाजि विशेषयोरितिविश्वः ॥ हरिर्दिशि स्त्रियां पुंसि हयवर्णविशेषयोः स्त्रियां स्यात्तृणेपि चेति मेदिनी रुह बीजजन्मनि रोहित् रोहिन्मृग्यां लताभेदे स्त्री नार्के इति मेदिनी युष इति धातुः सौत्रः योषित् स्त्री योषिदवला योतित्यमरः ताडेर्णिलुक् च इतिप्रत्यये अस्य णेर्लुक् स्यात् तड आघाते ताडयतीति त डित् तडित्सौदामिनी विद्युदित्यमरः शमेर्ढः ढप्रत्ययमाह वाहुलकात् ढस्येत्संज्ञा न शमु उपशमे हवस्यारिन्नीरणन शंढः स्यात् पुंसि गोपतौ आह

कमादेरठः अठप्रत्ययमाह कमुकान्तौ कमठः २ कच्छपे पुंसि भांडभेदे नपुंसकः इतिमेदिनी जवसोहानौ जरठः जरठः कठिने पांडौ कर्कशेस्या दभिधेयवदिति विश्वः जरठः कठिने जीर्णे इतिवैजयंती रमेर्हृद्धिः रमु क्रीडायामस्य वृद्धिः स्यादठप्रत्ये रामठं हिंगुः शमेःखः खप्रत्ययमाह शमु उपशमे शंखः शंखोनिधौ ललाटास्थ्नि कंबौनस्त्रीत्यमरः शंखः कंबौनयोषति ललाटास्थ्निनिधौनखेइतिमेदिनी कणेःठः ठप्रत्ययमाह कणशब्दे निपातनात् णस्यानुस्वारे कंठः कंठो गले सन्निधाने ध्वनौ मदनपादद्रुमे इतिमेदिनी वृषलादयः कलप्रत्ययांतानिपात्याः कित्वान्न गुणः वृषु सेचने वृषलः वृषलस्तुरगेशूद्रे इतिहैमः शप आक्रोशे निपातनात्सस्य वः शवलः पलगतौ पललं पललंतिलचूर्णे च पंके मांसे नपुंसके नारा क्षसेइतिमेदिनी सृगतौ वाहुलकात् गुणः सरलः सरलः पूतिकाष्ठे नाः श्योदाराः वक्रयोस्त्रिष्वितिमेदिनी सरलाविरलायंते घनायंते कलिद्रुमाः नशमीनवपुन्नागो ऽस्मिन संसारकानने इतित्र लवनतरणयोः तरलः कमुकान्तौ कमेर्व

कणादेरठः कमठः रमेर्वृद्धिः रामठम् शमेःखः शंखः कणेष्ठः कण्ठः वृषलादयः कलप्रत्ययान्ता निपात्याः वृषलः शप आक्रोशे शवलः पललम् सरलः तरलः कमुकान्तौ कम्बलः मुशखण्डने मुशलम् लगिगतौ लाङ्गलम् कुटादेम्मलः ॥

कुड्मलः कुट्मलम् कोमलम् मृजूष शुद्धौ मलम् ॥ ११गागमो निपात्यते० कंवलः कंवलो नागराजेस्यात् सास्नाप्रावारयोरपि क्रिमावप्युत्तरासंगे सलिले तु नपुंसकः १ इतिमेदिनी० सास्नातु गलकंवलेत्यमरः मुशखंडने मुशलं मुशलं स्यादयो ऽग्रे च पुंनपुंसकयोः स्त्रियां तालमूल्यां माखपर्णां गृहगोधिकयोरपीति मेदिनी मुशखंडने अस्मात्कलप्रत्यये मुडागमो ऽपि निपात्यते मुशलो मुशलोपि चेतिविश्वः लगिगतौ अस्य वृद्धिर्निपातने लांगलं कुटकौटिल्ये कलप्रत्ययस्य मुडागमो निपात्यते कुट्मलः कुड दाहे अस्मात्कलप्रत्यये मुडागमे च कुंडलोपि कशागतिशासनयोः ॥ कलप्रत्ययस्य मुट् निपातनात् कश्मलं कुशब्दे अस्मात्कलप्रत्ययस्य मुट् धातोर्गुणश्च निपात्यते० कोमलं कोमलं मृदुलं मृदु इत्यमरः मृजूष शुद्धौ मृजेष्टिलोपो निपात्यते कलप्रत्यये मलः मलो ऽस्त्री पापविट्किट्टे कृपणेत्व ऽभिधेयवदिति मेदिनी० ॥ ॥ ॥ ॥ ॥

भियोऽग्जिः षुक्हस्वश्च। जि भीभये अस्मादजिप्रत्ययःस्यात्। अजप्रत्ययमाह इकारउच्चारणार्थः अजिप्रत्ययेभियोह्रस्वः षुगागमश्चस्यात् ह्रस्वविधानसामर्थ्यान्न
गुणः भिषक् भिषक् वैद्ये स्त्रियां भिषक् इत्यमरः युष्यसिभ्यां मदिक् प्रत्ययमाह कित्वान्नगुणोनइकारउच्चारणार्थः षुष्प्सो त्रो धातुः युष्मद् अस्मद् क्षेपणे अस्य ह्रल्लं अ
हंस्त्वादेर्मः मप्रत्ययमाह ष्टुसुस्तकैरोस्तोमः संघातः षुञ् अभिषवे सोमः सोमस्तु हिनदीधितौ वानरे च कुबेरे च पितृदेवे समीरणे वसुभेदे कर्पूरे नीरे सोमलतौ
षधावितिमेदिनी हुदानादनयोः होमः देव तोद्देशेनहविः प्रक्षेपो होमः धञ् धारणे धर्मः धर्मोस्त्री पुण्य आचारे स्वभावोपवयोः क्रतौ अहिंसोपनिषन्न्यायेनाध
नुर्यमसोमपेइतिमेदिनी धर्मः पुण्ययमेन्यायेस्वभावाचारयोः क्रताविति विश्वः क्षि क्षये क्षेमं भादीतो भामः भामः क्रोधेरुचौदीप्ताविति विश्वः आदित्यश्चया
प्रापणे यामः यामस्तु पुंसिप्रहरे संयमे पि प्रकीर्तितः॥ इतिमेदिनी॥ वागतिगंधनयोः वामः वामं धने पुंसि हरे कामदेवे पयोधरे वल्गुमत्तीपसव्ये षु त्रि पुनार्यां

भियोः जिष्षुक् ह्रस्वश्च भिषक् युष्यसिभ्यांमदिक् युष इतिसौत्रधातुः युष्मद् अस्मद् स्त्वादेर्मः स्तोमः सोमः होमः धर्म्मः क्षेमं भामः
यामः वामः पद्मम् नेमः जिह्मादयः हाक् जिह्मः असुग्लसुअदने ग्मामः सिमः शुष्मम् श्यामा धूमः युग्मम् रुक्मम् तिग्मम् हन
हिमम् भीमः भीष्मः असेः ग्रीष्मः घृक्षरणदीप्त्योः जिघर्त्ति अनेन घर्म्मः॥ ॥१९ स्त्रियामथवामीस्यगालीवडवाएसमीकलभीषुचेतिमेदिनी
पदगतौ पद्मं पद्मोऽस्त्री पद्मकेव्यूहनिधिसंख्यांतरेंबुजेनानागे इतिमेदिनी। णीञ् प्रापणे नेमः २ कालेऽवधौगर्त्तेप्राकारेकैतवेपिचेतिमेदिनी। नेमस्त्वर्द्धेप्राका
रगर्त्तयोरवधौकेतवेपिचेति हेमः जिह्मादयोनिपात्यंते। ओहाक् त्यागे। अस्मात्मप्रत्ययः सप्रत्ययवद्भवति आतोलोपश्चनिपातनात् तेनहित्वादिः यः सइति
पूर्वस्यत्वं जिह्मः जिह्मः कुटिलमंदयोरित्यमरः जिह्मस्तु कुटिलेमंदे क्लीबेतगरपादपे इतिमेदिनी। असुअदने अस्मेष्ट एत्वंनिपात्यते ग्मामः ग्मामः स्वरे सं
वसथेवृंदेशब्दादिपूर्वकइतिविश्वः॥ शब्दादिपूर्वकोग्रामशब्दोवृंदेशब्दग्रामोगुणग्रामः इति यथाशब्दादिपूर्वोवृंदेपिग्रामः इत्यमरः संपूर्वः संयुते
स्मृतः इतिविश्वः षिञ्बंधने। निपातनान्मकप्रत्ययांता वक्ष्यमाणाः ज्ञेयाः सिमः सर्वादिगणेपठितः शुषशोषणे शुष्मं सु ष्मम ग्निसमीरयोरितिविश्वः॥:

उ° ह° टी° सु° २५

स्तुत्यंतेजस्विनावैनेतिमेदिनी· श्यैङ्गतौश्याम:श्चिष्णुश्यामोहरित् कृष्णोश्यामास्याच्छारिकानिशेत्यमर: श्यामोवटेप्रयागस्यवारिदेदृद्धदारुके पिकेचकृ

ष्णहरितो:पुंसिस्यात् त्यहति चिष्णुमरीचिसिंधलवणेत्क्लीवंस्त्रीशारिकौषधौ गुदायांसोमवल्ल्यांचप्रियं गुवल्गुलीकयो: यमुनायांत्रियामायांकृष्णत्रिवृ

तिकौषधौनीलकायामितिमेदिनी धूञ्कंपनेधूम:पूञ्जिःयोगेनिपातनात् जस्यग:युग्मंरुचदीप्तौनिपातनाच्चस्यक:रुक्मंरुक्मंतुकांचनेलोहेइतिविश्व:

तिजनिशानेनिपातनात् जस्यग:तिग्मंतिग्मंतीक्ष्णंखरंतद्वदित्यमर: हन्हिंसागत्यो: हंतेर्हिएदेशोनिपातनात् हिमंहिमंतुषारमलयोद्भवयो:स्यान्नपुं

सकं शीतलेवाच्यलिंग कं इतिमेदिनी· ञिभीभयेभिय:षुगागमोवानियास्तने विभेत्यस्मादितिभीम: भीष्म: भीष्मागांगेयघोरयोरितिविश्व:भीमोम्लवे

तसेघोरेशंभौमध्यमपांडवेइतिमेदिनी· घृक्षरणदीप्त्यो: निपातनाद्गुण: घर्म:घर्मस्यादातपेग्नीष्मेप्युष्णस्वेदांभसोरपिइतिमेदिनी·ग्रसग्रदने·ग्रस्यनिपा

प्रथे:षवन्सम्प्रसारणम् पृथिवी अशादेःक्कः अश्वः खट्कांक्षायाम् खट्वा विश्वम् विश्वः सर्वादिरयम् स्वादेर्वः सत्तमनेनविश्व

मिति सर्वः गर्वः शर्वः ग्रीवादयः ग्रीवा लिलिहन्त्यनया जिह्वा प्वादेःकन् युवा वृषा तक्षणाति काष्ठानि तक्षा राजा धन्वा प्रदिवा॥

तनात्ग्रीपादेश:ग्रीष्म:ग्रीष्मऊष्मर्तुभेदयोरितिमेदिनी॥ ॥प्रथे:षिवःसंप्रसारणंच॥ ॥षिवप्रत्ययमाह·षित्वादीष्षवप्रत्ययइत्येके प्रथप्रख्याने·पृथि

वीपृथिवीपृथ्वीधात्र्यनर्वसहारसेतिशब्दार्णवः अशार्दे:क्कः किल्वान्नगुण: क्कप्रत्ययमाह·अशूङ्व्याप्तौअ श्व: अश्व:पुंजातिभेदेचतुरंगेचपुमानयइतिमेदिनी अ

श्व:पुंभेदवाजिनोरितिविश्व:खट्कांक्षायां खट्यतेशयनार्थिभि:कांक्ष्यते इतिखट्वा·विशप्रवेशनेविश्व: विश्वाप्रतिविषायांस्त्रीजगतिस्यान्नपुंसकंना

नास्वंत्यांपुंसिदेवप्रभेदेष्वखिलेत्रिष्विनिमेदिनी स्वादेर्व:वप्रत्ययमाह सृगतौसत्तमनेनविश्वमितिसर्व:गृविगरणेगर्व: शृहिंसायां शर्वो

रुद्र: ग्रीवादय: वप्रत्ययांतानिपात्यंते गृनिगरणे·ईडागमोगुणाभावश्चनिपातनात्· गिरंत्यनयेति ग्रीवालिह आस्वादने लस्यजोगुणाभावश्च·

निपातनात् लिहंत्यनयेतिजिह्वा प्वादे:कन्·कन्प्रत्ययमाह किल्वान्नगुण: युमिश्रणे यौ नीतितु धातोरित्युवु नोपधाया इतिदीर्घ: नाम्नोनोलोप उ°म°

इतिनलोप:युवा युवास्यात्तरुणेश्रेष्ठेनिसर्गबलशालिनीतिमेदिनी वृषुशेचने वृषा वृषाकर्णमहेंद्रेनेतिमेदिनी तक्षूत्वकरणे तक्ष्णातितक्षातुर्वार्द्धकि २५

स्त्वष्टा रथकारस्तक्षा ष्टतरि स्समरः राजदंतौ प्रौराजाराजो प्रभो रूपे चंद्रे यक्षे क्षत्रियशक्रयोरित्यमरः धविगतौ धन्वा समानौ मरुधन्वानौ इत्यमरः अथास्त्रियो
धनुश्चापौ धन्वशरासनकोदंडकार्मुकमित्यमरः धन्वा तु मरुदेशे ना क्लीबे चापे शरेपि चेति मेदिनी दिवु क्रीडादौ प्रतिदीव्यत्यस्मिन्निति प्रतिदिवा दिवसः॥ ॥
सप्तभुभ्यां तु ट्वः आभ्यां कनप्रत्ययः स्यात् तस्य तुडागमश्च षप समवाये जश्शसोरिति जसो लुक् नाम्नो नो लोपश्शिति न लोपः सप्त अश्नुङ्व्याप्तौ छ
न्दसीति षट्त्वं तुत्वं अष्ट नन्जिजहाते अोहाकु त्यागे अस्मात्कनस्यात् आतो न पीत्याल्लोपः अहः इति नस्समासः अहः स्वादयः कन्नस्यां ता निपात्यंते दु
अोश्वि गतिवृद्ध्योः श्वयतीति इकारलोपो निपातनात् स्यां उक्षसेचने उक्षा वृषभः पूष वृद्धौ इनामिति दीर्घः पूषा पूषणौ पूषणः प्लिह गतौ इकार
स्य दीर्घत्वं निपात्यते प्लीहा कुक्षिव्याधिः मुह वैचित्ये मुहेरुपधाया दीर्घः धोन्ता देशो रमागमश्च निपातनात् मूर्द्धा मूर्द्धा ना मस्तको स्त्रियामित्यमरः
सप्तम्यां तुट् षपसमवाये सप्त अष्ट नन्जिजहाते अहः स्वादयः श्वपति श्वा उक्षा पुष्णाति कमला नि पूषा प्लिहगतौ उणा
स्नेहत्यस्मिन् प्लीहा मुह्यत्यस्मिन्नाहते मूर्द्धा मज्जत्यस्थिषु मज्जा अर्य्यपूर्वो माङ् अर्य्यमा मातर्य्यन्तरिक्षे श्वयति मातरि
मुर्व्वी बंधने अस्योकारस्य दीर्घत्वं वस्य धश्च निपात्यते इत्युज्वलदत्तः मूर्द्धा टुमस्जो शुद्धौ मस्जेरुलेन सस्य शः रुवे जवा इति शस्य जः मज्जा न करं
तोर्म आयंतो प्यस्तु पणाम्यते उष्मणा या सा इमूष्णापि मज्जो क्लीवो मज्जायास्मेहेति हिरूपकोशः माङ् माने इनामिति दीर्घः अर्य्यमा तु पुमान् सूर्ये पितृदेवां
तरेपि चेति मेदिनी टुअोश्वि गति वृद्ध्योः धातोरिकारलोपः संप्रसारणाभावः॥ सप्तम्याः लुक् च निपात्यते मातर्यन्तरिक्षे श्वयतीति मातरिश्वा मा
तरिश्वा सदागतिरित्यमरः अथ च श्वादेरिति सूत्रेण वस्योत्वं न भवति अभिव्यक्ती परत्वेन कुक्कुरवाचकस्यैव श्वशब्दस्य तद्ग्रहणात् तेन
मातरिश्वनः मातरिश्वनेत्यादि मेह पूजायां धातोर्हस्य घः अवुगागमश्च निपात्यते मघवा इंद्रः इत्युणादौ प्रथमपादः॥ ॥ ः०ः ॥ ॥ श्री ॥

हेम्न हरेणुरेणु॥ एणुप्रत्ययमाह। ऋकृञ्भ्यां करेणो करेणुः। करेणुरिभ्यां स्त्री नेभे इत्यमरः। करेणुर्गजयोषायां स्त्रियां पुंसि मतंगजे इति मेदिनी हृञ्हरणे हरेणुः हरेणुः
स्त्रीसतीनस्त्रीरेणुकाकुलयोषितामिति मेदिनी हरेणुरेणुर्गंधद्रव्यं कलापस्त्रीतिबोधम् कलापस्ततसतीनक इत्यमरः कुषादेः क्थः कुष्यमत्ययमाहकित्वान्न गुणः कु
ष्णनिष्कर्षे कुष्ठं कुष्ठं रोगे पुष्करे स्त्रीतिमेदिनी कुष्ठं रोगे स्कगंधे चेतिविश्वः रमुक्रीडायां लोपस्त्वनुदात्त नामितिमलोपः रथः रथः पुमानवयवे स्पंदने वेतसे पि
चेति मेदिनी रथः स्यात् स्पंदने कायेचरणे वेतसे पि चेति विश्वः काष्ठ दीप्तौ छशषेति षत्वष्टुत्वं काष्ठं काष्ठा दारु हरिद्रायां कालमानप्रकर्षयोः स्थानमात्रे दि
शिचस्त्री दारुणि स्यान्नपुंसकमिति मेदिनी काष्ठं दार्विंधनं त्वेधइत्यमरः डुभृञ्धारणपोषणयो अवभृथोयज्ञस्नानम् उषादेस्थः थप्रत्ययमाह उषदाहे ओष्ठः
कुषनिष्कर्षे कोष्ठः कुशिकुसूलयोः गै शब्दे गाथा गाथा श्लोके संस्कृतान्यभाषायोश्शेषवृत्तयोरितिमेदिनी ऋगतौ अर्थः अर्थोभिधेयरैवस्तुप्रयोजननिवृ

महपूजायाम् मघवा इत्युणादौ प्रथमपादः॥ हृतॄभ्यामेनुः करेणुः हरेणुः कुषादेः क्थः कुष्ठम् रथः काष्ठम् अवभृथः उ
षादेस्थः ओष्ठः कोष्ठः गाथा अर्थः शुगतौ शोथः सर्तेर्णित् सार्थः निशीथादयः निशीथः तीर्थम् सिचिर्विरेचनरिक्थम् पि
चस्सरणे सिक्थम् पृषुसेचने पृष्ठम् गृथम् यूथम् शुडुगतौ शोथः॥ ॥रत्निषु इत्यमरः शुगतौ शोथः श्वयथुः सर्तेर्णित् थणप्रत्ययमा
ह णित्वाद्वृद्धिः सृगतौ सार्थः सार्थोवणिक्समूहे स्यात् दपिसंघातमात्रके इति मेदिनी॰ निशीथादयः॥ थकुप्रत्ययांतानिपात्यंते शीङ्स्वप्ने निशीथः निशी
थस्तु पुमान् अर्द्धरात्रे स्याद्रात्रिमात्रके इति मेदिनी। तृप्लवनतरणयोः ऋत इरिति दीर्घः तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायनेत्रिषु अव
तारर्षिजुष्टांभःस्त्रीरजःसुच विश्रुतमितिविश्वः रिचिर्विरेचने चोःकुरितिकः रिक्थं रिक्थम् रिक्थं धनं वसु इत्यमरः षिचिर्क्षरणे॰ सिक्थं सिक्थोभक्त
पुलाके नाम धूच्छिष्टेन पुंसकं इति मेदिनी॰ पृषुसेचने॰ पृष्ठं पृष्ठं तु चरमं तनोरित्यमरः पृष्ठं चरममात्रेपि देहस्यावयवांतरे इति मेदिनी॰ सौत्रविशेषपि
पृष्ठपृष्ठस्वल्पदन्ते इत्यादौ तथानिर्गमात्॰ गुपुरीषोत्सर्गे निपातनाद्दीर्घः॥ ॥ ॥ ॥

यूथं विश्वायुमिश्रणे निपातनाद्दीर्घः यूथंयूथंतिर्यक्कसमूहेपिप्रहंदमात्रेपिभाषितमितिविश्वः यूथंतद्गनसरगर्वितह्रूहसारमितिरघुः युङ्रू गतौ निपातना
हुणः प्रोथः प्रोथोऽस्त्रीहयघोणायांनाकुट्यामधगेत्रिषितिमेदिनी० प्रोथमस्त्रीतुरंगास्येमोर्थः प्रस्थितउच्यते०॥ ॥ ॥ ॥
स्फायादेरक् रक्प्रत्ययमाह० किल्वाहुणेनस्फायीटृद्धोहवस्योरितीरन्यवयोवसेइतियलोपः स्फारः स्फारः स्यात्पुंसिविकटेकारकादेश्चबुद्बुदे इतिमेदिनी०
तंचुसंकोचनेन्यंकादित्वात्कुत्वंनोलोपइतिनलोपः तक्रं२ स्युदश्विन्मथितंपादांबु:ह्रांवुनिर्ज्जलमित्यमरः वंचुप्रलंभनेन्यकादिवक्रः वक्रः स्यात्कुटिलेक्रूरे
पुटभेदेशनैश्चरे० इतिविश्वः शक्लृशक्तौ शक्रः शक्रः पुमान्देवराजेकुटजार्जुनभूरुहोरितिमेदिनी० क्षिपप्रेरणेक्षिप्रः क्षुदिरसंपेषणेक्षुद्रः क्षुद्रः स्यादध
मक्रूरकृपणाल्पेषुवाच्यवदिति० मेदिनी० चदिआल्हादनेइदितइतिनलोपाऽभावः चंद्रः पचाद्यच्प्रत्ययेचंदोपिहिमांशुश्चंद्रमाश्चंद्रशशीचंद्रोहिमद्युक
तिरिति शब्दार्णवः॥ उंदीक्लेदने० उद्रः जलमार्ज्जारः श्विताव्वर्णे श्वित्रं कुष्ठं वृतुवर्तनेवृत्रः वृत्रोरिपौध्वनौध्वांतेशैलेवक्रेचदानवे० इतिविश्वः॥ अजग

स्फायादेरक् स्फारम् तञ्चुसंकोचने तक्रम् वंचुगतौ वक्रम् शक्रादयः शक्रः क्षिप्रम् क्षुद्रः चञ्चुगतौ चक्रम् चदिल्हा
दनेदीप्तौच चन्द्रः उन्दीक्लेदने उन्द्रः श्विता श्वित्रम् वृत्रः वीरः नीरम् छिद्रम् उस्रा शुभ्रम् अमितम्योर्दीर्घश्च आम्रः ता

तिक्षेपणयोः अजेर्वीरितिवीरादेशः वीरः णीञ्प्रापणेनीरं छिदिरद्वैधीकरणे छिद्रं वसनिवासेयजामिजिसंप्रसारणम् घसादेःषइतिषत्वेप्राप्तेनिषेध
माहरपरस्यपिस्ञजिस्यहिंसवनादीनांसम्पषत्वंनेतिउस्रः उस्रोरश्मौचकिरणे उस्राधेनुपवित्रयोरितिमेदिनी माहेयीसौरभेयीगौरुस्रामाहाचश्रृंगिणी०
इत्यमरः॥ शुभदीप्तौ शुभ्रं स्यादभ्रकेक्लीवमुद्दीप्तशुक्लयोस्त्रिष्विति मेदिनी अमितम्योर्दीर्घः आभ्यांरक्स्यादुपधायादीर्घश्चप्रगमस्यादौ आम्रः॥श्च
अश्रूणमसालोमीइत्यमरः॥ ताम्रकांक्षायांताम्रम्॥ ॥ ॥ ॥ ॥ ॥ ॐनमोभगवतेवासुदेवाय०॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

निद्रादयः रक्प्रत्ययांतानिपात्यंते णिदि कुत्सायां नलोपो निपातनात् निद्रा स्यान्निद्राशयनं स्वापइत्यमरः अर्द्दगतौ अर्द्देर्दीर्घो निपातनात् आर्द्रा आर्द्रा नक्षत्रभेदे स्यात् स्त्रियां क्लिन्नेऽभिधेयवदितिमेदिनी शुचूशोके चस्य दो धातोर्दीर्घश्च निपात्यते शूद्रः दुगागतौ दुरपूर्वः धातोर्लोपो निपातनात् विलोपश्चेतिरलोपपूर्वदीर्घौ दुःखेनेयते प्राप्यते इति दूरं कृती छेदने कृतेः कृच्छ्र क्रू इत्येतावादेशौ निपातनात् कृच्छ्रं क्रूरं कृच्छ्रमाख्यातमाभीलपापसंताप्ययोरपीतिविश्वः॥ स्यात्कष्टं कृच्छ्रमाभीलमित्यमरः क्रूरः क्रूरस्तु कठिने घोरे नृशंसे चाभिधेयवदितिविश्वः नृशंसो घातकः क्रूरः पापो धूर्तस्तु वंचक इत्यमरः रुदिर् अश्रुविमोचने ण्यंतः रोदयतीति णेरिति णिलोपः रुद्रः जुगतौ ईकारोऽपि निपातनात् जीरः ज्यावयोहानौ अस्माद्रक्प्रत्यये ग्रहादिभिति सम्प्रसारणे च कृते जीर इत्येके

निद्राद्यः निदि निद्रा अर्द्द आर्द्रम् शुच शूद्रः दुःखेनेयते दूरम् कृतीच्छेदने कृच्छ्रम् क्रूरः रोदयतीति रुद्रः ज्यावयोहानौ जीरः स्वादेः क्रः सुरः षूङ· सूरः धीरः गृध्रः शूरादयः शु: सौत्रः शूरः सीरः चीरम् विधेः वीध्रम् विमलम्॰ ॥ ६ ॥ ॥

जीरः खड्गे वणिक्द्रव्ये इतिविश्वः जीरस्तु जरणे खड्गे इतिमेदिनी· स्वादेः क्रः क्रप्रत्ययमाह· कित्वान्नगुणः षुञ् अभिषवे सुरः सुरश्चषकमद्ययोः पुल्लिंगस्त्रिदिवेशे स्यादितिमेदिनी॰ सुरो देवे सुरामद्ये च पंकेऽपि सुरा कचिदितिविश्वः॥ षूङ् प्राणिगर्भविमोचने सावयति प्रेरयति· कर्मशिलो कमिति सूरः सूरसूर्यार्यमादित्य इत्यमरः॥ डुधाञ् धारणादौ अपि ह्रादेतीत्वं· धीरः धीरो धीमन्विते स्वैरे बुधे क्लीबं तु कुंकुमे स्त्रीयां श्रवणशब्दकुल्यामितिमेदिनी गृधु अभिकांक्षायां गृध्रः श्रवणांतरे पुंसि वाच्यलिंगोऽथलुब्धके इतिमेदिनी॰ शूरादयः क्रप्रत्ययांतानिपात्यंते शुगतौ निपातनाद्दीर्घः सर्वत्र शूरः शूरः स्यात्पादपे भटे इतिमेदिनी॥ शूर आरभटे सूर्ये इतिविश्वः हेमचंद्रोऽपि चित्रबंधने सीरः सीरोऽर्के हलयोः पुंसीतिमेदिनी चिञ् चयने· चीरं चीरि झिल्ल्यां नपुंसकं गोस्तने वस्त्रभेदे चीरे रेखाले
खनयोरितिमेदिनी· चीरं तु गोस्तने वस्त्रे चूडायां सीसकेऽपि च· चीरीकच्छाटिकाझिल्ल्योरितिविश्वः वाविंधेः वीधी दीप्तौ विपूर्वादस्मात् क्रवस्यातन्नो
लोप इति नलोपः वीध्रं वीध्रं तु विमलात्मकमित्यमरः॥ ॥ ॥ ॥

दृधुद्दहौ॰ रप्रत्ययांतानिपात्यंते एतेवर्ह्नं चर्मतुवपुबीजतंतुसंतानेवप्रः प्रकारःवप्रःपितरिकेदारेवप्रःप्राकाररोधसोरितिधरणिः इदिपरमैश्वर्ये इंद्रः इंद्रःशची
पतावंतरात्मन्यादित्ययोगयोरितिविश्वः अगिगतौनलोपोनिपात्यते अग्रंपुरस्तादुपरिपरिमाणेपलस्यच आलंबनेसमूहेचप्रांतरेपुंनपुंसकं अधि
केचप्रधानेचप्रथमेचाभिधेयवदितिमेदिनी वजगतौवज्रः वज्रोस्त्रीहीरकेपवौ टुवपुबीजतंतुसंतानेउपधायाइत्वंनिपात्यतेनात् विप्रः उचसमवायेच
स्यगोनिपातनात् उग्रः उग्रः शूद्रासुतेक्षत्रात् रुद्रेपुंसित्रिषूत्कटे इतिमेदिनी ञिभीभयेनदादित्वादीपु भेरीभेरीस्त्रीदुंदुभिःपुमान् इत्यमरः।पक्षे
रस्यलत्वंनिपात्यतेतेलः भेलः प्लवेमणौपुंसिभीरावज्ञेचवाच्यवदितिमेदिनी शुचशोकेचस्यकोनिपातनात् शुक्रः रसाद्द्रागवेज्येष्ठमासेवैश्वानरेपुमा
न् गरैतौ अस्मिन्नभिदो क्लीवमितिपक्षेलत्वंनिपात्यते शुक्लः शुक्लो योगांतरेसितेनपुंसकंतुरजतेइतिचमेदिनी गुड अव्यक्तेशब्देवृद्धिर्निपातनात् गोरः गोरः

दृधुद्दहौ वर्ह्नम् वप्रः इन्द्रः अग्रम् वज्रः टुवेपृकम्पने विप्रः उचसमवाये उग्रः ञि भी भेरी शुच शुक्रः शुक्लः गुड गोरः

इरा दूरा माला कुशिल्पिसञ्ज्ञयोः रजकः चषभक्षणे चषकः कुहविस्मापने कुहकम् ह्तकम् मुषेर्दीर्घश्च मूषकः

पीतेरुणेसितेनेविश्रुदेव्यभिधेयवत् नाम्नेतसर्वपेचन्द्रेनद्योपद्मकेशरे गौरीत्वसंजातरजः कन्याशंकरभार्य्ययोः रोचनेरजनीपिंगाप्रियंगुवसुधासुच॥
वरुणस्यभार्यायांविशेषेपि यादसांपतियोषितिमेदिनी १ गौरोरुणेसितेपीते इतिविश्वः इणगतौ इणोगुणाभावोनिपात्यतेनात् इराइरा मद्येचवारिणीतिविश्वः
भामानिमत्तस्यपरस्यलत्वंनिपातनात् मालामालक्षेत्रेत्रिषुपांपक्वान्नजोः जातसंततेपुमान्नितिमेदिनी मालंक्षेत्रेजने मालोमालापुष्पादिदामनीतिविश्वः माला
सुन्नतभूतल मित्युपलक्ष्येमाहृत्यमालमितिमेघदूतः॥ कुः शिल्पिनिसंज्ञयोः॥ शिल्पिन्यभिधेयेसंज्ञायांगम्यमानायांचकुः स्यात् कुप्रत्ययमाह किसान्तगुण
पुवोरित्यकादेशः रंजनतोनलोपइतिनलोपः रजकरजकोधावकेशुके इतिविश्वः चषभक्षणेसंज्ञायांतुचषकः चषकोस्त्रीपा
नपात्रमित्यमरः कुहविस्मापनेकुहकः दांभिकः॥ हृतीच्छेदनेह्तकः मुषेः किकोदीर्घश्च मुखलेये अस्मात्किकःकिकप्रत्ययमाह किसान्तगुणः मूषिकः

क्रियः इकः । इकप्रत्ययमाह दुक्रिञ् द्रव्यविनिमये क्रयिकः क्रेता श्यास्त्याहृभ्यादिभ्य इनः इनप्रत्ययमाह श्यैङ् गतौ संप्रसारणमित्यात्व श्येनः २ पक्षिणि पांडुरे इतिमे
दिनी स्त्यै ष्ट्यै शब्दसंघातयोः स्त्येनः चोरः हृञ् हरणे हरिणः २ पुंसि सारंगे विशदे त्वभिधेयवत् हरिणे हरितायां च गणिकाष्टकभेदयोः ॥ सुवर्णप्रतिमायां
चेति मेदिनी० अव रक्षणादौ अविनः अध्वर्युः वृजादेः किनः किनप्रत्ययमाह कित्वान्नगुणः वृजी वर्जने वृजिनं वृजिनं कल्मषे पुंसि वक्रे केशे ना कुटिले त्वथ०
दिति मेदिनी० अजेर्वीन किनप्रत्यये वीभावो न स्यात्० अज गत्यादौ अजिनं अजिनं चर्मकृत्तिः स्त्रीत्यमरः ॥ कठ कृच्छ्रजीवने कठिनः कठिनमपि निष्ठुरे स्था
त्वथ तु त्रिषु नपुंसकं स्थाल्यां कठिनी गुडिकायामपि कठिना इक्षु शर्करायां चेति मेदिनी० नल गंधने नलिनं पद्मं मल धारणे मलिनं मलिनं दूषिते कृष्णे त्रिषु तुम

क्रियः इकः क्रयिकः श्या स्त्याहृञ्आदिभ्यः इनप्रत्ययः श्येनः स्त्येनः हरिणः वृजादेः किनः वृजिनम् अजेर्वीन अ
जिनम् कठिनम् नलिनम् कुण्डिनम् दोदिनम् द्रविणम् दक्षद्रुहो दक्षिणः अर्तेः किदिर्च इरिणम्० ॥ ॥

स्यां तु योषिति मेदिनी० ॥ कुडि दाहे कुडिनं नगरं कुंडिन ऋषिः दो अवखंडने संप्रसारणमित्याले आतोन पीत्यालोपः दिनं द्रु दक्षिभ्यामिनः ॥ द्रु गतौ द्र
विणं नद्योर्वित्तं कांचने च पराक्रमे इति मेदिनी० दक्ष वृद्धौ दक्षिणः दक्षिणस्तु परच्छंदानुवर्तिनी दक्षे अपसव्ये सरले पाचीने प्यय दक्षिणा दिक् प्रति
ष्ठायज्ञदानमिति हेमचंद्रः वक्षिणा सरलो दार परच्छंदानुवृत्तिषु वाच्यवद् दक्षिणावाचीयज्ञदानप्रतिष्ठयोरिति विश्वः अर्तेः किदिर्च ऋ गतौ अ
स्मादिनक् प्रत्ययः स्यात्० धातोरिरादेशश्च० इरिणं इरिणं शून्यमूषिरमित्यमरः ॥ ॥ ॥ ॥ ओंनमः शिवाय० ॥ ॥ ॥ ॥

तानि त्रिभिर्भागैर्विभज्य प्रयोक्तव्यानि यथासंख्येन नामार्थकर्तरि प्रयुक्ते ऽप्रयुक्ते च प्रथमो भागः प्रयोक्तव्यः स पचति तौ पचतः ते पचंति स पचते तौ पचेते ते पचंते अप्रयुक्ते
पचति पचतः पचंति पचते पचेते पचंते नामार्थकर्मणि ओदनः पच्यते ओदनौ पच्येते ओदनाः पच्यंते अप्रयुक्ते पच्यते पच्येते पच्यंते पंतुकर्मणि नास्ति युष्मदर्थे कर्तरि त्वं पचा
सि युवां पचथः यूयं पचथ त्वं पचसे युवां पचेथे यूयं पचध्वे अप्रयुक्ते पचसि पचथः पचथ पचसे पचेथे पचध्वे युष्मदर्थे कर्मणि प्रयुक्ते त्वं दुःखी क्रियसे ऽरागैः युवां दुःखि

॥ नाम्नि च युष्मदि चास्मदि च भागैः ॥ ३२ ॥

नौ क्रियेथे यूयं दुःखिनः क्रियध्वे अप्रयुक्ते क्रियसे क्रियेथे क्रियध्वे अस्मदर्थे कर्तरि प्रयुक्ते अहं पचामि आवां पचावः वयं पचामः अहं पचे आवां पचावहे वयं पचामहे
अप्रयुक्ते पचामि पचावः पचामः पचे पचावहे पचामहे अस्मदर्थे कर्मणि प्रयुक्ते विरागैः सुख्यहं क्रिये आवां क्रियावहे वयं क्रियामहे अप्रयुक्ते क्रिये क्रियावहे क्रियाम
हे त्वया पच्यते मया पच्यते इत्यत्र युष्मदाद्यर्थे आख्यातस्य विधानाभावान्न मध्यमोत्तमौ ननु आख्यातानां वर्तमाने तिप्तस्सिन्यादिना आङ्गुवीत्यादिना च कर्तरि कर्मणि च सिद्ध राम
त्वात्किमर्थमिदमारभ्यते सत्यं नामार्थयोः कर्तृकर्मणोर्मध्यमोत्तमावपि प्राप्नुतः युष्मदर्थयोः प्रथमोत्तमौ अस्मदर्थयोः प्रथममध्यमावपि अतो नियमार्थमिदमारभ्यते ९९
नियमार्थत्वेपि न नामादिनियमः नामार्थे कर्तरि कर्मणि प्रथम एव युष्मदर्थे मध्यम एव अस्मदर्थे उत्तम एवेति यत एवकारस्ततो ऽन्यत्राऽवधारणमिति नामाद्यर्थकर्त्रा
दिनियमो भवति न च सप्तक्ता त्वं पाचकः अहं पच इत्यत्र तृणादयो न स्युरिति नामाद्यर्थकर्त्रादिनियमादिति वाच्यं वचनसामर्थ्यात्त्वादयो भविष्यंति यद्वा संजानीया

पक्षोनियमः नामार्थकर्त्रादौ प्रथम एव भवति न मध्यमोत्तमाविति उच्यते भावे आख्याते सर्वे भागाः स्युः नामार्थकर्त्रादौ विहितत्वाभावात् अतो भागनियमोऽत्राऽश्रीय
ते प्रथमो नामार्थकर्त्रादावेव मध्यमो युष्मदर्थकर्त्रादावेव उत्तमोऽस्मदर्थकर्त्रादावेव नान्यत्रेति अस्मिन्पक्षे नामाद्यनियमात्तस्मिन्कर्त्रादौ तद्गुणादयो भवन्त्ये
व नन्वऽस्मिन्पक्षे भावे प्रत्यये कोऽपि पुरुषो न स्यान्नामाद्यर्थकर्त्रादौ आख्यातस्य विधानात् भावे चाऽऽख्याते तदऽभावात् वचनाच्चेत्सर्वेऽपि स्युरविशेषादिष्यते च
प्रथम एव मैवं नामार्थस्य कर्तृत्वाद्यभावेऽपि वचनवत्त्वात्प्रथम एव स्यात्प्रथमाऽतिक्रमे कारणाऽभावान्न मध्यमोत्तमौ प्रथमस्याऽप्येकवचनमेव भवति तावतावचनं
चरितार्थं द्वित्वबहुत्वयोरभावान्न द्विवचनबहुवचने स्तः यत्तु उष्ट्रासिकाः आस्यंते उष्ट्रकर्तृकाऽऽसनसदृशान्याऽऽसनानीत्यर्थः हतशायिकाः शय्यंते हतकर्तृकशयन
सदृशानि शयनानीत्यर्थः तत्तु नागनाथवचनप्रामाण्यात्स्वीक्रियते एकवाक्यतया विधिपक्षोऽप्यस्ति तथाहि वर्तमानेति वित्यादीनां आङ्गुवीत्यादेः नाम्निचेत्यस्य
थवचनप्रामाण्यात्स्वीक्रियते एकवाक्यतयाविधिपक्षोऽप्यस्ति तथाहि वर्तमानेतिवित्यादीनां आङ्गुवीत्यादेः नाम्निचेत्यस्यैकवाक्यतया वर्तमानाद्यर्थवृत्तेर्धातो
र्नामाद्यर्थकर्त्रादौ तिवादीनां पाऽऽतोर्नववचनानि त्रिधा विभक्तानि एकत्वाद्यर्थक्रमेण प्रयोक्तव्यानीति अत्रापि पक्षे भावे उक्तरीत्या प्रथमस्यैकवचनमेव भवति
अथ भागैरिति बहुवचनेन त्रिभिर्भवति कथं लभ्यते शृणु कपिंजलानाऽऽलभेतेत्यत्र वाक्ये कपिंजलानिति बहुवचनेऽपि एकस्मिन् द्वयोश्च बहुत्वाऽभावात् प्रथमब
हुत्वस्य त्रित्वपर्यवसानात् त्रय एव गृह्यंते न चतुःपंचादयो यथा तथा भागैरित्यत्रापि त्रय एव भागा गृह्यन्ते नाधिकाः नन्विह भवान् पचतीत्यत्र मध्यमः प्राप्नोति भवद्यु
ष्मच्छब्दयोरेकार्थत्वादिति चेन्न तयोस्त्वभेदात् अलिंगः संबोधनविषयश्च युष्मदर्थः भवदर्थस्तु लिंगवान्न च संबोधनैकविषयः यथैवाहेमाणवकाधीष्वेत्यत्रा
भिमुखीभावो गम्यते एवं त्वमधीष्वेत्यत्रापि उक्तं च संबोधनार्थः सर्वत्र मध्यमः कैश्चिदिष्यते तथा संबोधने सर्वो प्रथमो युष्मदो विदुरिति त्वद्रूपः त्वत्कल्पः त्वत्तरः
पचसि एवं मद्रूपः मत्कल्पः मत्तरः पचामीत्यत्र तरादेः विशेषणत्वेनाऽकर्तृत्वाद्युष्मदस्मदर्थस्यैव कर्तृत्वान्मध्यमोत्तमौ स्तः अतित्वं प्रियत्वं पचति अत्यहं प्रिया
हं पचतीत्यत्र पूर्वपदाऽन्यपदार्थयोः प्राधान्येन कर्तृत्वात् युष्मदस्मदर्थयोर्गौणत्वेन कर्तृत्वाऽभावान्न मध्यमोत्तमौ एवमऽत्वं त्वं संपद्यते त्वद्भवतीत्यादावपि च्व्यं
तेहि संघीभवति ब्राह्मणा इत्यनुरोधेन प्रकृतेः कर्तृत्वं विकृतेः कर्तृत्वे तु संघीभवति ब्राह्मणा इति स्यात् अत्रापि युष्मदस्मदर्थयोर्विकृतित्वेनाऽकर्तृत्वं तदुक्तं प

चं॰ श्या॰ ताल्वाऽर्थे विनिर्दिश्यमानो युष्मदस्मदी द्वयोरपि तयोर्योगेन धातोर्मध्यमोत्तमौ प्रकृतेर्विकृतेर्वापि ह्येकदा प्रतिपादने वाचकः प्रकृतेः संख्यां गृह्णाति विकृतेर्न तु॥
ल॰ भा॰ अत एव मृद् घटो भवति ओदनस्तंडुला भवंतीति प्रसज्यते स च त्वं च पंडितौ भवथः अहं च स च त्वं च पंडिता भवाम इत्यत्र त्रयाणां नामाद्यर्थानां कर्तृत्वेन प्राप्तावा
१२ पि परत्वान्मध्यमोत्तमौ भवतः तदुक्तं एकदा चेत्क्रियाकालसंबंधप्रतिपादनं धातोर्नामादिषूक्तेषु यः परः स पुमान् भवेत् परत्वं च विधायकसूत्रापेक्षया न प्रयोगापे
क्षया ग्राह्यं अस्मदर्थस्यैकत्वेपि समुदायाश्रिता संख्या ग्राह्या तदुक्तं द्वयोर्नाम्नोर्वहूनां वा यदि वाक्ये समुच्चयः नाम च याश्रिता संख्या कृतिवाच्यो विशेषणं स च त्वं
च अहं चेति सह विवक्षायां तु आदेश्वदंदेदु जि आद्ययोर्लोपेऽस्मदःशेष त्वादुत्तमो भवति संख्या तु समुदायाश्रिता भवति प्रत्येकं कर्तृत्वविवक्षायां तु स पंडितो भवति
त्वं भवसि अहं भवामि अत्र चकाराः किमर्थाः शृणु नामार्थकर्त्रादौ प्रथमः चादकर्त्रादौ भावे प्रथमः तत्र द्वित्वबहुत्वयोरभावाद्द्विवचनबहुवचने न स्तः प्रथ
मातिक्रमे कारणाभावादेकत्वाभावेप्येकवचनं भवति विधानसामर्थ्यात् युष्मदर्थे कर्त्रादौ मध्यमः चादुत्तमोऽपि क्वचित् अस्मदर्थे कर्त्रादावुत्तमः चात्क्वचिन्म
ध्यमोपि तेन परिहासे मन्योपपदान्मध्यमः स सर्ववचनांतः मन्यतेर्धातोरुत्तमः स एकवचनेति संगृहीतं भवति त्वं इति मन्यसे अहमोदनं भोक्ष्ये इति स्थितं तत
त्वं इति मन्ये अहमोदनं भोक्ष्यसे मुक्तः सोऽतिथिभिः त्वं वा युवां यूयं वा मन्ये अहमोदनं भोक्ष्यसे आवां भोक्ष्येथे वयं भोक्ष्यध्वे एते प्रयोगाः परिहासे एव भवंति तिङ
स्त्री शित्री शीत्यत्र ति ङो भागे रितिवक्तुं युक्तं कपिंजलाऽधिकरणन्यायेनात्मनेपदपरस्मैपदयोस्त्रयस्त्रयो भागाः कर्तव्याः आद्यस्तु प्रथमो भवत्येव द्वितीयोपि म
ध्यमो भवत्येव तृतीयस्तूत्तम इति स्वीकारात् युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यम इत्यऽस्य स्थाने युष्मदि मध्यम इति सुवचम् युष्मदर्थे वाच्ये इ राम
ति तदर्थः वार्थे वाच्ये दंदइति वत् एवं नाम्नि प्रयुज्यमानेऽपि प्रथम इति कातंत्रसूत्रेपि प्रयुज्यमानेपीति व्यर्थं नामार्थे वाच्ये प्रथम इत्यर्थे प्रयुक्ताऽप्रयुक्तशब्दार्थो १२
तर्भावात् यदपि युगपद्वचने परः पुरुषाणामिति कातंत्रसूत्रं तदपि न उक्तरीत्या परत्वेनैव निर्वाहादिति दिक् ॥ ३२ ॥ ॥ ॥ ॥ ॥ ॥ ॥

णेपरेणिर्णिङ्वदितिण इत् यस्य स णित् अणितंणितद्दृत्याहणिद्वदितिगम्यतेपरत्रप्रयुज्यमानः परशब्दोविनापिवतिंवत्यर्थंगमयति अवशिष्टोवशिष्टइत्याहवशिष्ट
वदितिगम्यते अयंचकार्यस्यप्राधान्यात्कार्यातिदेशः कार्यार्थत्वादितरेषामतिदेशानां णितःकार्यमतिदेष्टव्यंनास्तिणितियत्कार्यंतदतिदिश्यते ननुआनोणप्डौइणः।
ननोलोपइत्यादिणितःकार्यंकुतोनाऽतिदिश्यते मैवं णाविणशब्देनविहितं नतुणित्त्वेनेतिनाऽऽतिदिश्यते यद्वा सामान्याऽतिदेशेविशेषोनाऽतिदिश्यतेणविशिष्टतु णिद्विशे
षः यथाब्राह्मणवदस्मिन्क्षत्रियेवर्तितव्यमित्यत्र यद्विशिष्टेगोतमेचतन्नातिदिश्यते किंतुब्राह्मणसामान्यस्यतथात्रापिणितियदृष्टंकार्यंतदतिदिश्यते अतस्य
नामिनः उपधायाअतश्चवृद्धिर्भवति अकारान्तस्यतुयतइतिपरत्वाल्लोपः आतश्चसत्यामसत्यां वा वृद्धौनास्तिविशेषः संध्यक्षरांतस्यनास्ति अवोढामवोढेत्यादौतुवृ
द्धिंकृत्वोद्धिधीयतेइतिसकृत्प्रवृत्त्याचरितार्थावृद्धिः पुनर्नप्रवर्त्तते नामधातूनांतुकेचिद्विकल्पेनवृद्धिरिष्यतेकविरिवाचारीत् अकवयीत् अकवायीत् भूरिव अभवीत्
अभावीत् अगवीत् अगावीत् अतोहलादेर्लघोर्वेतिप्रजितत्वान्नानिमन्तस्यसेटिसौपेवृद्धिं वेच्छन्ति अगदीत् अगादीत् अरदीत् अरादीत् अतः किं अदेवीत् हलादेः किं

॥ णित्वे ॥ ३३ ॥ अनिटोनामिवतः ॥ ३४ ॥

माभवानटीत् लघोःकिं अतक्षीत् सेटिकिं अनात्सीत् सौकिं गदिता येकिं अनभिष्ट वदीत्यादिकिं अवादीत् अव्राजीत् अफालीत् अचारीत् हम्यंत क्षणश्वसजागृण्येदितां
वृद्धिःसेटिसौपेनेच्छन्ति अग्रहीत् अचमीत् अहयीत् अक्षणीत् अश्वसीत् अजागरीत् अश्वयीत् अकटीत् चानुवृत्त्याइदंसर्वंग्राह्यं शास्त्रातिदेशपक्षेपिधातोर्नामिनः॥
अतउपधायाइत्यनयोरतिदेशादुक्तलक्ष्यसिद्धिर्निर्बाधैवेतिदिक् ॥३३॥ अनिटः अनामिवतइति छेदः द्वयमिदंधातोर्विशेषणं यद्यपि धातुःसर्वोप्यनिड्वतस्तिद्बुधा
नाभावात् तथापिनइट्रूपस्मात्परस्यप्रत्ययस्येतिव्याख्येयं णादेरनिट्त्वंनग्राह्यंकाद्यष्टाभ्योभिन्नात्परस्यनसंसेट्त्वात् तस्मानादिष्वऽनिट्त्वंग्राह्यं अश्वनामीचानामिनीलोऽ
स्यद्वंद्वोनेकरूपमारोवतुः प्रत्येकंसंबध्यते अवतोनामिवतइतिअवत्त्वंइति चाऽनुपधाकारेणग्राह्यं उपधायाअतः पूर्वेणसिद्धत्वादंत्यस्ययतइतिलोपविधानात् अस्का
सीत् अप्राक्षीत् अव्राक्षीत् अचिकीर्षीदित्यऽत्रत्वऽलोपः अनैक्षीत् अरौत्सीत् अवैषीत् अमौषीदितिनतुपूर्वेणाऽपिसिध्यति नचपरत्वादनेनविधेयस्यैकेनविरोधाऽभावात्

वै॰ स्था॰ परेणोत्यस्यापरत्वेः ननु वतु ग्रहणं मास्तु अनामिन इत्येवोच्यतां विधानवलाच्च पूर्वस्याविषये ऽस्य प्रवृत्तिर्भविष्यति नचनत्रसमासभ्रमः स्यात् अनिटोधातोः सिर्णिदित्युभ

त॰ भा॰ केनामिवतोऽपि प्रसक्तावनामिन इतिनिषेधः स्यादितिवाच्यं अनिटोऽगत इतिवक्तुं शक्यत्वात् मैवं अचिकीर्षीदित्यादौ लोपं वाधित्वाऽतो वृद्धिप्रसंगात् अकारांतस्यधा

९२ तोरिति संभवति सामानाधिकरण्येवैयधिकरण्यस्याऽन्याय्यत्वात् अंतस्य तु नामिनः पूर्वेणापि सिद्धत्वात्तद्वतो ग्रहणं भविष्यति नन्वत्र वतुर्न प्राप्नो

तिर्मांतोयथा नदिधानादिति चेन्न क्वचिदमांतोपधादपि वतिर्नोस्तइत्यऽनेनज्ञापनात् तेननडित्वानित्यादिसिद्धं यद्वा यत्र मोपधत्वं भाविनत्र वतुर्भवतीत्यनेन ज्ञाप्यते

तेन शमोऽस्यास्तीति शमीशम्यस्यास्तीति शमिवानित्यादिसिद्धं स्वामिमानित्यादौतु मत्वस्यासिद्धत्वेन भाविनोपि मोपधत्वस्याभावान्न वतुः मतोरेववतुरादेश इति पक्षेतु नामिवत इ

त्यत्र युक्त एव वतुः नलोपे कृते मोपधत्वस्य सत्वात् ननु ज्वलनवद्दाानित्यादौ मत्वर्थीयत्तिमत्वर्थीयोनास्तीत्युक्तत्वादिन्नंतात्कथं वतुरिति चेन्न अनामिवत इति समुदायस्येन्नंता
(above मत्वर्थीयत्ति: मा)

त्वाऽभावात् यद्वा मत्वर्थीयादिरूपोमत्वर्थीयोभवतीत्यनेन ज्ञाप्यते तेन दंडिमती शालाकुंजरवान् ग्राम इत्यादिसिद्धं पेइत्येवनेह अरंक्त अरक्षत वेदामनिड्भावप

क्षेग्रहणं भवति अक्षाक्षीदित्यादि अकारप्रश्लेषाऽभावेत्विदं न सिध्येत् नामिवत एव ग्रहणान्नन्वनिट इत्येवास्तु मास्तु नामिवत इति स्वरादेरित्यतः स्वर इत्यऽनुवर्त्य

तत्र च मत्वर्थे लक्षणाग्राह्यातनतश्च स्वरवतोऽनिटो धातोः सिर्णिन्नकार्यकृदित्यर्थ इति चेन्नामिवत इत्यस्योत्तरार्थत्वात् एवं तर्हि अनिट इत्यस्याप्युत्तरार्थत्वसत्वाद्यो

गविभागोमास्तु अनिटो नामिवतो हश्यांतात्स्सिगित्येक एव योगोस्तु णित्येइत्ययं तु सामान्येनोपधाऽनुपधाकारस्यांत्यानंत्यनामिनश्च णित्कार्यातिदेशार्थो व्याख्यायता

मिति चेन्न अतौत्सीत् अनैक्षीदित्यत्रेव अगोपीत् असेधीदित्यत्राऽपि नामिनो वृद्धिप्रसंगान्न ह्यनिटो धातो वृद्धिर्नसेट इति नियामकमस्ति अस्तु तर्हि योगविभागः एम

सच नियमार्थो व्याख्येयः नामिवतश्चेदनिट एवेति सेटो न भविष्यति इति चेन्न अजैषीत् अक्षैषीदित्यादिर्न सिध्येत् विपरीतनियमस्यापि सत्वे अनिटश्चेन्नामिवत १३

एवेत्यराङ्क्षीदित्यादौ न स्यात् विधिनियमसंभवे विधिकल्पनस्य लघुत्वाच्च अनोणित्येइतियोगउत्तरार्थ एव अनिट इत्यत्र स्वरानुवृत्तौ नामिवत इत्युत्तरार्थमेव अ

कारप्रश्लेषश्च न कार्यः प्रयोजनाऽभावात् स्वराऽननुवृत्तौ तु नामिवत इत्यस्यात्रापि संबंधः कार्यः अकारप्रश्लेषश्चेतिदिक्॥ ३५ ॥ ६ ॥ ६ ॥ ६ ॥

हश्च शश्च षश्चते अंतेयस्य तस्मात् अत्रांतग्रहणांचिंत्यं हशषादितियाक्यं तेन धातोर्विशेषणात्तदंतत्वला भः हांतात् शांतात् षांतादनिटो नामिवतो धातोः परः सक्प्र
त्ययः स्यात् भूतमात्रार्थे दिवादौ परेसेरपवादः अमिक्षत् अधुक्षत् तहूतृंहूहिंसायां अतृक्षत् वेटोपीडभावेअनिट्त्वात् ग्रहणं अदिक्षत् अकुक्षत् अमृक्षत् अद्वि
क्षत् अकक्षत् हसषेतिकिं अरौत्सीत् अनैक्षीत् अनिटः किं अग्रहीत् अमेशीत् अमोषीत् नामिवतः किं अधाक्षीत् अदाङ्क्षीत् दिवादौ किं द्वेष्टि लेढि भूत
मात्रार्थे किं अलेट् अद्विष्टां अनद्यतन त्वस्यापि सत्वात् नभूतमात्रार्थेनापेइतीह न संबध्यते न्यविक्षत न्याद्यसिद्धिप्रसंगात् दुहदिहलिहगुहूभ्यः तुवयोर्वा तिसक्॥
अधुक्षत अदुग्ध अदुग्धाः अधुक्षथाः अधुग्ध्वं अधुक्षध्वं अदुहवहि अधुक्षावहि एतच्चानुवृत्यावोध्यं चंद्वितीयमनुवृत्य कथं मृशस्पृशात् पहपांवा सग्विधेयः।
को गुणप्रतिषेधार्थः ननु तर्हि इड्भावे सक् प्राप्नोति नामिवत्वात्पाणिनीयमते तु न प्राप्नोति शालइगुपधादितीगुपधत्वाभावादिति चेन्न तेषामपीगुपधत्वादतोप्या
दित्यत्रालग्रहणेजातिग्रहणात् अष्टन्नएकालमन्त्यपदइत्यत्र एकग्रहणेनैतत् ज्ञाप्यते वर्णग्रहणेजातिग्रहणमिति यथा विद्वांसाविन्यत्र सांतसंयोगस्योपधाया।

॥हशषांतात्सक्॥३५॥

दीर्घीभवतितथेदमपि शालइगुपधादित्यत्रशालइग्वतइतिसूत्रयितुमुचितमित्यभिप्रायेणाभगवन्नामिवतइतिसूत्रितं यदितुज्ञापकसिद्धंनसर्वत्रेतिजाति
ग्रहणंनेष्यतेतदानामिवतइति सामान्यशब्दस्य विशेषपरत्वं लक्षणीयं नामिवत्वं हिऋादिमध्यांतनामिनाभवतीति सामान्यशब्दः नाम्युपधत्वं तूपधानामिनैवभ
वतीति विशेषः तदाअतांक्षीदितिरूपमितिदिक् श्लिष आलिंगने इत्यस्य पुषादित्वादङ् प्राप्नोति तद्बाधकसको विधानार्थे श्लिषइति वचनं कर्तव्यं सचालिंगने अनालिं
गने चङस्य बाधकः प्राप्तः इष्यते च पे आलिंगनेमक् अन्यत्रङः आतितुपूर्वेणासर्वत्रसगेवप्राप्तो न सिरत आलिंगनेइति नियमार्थं वचनं नान्तरं कर्तव्यं आलिंगन एव सक् नान्या।
त्रेति आश्लिक्षत् रामः सीतां अनालिंगने तु समश्लिषज्जतुकाष्ठं नचेणमप्ययं बाधेतेति वाच्यं पुरस्तादपवादा अनंतरान् विधीन् बाधंते नोत्तरानिति परिभाषणात् उपस्थित
लाघवमूलकं चेदं बाधकस्यानंतरस्यैव बाध्याकांक्षापूर्त्तेरव्यवहितग्रहणं न्याय्यं आश्लेषि सीता रामेण आश्लिक्षातां आश्लिक्षंत सिपक्षे आश्लेषि आश्लिक्षातां आश्लिक्षत

वै॰ श्रा॰
ल॰ भा॰
१४

णेरिति प्रत्ययो गृह्यते प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदंतस्य ग्रहणमिति अंताद्धातोः कर्तरि भूतमात्रार्थे दिवादौ परे चङ् प्रत्ययो भवति सिचोऽपवादः अचीकरत्
अजिग्रपत् कर्तरि किं अकारयिषातां घटौ कुलालेन अप्कर्तरि द्रुत्यतो मंडूकप्लुत्या कर्तरीत्यनुवर्तते भूतमात्रार्थे किं अकारयत् दिवादौ किं कारयति ङकारो ङित्
धातोर्विशेषणार्थः द्वि इति वाक्यांतरं अत्राङितीत्यनुवृत्तं सप्तम्या विपरिणम्यते क्रियावृत्तिगणनार्थात् द्विशब्दात्सुः तेन गणयमानावचनरूपा क्रियाऽऽक्षिप्यते तेन
तस्याऽङि परे स्य तस्य धातोर्द्विर्वचनं भवतीत्यर्थः तच्च नित्यत्वात् णिलोपे कृते प्रवर्तते उदाहरणं तु प्रागुक्तं वाक्यद्वयबलेन अङ् द्विर्वचनयोः समावेशस्स सिद्धस्त्वम्बौ
व्यर्थः अत एवेति वाक्यांतरं श्रिद्रुस्रु कमिभ्यो व्यंतेभ्योप्यङ् कर्तरि भूतमात्रार्थ दिवादौ द्विश्च अशिश्रियत् अदुद्रुवत् असुस्रुवत् अस्मादेव चकारादनुवर्तितात् धाधेट्
श्विभ्यां वाङ् अदधत् अशिश्वियत् ॥ ३६ ॥ लृदित्वस्य सलित्पुष च आदिर्यस्य स पुषादिः अनुद्भूतावयवः समुदायोऽन्यपदार्थ इत्येकवचनं लिच्च पुषादिश्चानयोः
समाहारः लित्पुषादि क्लीवत्वस्यानित्यत्वान्नुमो वा पुंस्त्वं लितो धातोः पुषादेश्चाङः प्रत्ययो भवति भूतमात्रार्थे दिवादौ परे अगमत् अपिषत् अपुषत् अशमत् भूतेद्रा

॥ णेरङ् द्विश्च ॥ ३६ ॥ लित्पुषादेर्ङः ॥ ३७ ॥

ति किं अगच्छत् दिवादौ किं गच्छति पे किं समगत अविदत् द्युतादेरित्यपि वक्तव्यमेवं द्युतादयो लित एव पाठ्याः अनुदात्तेत्त्वार्थं कश्चिदनुबंधः पठनीय एव सल्कार एव
पाठ्यः यत्रापि वृत्तु संज्ञादौ द्विकस्यार्थं तु वर्णः पठितस्तत्रापि तदर्थः लृकारोऽपि पाठ्यः यद्वा अङोऽनुवृत्तिस्त्वेङ विधानं योगविभागार्थं न चाङि सति द्विर्वचनप्रसंग इति वाच्यं
सन्नियोगशिष्टन्यायेन णेरङि सति द्विर्वचनं न त्वस्मिन् यथापरोक्षार्थे णादियोगे द्विर्वचनं भवति ननु विदो न वानामित्यादि विहितेयोगे न चाऽङि लघोर्ह्रस्व उपधाया इत्य पम
स्य प्रसंगः लित्पुषादेर्ङी वोपधत्वाभावात् द्वित्वाऽभावेन पूर्वस्मित्वाऽप्रसंगाच्च अतो धातोर्ङ इत्यनेन सूत्रेण लस्य दर्शनाद्युतादेर्ङो विधीयते तेन धातुमात्रात् किंचाऽस्त्यतिव १४
क्तिस्थानीनां लित्वेन न निर्वाहः आनिङ स्यात्प्रसंगात् निरास्थत् वृत् अवोचत् अख्यत किंच लिपिसिचिह्वां लित्वेन पि निर्वाहेप्याऽऽत्मनि विकल्पार्थवचनारंभप्रसंगात् ।
ङ इति योगविभागे तु सिद्धमिष्टं पुषादिर्दिवादौ यं तर्गणो ग्राह्यः लित्साहचर्याल्लितोऽपि प्रायेणानिट स्तत्साहचर्यात् पुषोप्यऽतिङ्ग्राह्यः स च दिवादिस्तु दादिर्गणो ग्राह्यः नभ्वादिः

इरित् यस्य स तस्मात् इरितो धातोर्वाङ् प्रत्ययो भवति भूतमात्रार्थे दिवादौ पसेरपवादः अरुधत् अरौत्सीत् अविजत् अवैक्षीत् भूतमात्रार्थे किं अवेवेक् अ
वेविक्तां दिवादौ किम् रुणद्धि वेवेक्ति अत्र वर्तमानसमीपे भूते तिवादिविधानादस्ति भूतमात्रार्थतापेक्षा किं अरुद्ध अविक्त इरितः किं अचेतीत् ननु जृस्तंभुम्रुचुम्लुचुग्रुचुग्लु
चुग्लुंचुश्विभ्यो ङो विधेय इरित्वात् भावात् इति चेत् सत्यं जृ षद्द इद् ओ श्विद् इत्यादिपाठे एव लाघवं न तु वचनारंभे यद्वा द्विश्चेति चमनुवर्त्य तेन मनुक्तसमुच्चय
र्थव्याख्यायते ऽपि प्राह्याद् इति दिक् ॥ ३८ ॥ अत्र त्रीणि वाक्यानि विधेयस्यादौ पाठात् प्रथमम् इणिति तत्र सीष्ट इत्यादितो व्यादिस्य पूसी इति चानुवर्त्य सप्तम्या विपरिणामनीयं
उनरस्त्रासकर्तरीत्यः प कृष्य भावकर्मणी ग्राह्ये न तु अस्सीति आसप सिषु परेषु भावकर्मणि चार्थे धातोर्वेण् प्रत्ययः घानोरित्यनेन स्वरांतानां हन् ग्रह दृशां च ग्रहणं योग
विभागे इष्टसिद्धि इति स्वीकारात् भाविषीष्ट भविषीष्ट भाविता भविता भाविष्यते भविष्यते कारिषीष्ट कृषीष्ट कारिषीयास्तां कृषीयास्तां कारिता कर्ता कारिष्यते करिष्य
ते अकारिष्यत अकरिष्यत अकारिषातां अकृषातां घानिषीष्ट वधिषीष्ट घानिता हंता घानिष्यते हनिष्यते अघानि अवधि ग्राहिषीष्ट ग्रहिषीष्ट ग्राहिष्य

॥ इरितो वा ॥ ३८ ॥ इणतन्योऽकर्तरि ॥ ३९ ॥ लोपः ॥ ४० ॥

ते ग्रहिष्यते अग्राहिषातां अग्रहिषातां दर्शिषीष्ट दृक्षीष्ट कारिषीष्ट कारयिषीष्ट स्वरांतेत्यादि किं पक्षीष्ट पक्ता भावकर्मणीति किं करिष्यति अकार्षीत् सीष्टेत्यादि किं
चकृषे चक्रदे शिश्यिदे तनीति द्वितीयं वाक्यं धातोरिण् प्रत्ययो वा भवति तनि परे उत्तरवाक्ये अकर्तरीति पर्युदासादिह कर्तरीति लभ्यते वेत्यनुवर्तते व्यवस्थितवि
कल्पत्वात् पदेरिण् नित्यं दीपजनबुधपूरितायिप्यायिभ्यो वा अपादि अदीपि अदीपिष्ट अजनि अजनिष्ट अबोधि अबुद्ध अपूरि अपूरिष्ट अतायि अतायिष्ट अप्यायि अप्या
यिष्ट अकर्तरीति तृतीयं वाक्यं कर्तुरन्योऽकर्ता तस्मिन् धातोरिण् प्रत्ययो भवति भावकर्मणि चार्थे तनि परे अभावि अपाचि भिस्सा अकारि घटः तनि किं अकृषातां भा
वे इति किं अकृत घटं कुलालः नकारं विना नेङ् इत्युक्ते तु तेत्यादौ मध्यमे ऽति प्रसंगः स्यात् ॥ ३९ ॥ तनीत्यनुवृत्तं षष्ठ्या परिणमनीयं इणिति तु पंचम्या इणः परस्य तनो लोपः
उदाहरणं तु प्रागेवोक्तं ननु तन इति षष्ठी निर्देशे त्यस्य लोपः स्यादिति चेन्न आदेरित्यनुवृत्त्या ऽदेरपि लोपविधानात् यद्वा लोपो ह्रस्वाऽऽज्झस इत्यतो लोप इत्यपकृष्यते ते

वै॰ प्रौ॰ तद्वयोर्लोपः यद्वा लुप्यते इति लोपः कर्मणि घञ् तनोतितु प्रथमया विपरिणम्यते तेन न तन् लुप्यत इत्यर्थः षष्ठ्यभावान्न सर्वस्य लोपः क्वचित्तु लुगिति पाठः तत्र सर्वस्य तनो
ल॰ भा॰ लुग्भवति इणः किं अभविष्ट तनः किं माविधीष्ट ॥४०॥ हसान्परयोः दिस्योर्लोपः अहन् अनेनेक् हसात्किं अभवत् दिस्योः किं अस्ति दिस्सहचरितस्य सेर्ग्रहणान्नेह
९५ अस्ति ननु संयोगान्तलोपेनैव गतार्थमिदं सत्यं इदमेव ज्ञापयति रात्सस्येति सूत्रमस्ति तेनाबिभर्भवानित्यादौ संयोगान्तलोपो न स्यादित्यस्यारंभः सिग्रहणं तु नरा
र्थं ननु अरोदीत् अरोदिदित्यत्रातिप्रसंगः हसान्परत्वात् अडीटोः सतोरपि दिसित्वानपायात् यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते इति न्यायात् मैवं अर्थवत्त्वाभावात् का
र्त्संख्यार्थयोर्दिस्योर्ग्रहणात् अडीटोः सतोः समुदायस्यार्थवत्त्वेन दिस्योरानर्थक्यात् यद्वा यदागमा इति न्यायेन विभक्तित्वं प्रत्ययत्वं गृह्यते न हि दित्वं सित्वं इरुच्चा
रणार्थः वत्वसत्वजातिवत्वस्य समुदायेऽभावात् दिस्योस्तु हसान्परत्वाऽभावात् ॥४१॥ रुद्स्वादिर्यस्य अदश्च रुदादिश्च तयोः समाहारः अतः रुदादेश्च परयोर्दिसि
योरडागमः आदत् आदः अरोदत् अरोदः स्वप् श्वस् अन् जक्षः एवं अदितिकिं अयौत् दिस्योः किं अस्ति रोदिति माधवस्तु दिवादावडित्यस्यान्तरमदो दिस्योरिति

॥ दिस्योर्हसात् ॥४१॥ अड्रुदादेरद् ॥४२॥ अस्तेरीट् ॥४३॥ सेः ॥४४॥ लोपो ह्रस्वान्ङसे ॥४५॥

सूत्रमस्तीत्याह तन्न गौरवात् अत्र त्वट्मात्रं निवृत्तं रुदादेरडिति तु त्वयापि वक्तव्यमेव दिस्योरिति त्वनुवृत्तिलभ्यं ॥४२॥ रुदादेरित्यनुवर्तते अड्ग्रहणं तु निवृत्तं क
चिदेकदेशोऽप्यनुवर्तते इति स्वीकारात् अस्तेरिति तु तंत्रादिना व्याख्येयं तेन विद्यमानादस्तेरिति लभ्यते रुदादेश्च परयोर्दिस्योरीडागमः आसीत् आसीः अरोदी
त् अरोदीः एवं स्वप् श्वस् अन् जक्षः विद्यमानात्किं अस्तेर्भूरित्यादेशे माभूत् अभूत् दिस्योः किं अस्ति अस्तेः किं अदात् ॥४३॥ अस्तेरित्यनुवर्तते न तु सेर्वि
शेषणं विद्यमानात् सिप्रत्ययात्परयोर्दिस्योरीडागमः अचैषीः विद्यमानात् किं अदात् अत्र प्रत्ययलक्षणेन सेः परत्वमस्ति विद्यमानादिति विशेषणान्नेट् सेः किं अरु राम
दत् ङान्तपरयोर्माभूत् दिस्योः किं अचैषि ष्टां योगविभाग उत्तरार्थः ॥४४॥ ह्रस्वात्परस्य सेर्लोपो भवति ङसे अकृत ह्रस्वात् किं अनैष्टां ङसे किं अकृषातां सेः किं अ ९५
शिष्विषत् अत्र लोप इति योगो विभज्यते सगिति स्वरे इति चानुवर्तते सकोलोपो भवति स्वरे परे अधुक्षत अधुक्षातां अधुक्षन् केचित्तु स्वरेणानुवर्तयन्ति लोप

इतिचानुवर्तयंति क्वचित्सर्वस्यसकोलोपः तुवयोरात्येव अदुग्ध अधुक्षत अदुग्धाः अधुक्षथाः अधुग्धं अधुक्षध्वं अदुह्वहि अधुक्षावहि अधुक्षामहि इत्या
दिसिध्यतीत्याहुः॥ ५५॥ इटःपरस्यसेर्लोपःस्यादीटि अचेतीत् अलावीत् इटःकिं अचैषीत् ईटिकिं अलाविष्टां॥ ५६॥ क्समात्परस्यसेर्लोपोक्से अरौक्षां अगोप्तां
क्समात्किं अचेष्ट क्सेकिं अरौत्सुः सेःकिं अरुधतां ङस्यमाभूत् लोपोह्रस्वक्समसाक्सेइतिपठितं युक्तं पृथक्करणंचिंत्यफलं॥ ५७॥ दाधादिर्यस्यसदादिःत
स्मात् सेर्लोपः पेपरे डुदाञ् दाण दोइत्येतेषांदाशब्देनग्रहणंदाप्दैपोस्तुनलक्ष्यानुसारात् अदात् धाञ् अधात् अस्थात् इण अगात् पिवति अपात् अभूत् शा
च्छासाघ्राधेड्भ्यस्तुवा शो अशात् अशासीत् च्छो अच्छात् अच्छासीत् षो असात् असासीत् अघ्रात् अघ्रासीत् दादेःकिमु गै अगासीत् पेकिं अदित् अधित्
सेःकिं दास्यति॥ ५८॥ मेइतियोगोविभजनीयः सिरित्यनुवर्तनीयं माशब्देप्रयुज्यमाने सिर्भवति सचदिवादिपरोदृष्टोदिवादिपरस्यवात्रभवति ननुभूतेसिरिति
सिर्विहितएवकिंपुनर्विधानेनेतिचेत् सत्यंसभूतेविहितःकालांतरेत्वनेनविधीयते तेनसर्वेषामाऽस्यातानांविषये सिर्भवति माशब्दयोगेमाशब्दोऽव्ययंनास्ती

॥ इटईटि॥ ५६॥ क्समात्॥ ५७॥ दादेःपे ५८॥ मेऽटः॥ ५९॥ ओर्वाहेः॥ ५०॥ अतः॥ ५१॥ ६॥ ॥ ०॥ ॥ ६॥

तिमाशब्दोगृह्यते प्रयोगेङकाराऽश्रवणात् ङितङित्वा व्याकरणांतराऽनुरोधात् ङित्देववाद्याख्यः अटइतिद्वितीयोयोगः मेइतिलोपइतिचानुवर्तते मा
शब्देप्रयुज्यमाने सत्यटोलोपः माभवान्भूत् माभवान्भवत् मेकिं नाभवत् अटःकिं माप्रभूत् प्रस्यलोपोन॥ ५९॥ उवर्णात्परस्यहेर्लोपःवेतिनविक
ल्पार्थं किंतुप्रत्ययसंबंधिनोऽसंयोगपूर्वादित्यस्याऽर्थस्यप्रतिपादनार्थं उकारश्चप्रत्ययावयवःप्रत्ययरूपश्चगृह्यते सुनुतनु प्रत्ययसंबंधिनःकिंयुहि रुहि॥
असंयोगपूर्वात्किं शक्नुहि ओःकिं क्रीणीहि हेःकिं तनुथः॥ ५०॥ हेर्लोपःभव अतःकिंयुहि रुहि तपरःकिं याहि हेःकिंभवतः तातङोपिस्थानिवद्भावेन द्विवा
न् प्राप्तोलोपोवेत्यनुवृत्त्याव्यवस्थितविकल्पाश्रयणान्न यद्वा तङ्ज्ञापकसिद्धोज्ञापकसिद्धोवोभयथाप्यनित्यत्वात्तातङिहित्वंनाऽऽयाति यद्वा सकृद्गतौविप्रति
षेधेयद्बाधितंतद्बाधितमेवेतिनतातङोलोपः तातङोऽवकाशस्तुअनात् हिलोपस्यावकाशःप्रेरणार्थेनातङभावपक्षे आशिषोऽर्थेनातङपक्षेतूभयप्रसंगेपरत्वात्

अत्र एधेति एधयकृपदे वा ऽनुकार्या ऽनुकरणयोरभेदविवक्षया विभक्त्यनुत्पत्तिः अत इतीहा ऽनुवृत्तं षष्ठ्या परिणाम्यते अतो लोपो ऽति एतिच पचंति पचे अतः किं
ब्रुवंति ब्रुवे तपरः किं यांतिगे च्यवंते च्यवे इत्यत्र च्यु अ अं ते ए इति च स्थिते लोपात्परत्वाद्यद्यपि गुणः प्राप्तस्तथापि नित्यत्वाद्लोपे ऽत्र कृते ङित्परत्वाद्गुणो न स्यात्
मैवं प्रत्ययलक्षणेन गुणासंभवात् पुनरित्यादौ तु लुकि न तन्निमित्तमिति न गुणः यद्वा प्रकृतिप्रत्ययाश्रितत्वेन पूर्वं पूर्वमंतरंगमिति वांतरंगत्वेन गुणः अदे किं भ
वति आख्यातप्रकरणात्पूर्वोक्त रत्रा ऽऽख्यातस्यादेशविधानाच्चा ऽदादिरेदादिश्चाख्यातप्रत्ययएव ग्राह्यो नेह देवात्र देवेषा पत्तुमाधवेनोक्तं धातुप्रत्ययेषु परस्य
लोप इत्य ऽस्या ऽप्रवृत्तिरनेन ज्ञाप्यत इति तन्न तद्धितप्रकरणादेवतस्या ऽत्राप्रवृत्तेः सिद्धत्वात् ॥ ५२॥ वमन्वमौ तयोः परयोरत आ भवति भवामि भवावः भवामः अ
तः किं चिनुवः चिनुमः वमोः किं भवथः भवथ उक्तधिया नेह रामवायुः ॥ ५३॥ आच्च आच्च आदात् तस्य आते आतां आथे आथां इत्येतेषां विरायाऽनुकरणं अ
तः परस्य आतः आथ आत् इर्भवति एधेते एधेतां एधेथां आदायः किं भवाव भवाम आ किं अंत्यस्य माभूत् अतः किं ब्रुवाते ब्रुवाथे तपरः किं गाते अंतरंगत्वाद्पः स

॥ अदे ॥ ५२॥ वमोरा ॥ ५३ ॥ आदायइः ॥ ५४ ॥ या ॥ ५५॥ यामियं ॥ ५६ ॥ युसइट् ॥ ५७॥ ओर्वमोर्वालोपः ॥ ५८॥ कृञोये ॥ ५९

वर्णे दीर्घे कृते पुनः सवर्णे दीर्घः ॥ ५४॥ अनुकार्या ऽनुकरणयोरभेदविवक्षया ऽविभक्तिको विर्देशः अतः परो या इर्भवति भवेत् भवेतां षष्ठ्य ऽभावान्नान्त्यादेशः ज
सोऽतिवत् अतः किं पुयात् तपरः किं पायात् या किं भवतां ॥ ५५ ॥ अतः परो यामियंभवति भवेयं अतः किं युयां तपरः किं यायां याम् किं भवति ॥ ५६॥ अतः परस्य पुस
इडागमः भवेयुः दित्वादयमा ऽऽगमो ऽन्यथा दुरित्ये वा ऽनुवर्तयेत् इड्ग्रहणं च ना ऽकरिष्यत् ॥ ५७॥ उकारप्रत्ययस्य उकारांतप्रत्ययस्य चा ऽसंयोगपूर्वस्य वा लोपः वमोः
परतः ओर्वाहेरित्यतो वेत्यनुवर्तते तस्य चा ऽसंयोगपूर्वस्य प्रत्ययस्येत्यर्थः सुन्वः सुनुवः सुन्मः सुनुमः तनुवः तन्वः तन्मः तनुमः सुनोमि तनोमीत्यत्र तु परत्वाद्गुणो ऽ
भवति प्रत्ययस्य किं युवः युमः असंयोगपूर्वस्य किं शक्नुवः तक्ष्णुवः वमोः किं सुनुतः ओः किं अकृष्वहि ॥ ५८॥ कृञः परस्योप्रत्ययस्य लोपो येवमोश्च कुर्यात् कुर्वः
कुर्मः अत्र वमोरित्यनुवृत्तिसामर्थ्यान्नित्यो लोपः माधवस्तु कृञो येइत्यत्र कृञ इति योगविभागः कर्तव्यः तत्र ओर्वमोर्लोप इत्यनुवर्तते न विकल्पो योगविभागसामर्थ्यादित्या

कृञो नडः स्यान्ङिति उपपरे गुणे कृते कृञोऽ ह्रस्वभ्यते कुरुतः कुर्वंति अत्र योर्विहसे इति दीर्घो न संज्ञापूर्वकत्वात् कुत्र किं भवतः ङिति किं अकरवं अत किं अतः गु
णे कृते रेफस्य वा मा भूत् तपरः किं अकार्ष्व कुरुत इत्यादौ यथा द्वाभ्यां व्यवधाने भवति तथाऽत्रापि स्यात् किं च तपरत्वमुकारार्थमपि उकारे कृते इति निमित्तो गुणो माभूत्
ओ इत्यनुवृत्तौ तु करणं तपरत्वार्थमेव तपरत्वमसंदेहार्थमिति माधवः तन्न ङित्यउरिति पाठेपि संदेहाभावात् ॥ ९० ॥ नात्मात इति च्छेदः येति वर्त्तते त्यविभक्तिकं ना
प्रत्ययस्याऽऽतो लोपो ङिति हसे ईविधानात् परिशेषात् स्वरे लोपः क्रीणंति क्रीणाते नाकिंयाति ङिति किं अक्रीणां आतः किं यतीकारवत् सर्वस्य मा भूत् यदि तु नेति षष्ठी
व्याख्यायते तर्हि हि इत्यत्राऽर्थे स्यषष्ठ्यर्थमिहैव कृतं आत इति षष्ठी व्याख्यानक्लेशो मा भूत् ॥ ९१ ॥ नाप्रत्ययस्याऽऽत ईः स्यात् ङिति हसे क्रीणीतः क्रीणीहि ङिति किं क्री
णासि हसे किं क्रीणांतु नाकिं याति ॥ ९२ ॥ दे इत्युच्चारणे स्तो अस्येति दिदरसा दे वज्ञापकान्मत्वर्थीयः इः यस्य लोपः यद्वा द्विर्वचनमस्यास्तीति मत्वर्थीय इः अव्ययस्या
नद्दितपरस्य स्योः टिलोपः इति टिलोपः कृत्वोर्थसुप्रत्ययांतस्याऽप्यव्ययत्वात् एतस्य वचनस्य सत्वे यं च निर्देशो लिंगं वह्निर्भवो वा ह्यः सौवः इत्यादीनि च सिध्यंति यद्वा ॥

॥ ङित्यदुः ॥ ९० ॥ नातः ॥ ९१ ॥ ईहसे ॥ ९२ ॥ दे सो ॥ ९३ ॥ नमसोऽस्य ॥ ९४ ॥

द्विरुक्तमि ति दिङिनकरणोस्तनस्य टिलोपः औणादिके इप्रत्यये टिलोपः यद्वा द्वोकयोरित्यत्रैव संख्यामात्रवचनो द्विशब्दोस्तीति संख्येयार्थ इत्युक्तोके चिदिति स्यात् तस्य तमत्वर्थलक्षणया द्वित्ववा
न् धातुर्गृह्यते द्वित्वं चोच्चारणं विना न संभवतीति तदाक्षिप्यते त्यदाद्यत्वं तु न भवति गौणत्वात् द्विरुच्चारितस्य धातोरातः ईलोपौ ङिति मिमीते मिमते जिहीते जिहते दे किं वा नः वांति
ङिति किं जहाति अजहाम् धातोः किं हाहौ माधवस्तु द्वे रूपे विद्येते यस्यासौ द्वित्वस्तस्मात् हेरिति सहादेरिति द्विमत् शब्दस्याऽस्यर्थेमत्वंतस्याऽत एव लिंगात् द्विमादेश इत्याह यत्तु य
था शुक्लो गुणवान् शुक्ल इति शुक्लवत् शब्दस्य शुक्लादेश इत्याह तन्न अभेदोपचारेण अइकावितिअप्रत्ययेन वा सिद्धत्वात् तावितिकिमर्थं ईलोपयोरनुवृत्तेः सत्वान्नैवं अनंतर
त्वादीरनुवर्तेत नलोपः ननु तर्हि द्वे इति पाठ्यं अनंतरत्वादीश्चा लोपोऽनुवर्त्तते नैवं ङिति हसे लोपः ङिति स्वरे ईरिति विपर्ययस्यापि संभवात् ताविति तु केतुयाद्दशो पूर्वत्र दृष्टौ
तावेवात्रस्त इति न दोषः ॥ ९३ ॥ नम च अस च अनयोः समाहारो नमसं तस्य नमिति प्रत्ययो गृह्यते प्रतिपदोक्तत्वात् तथा तु लाक्षणिकत्वात्तस्य हि आदेः सः स्म इति कृते नमि

तिरूपं प्रतिपदोक्तंशीघ्रंवुद्ध्यारूढंभवतिलाक्षणिकंतुलक्षणानुस्मरणद्वारेणेति विलंवोपस्थितकत्वान्नगृह्यते प्रत्ययाऽप्रत्यययोर्ग्रहणेसंभवति सतिप्रत्ययग्र
हणस्यन्याय्यत्वात् तस्यप्राधान्यात् असितिप्रत्ययऔणादिकोनगृह्यते उणादीनांतुक्वचिद्व्युत्पत्तिकार्याऽभावात् अतएवकंसेनपयइतिनभवति धातुरपिअ
सदीप्तौअसुक्षेपणेनगृह्यते विकरणाव्यवधानेनङित्परत्वाभावात्नमोविकरणस्यङितोऽसंभवात् यथानिवादेर्ङितोग्रहणंनवाऽसधातोरथेनादर्शोऽसभु
वेव नन्वस्तेरपिकथंग्रहणंलुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैवस्वीकारादितिचेन्नएतद्वचनस्यन्यायस्यवात्राभावात् असेर्वसाक्षाड्ङित्परत्वसंभवाच्च
यद्वा अस्तेरीडित्यत्र अस्तेरित्यऽनुवर्त्यअस्तेरितिरूपस्यप्रकृतिभूतेयोऽस्तितिव्याख्यानात् माधवस्तु ननुकिमयंनमितिनत्यर्थोधातुर्गृह्यतेविकरणोवायुक्तंतत्रा
स्तिधातुसाहचर्याद्धातुग्रहणमितितन्न असधातोर्ग्रहणमितिनिर्णयाऽभावात् असप्रत्ययग्रहणस्याऽपिसंभवात् यदपिसत्यं अस्तेस्तुनपिभ्वादेशेनप्रयोगाभावा
द्विषयोविभक्तिचतुष्टयमस्यसूत्रस्यनिमित्तमनुमीयतेइत्युक्तं तदपिन भविताभविष्यतिइत्यादौस्यानिवद्भावेनास्तित्वादऽकारस्यचश्रूयमाणत्वात् शास्त्रप्रवृत्ति
संभवात् ङित्परत्वाभावादितिवक्तुंयुक्तत्वात् णवादियादाद्योःकित्वंनङित्वंसिस्योस्तुनादिपर्युदासात् नङित्वंसपक्षुपितात् यदपिनचात्रङित्यनंतरेणमतिःसंभव
तिअथाव्यवधानात् नमंतीत्यादावप्यड्लोपस्यतद्भावात्तद्वस्थमेवव्यवधानमित्युक्तं एवमेवास्तेरपिवक्तुमुचितं यदपिनापिपेननाव्यवधानमितिन्यायस्या
प्ययंविषयः वचनस्यविकरणग्रहणेनापिचरितार्थत्वादित्युक्तं तदपिन धातुग्रहणहेतुत्वेनोक्तस्यसाहचर्यस्याऽदूषितत्वात् प्रत्ययग्रहणेहेतोरप्रतिपादनाच्च य
दपिन चात्रापिधात्वक्षरेणव्यवायइत्याशंक्यं विधिकालेएवमस्येत्संज्ञातःप्रागऽलोपात् पश्चाच्चमित्वेनान्त्यस्वरात्परत्वमित्युक्तं तदपिन विधिकालेइत्यस्यसूत्रेस्वे राम
त्यर्थः प्रयोगेवा नाद्यःसूत्रेङित्परत्वासंभवात् मस्येत्संज्ञातःप्रागड्लोपविधानेमकारव्यवस्थानस्याऽपरिहरणीयत्वाच्चनांत्यःमस्येत्संज्ञाभावेनान्त्यस्वरात्परत्वाऽसंभ १२
वात् धातोःपरत्वप्रसंगात् अक्षरेणान्त्यस्यमं गतंहसहितस्यस्वरस्याक्षरत्वांगीकारात्द्वात्रिंशदक्षराअनुष्टुविति व्यवहारात् धातुवर्णेनेतिवक्तुंयुक्तत्वाच्च यद
पिसूत्रेप्येवंनमसइतिमकारनिर्देशउपपद्यते अन्यथानासइत्येववाच्यंस्यादित्युक्तं तदपिननासधातोर्ग्रहणप्रसंगात् किंचधानायेइत्यादौनाप्रत्ययाऽकारस्यापि
लोपप्रसंगात् नआसइतिच्छेदेनआसेःपरस्यनसनस्यासीनायेत्यादौअड्लोपस्यसंभवात् रुंधःरुंधंति सःसंतितमसः किंभवतः अपोनलोपःङितिकिं रुणद्धिअसि

अस्यकिं अस्तेरंत्यस्यमाभूत् अत्राऽस्येतिचिंत्यं नानइत्यत्रनासेतिपठितुंयुक्तं असेस्पसोनरत्त्रानुवृत्तिसंभवात् एवंचधात्ववयवेनव्यवधानात्तस्मिन्नेकमतमोङि·न्पर
त्वमेवं नमः ङि·न्परत्वाऽविवक्षणाच्चमः प्रकृतिभूतस्यधातोर्ङि·त्परत्वस्याविवक्षणात् धातोर्ङि·तिपरेइतिदिक् ॥ ६४ ॥ असग्रहणमनुवर्तनेननस संज्ञाराभावात् लिः स
स्यलोपः सकारे असि व्यतिसे अतौर्वाहेरित्यतोहेरित्यनुवर्तनेशब्दाधिकारश्चाऽयं हएरितिच्छेदः असेरेकारसंबंधिनःसस्यहःस्यादितिवाक्यभेदेनव्याख्येयं एकार
संबंधश्चतत्तोव्यवहितपूर्वत्वेनेनव्यतिहेइतिसिद्धं अस्तेः किंवसेसिकिं असि सःकिं असमाभूत् नचाऽस्यपूर्वेणैवसिद्धःमित्यसिद्धत्वादितिदिक् ॥ ६५ ॥ अति अंते अंतुअं
तां अंतेत्येतेषांपंचानांटिंविहायप्राग्भावस्यानुकरणं आदितितुअंत्यानांनवानांसंज्ञेत्युक्तं आत् संबंधिनोऽनकारात् परस्यांतोऽज्ञवति रुंधते सुन्वतांआतःकिंयुवंति॥
अंतःकिं रुंधातां अनतःकिं सधंते नपरःकिंगाते गा अअंतेइतिस्थितेप्रकृत्यामहांनरंगत्वादयः सवर्णेदीर्घः पश्चादत् अनतइतिपर्युदासोलाघवात् प्रसज्यप्रतिषेधे
त्वनन्वितत्समासोवाक्यभेदश्चाऽऽश्रितःस्यात् ॥ ६६ ॥ पूर्ववत्प्रक्रियाद्विरुक्ताद्धातोःपरस्यांतोऽज्ञवतिपार्थमिदं आतितुपूर्वेणसिद्धं जुह्वति जहति नेनिजति द्वेः।

॥ सिसः ॥ ६५ ॥ आतोऽतो दनतः ॥ ६६ ॥ द्वेः ॥ ६७ ॥ अनउस ॥ ६८ ॥ स्याविदः ॥ ६९ ॥

किंयुवंति अंतःकिंजुहुतः ॥ ६७ ॥ द्विरुक्तात्परस्याऽनउसभवति अजुहवुः अनेनिजुः द्विरुक्तात्किं अभुवन् अनःकिं अजुहवं उसित्यावर्तनीयं लोप आतइतिचाऽनु
वर्तनीयं उस्याकारस्यलोपः अदुः अधुः ॥ ६८ ॥ सिश्चआश्चविच्चएषांसमाहारःस्याविदतस्मात् अत्रवाक्यत्रयं सेरित्याऽऽद्यंवाक्यंतत्रसिप्रत्ययोगृह्यतेप्रत्ययाऽप्रत्यययो
रितिन्यायात् विकरणाव्यवधानाद्धातोःपरस्याऽनोऽसंभवाच्च अचैतिषुः अत्राऽसेरित्यनुवृत्यविद्यमानात्सेरितिव्याख्यानान्नेह अभूवन् प्रत्ययलक्षणेनसेःपरत्वात्तिः
सेर्यकं अनन्वत अनःकिं अचैतिष्टां आद्इतिद्वितीयंवाक्यं आकारात्परस्याऽनउस् अदुः यदित्वत्रवाक्येसिग्रहणमनुवर्ततेसेः आकाराच्चपरस्याऽनउस् प्रत्ययलक्षणेनसेः
परत्वंश्रुत्याचाऽऽकारात्परत्वंतदेदंनियमार्थंभवतिप्रत्ययलक्षणेनसेःपरस्यपदिभवतितर्ह्यादंतादेवेति अत्रपक्षेऽनयनतेनेनभवतिप्रथमवाक्यरीत्यातुभवतीतेनविकः
ल्पःफलितः अपुः अपान् चेत्यनुवृत्त्याद्विषोऽपिसंग्रहः अद्विषुः अद्विषन् आतःकिं अदुहन् अनःकिं अदान् विदइतितृतीयंवाक्यंविदेःपरस्याऽनउस् अविदुःभूत

वै·प्रा· नात्रेतुसेरित्यनेनैव सिद्धं पुनः विद्ग्रहणं अनद्यतनेऽप्यनउस् विधानार्थम् विदेः किं अदिहन् अनः किं अवेदं अत्रसिविदः इति सूत्रणीयं ततआत इति सूत्रणीयं ततो
त·भा· णलु विति इत्यं चाकारग्रहणं न कर्तव्यमिति लाघवं एवंकृतो नकृतमिति चिंत्यं॥ ६९॥ आत इत्यनेन धातोर्विशेषणात्तदंतविधिः आदंताद्धाऽऽकाररूपाच्च धातोः परो णलौ
१८ भवति ददौ ओ अद्वा चचारेति विग्रहे अणविति स्थिते अस्य द्वित्वं आद्गुणे रित्यात्वं सवर्णदीर्घः अनेन औ आतः किं निनाय नपरः किं कद्वा चचार चक आदित्यु
केतु स्यात् अत्र आइति पंचमीनिर्देशो युक्तो व्यर्थस्ततः चकेत्यादौ यदि परत्वाद्धो पस्तदाऽऽदिति निर्देशेऽपि नक्षतिः णपृ किं ददाथ अ ओ इत्येवास्तु नर्हि मध्यमपुरुषवहु
वचनेऽप्येवं स्यात् निरनुबंधकग्रहणे न सानुबंधकस्येति न्यायात् तर्हि णा इत्येवाऽस्तु नर्हि ज्वलादेर्णप्रत्यये अवश्यायः अवसाय इत्यादावेव स्यात् सकानुबंधग्रहणे न
ध्यनुबंधकस्येति न्यायात् तर्हि अविन्येवास्तु न च मा नेद्दत्यादावेव स्यात् णा अने इति स्थिते अपः सवर्णदीर्घे जायते सकानुबंधकन्यायात् अतो णविनुक्तं न च पकारा
दन्येन द्वितीयाऽनुबंधेन सिद्धिः उत्तमपुरुषे णित्वाभावे किन्त्वार्यप्रसंगात् चकरेत्यादौ च केत्यादि स्यात् अथ उकारः किमर्थं औरेव विधीयतां आविति कृते आतो युक्

॥ आतो णलौ ॥ ७० ॥ आदनुदात्तङितः ॥ ७१ ॥ ॥

प्रसंगः न च णित्वाभावान्नमः स्यानिवद्भावा त्स्या निवर्तेचेदं उग्रहणमपि ज्ञापकं इत्थं आतो युगिति सूत्रे चिण्कृतोरिति व्यर्थं तस्मिन्नेव सूत्रे औ णत स्याडित्वेनैव सिद्धं।
त्वात् ॥ ७० ॥ अनुदात्तश्च ङ् चानुदात्तङौ तौ इतौ यस्य धातोः सोऽनुदात्तङित् तस्मात् द्वंद्वांते श्रूयमाण इत्शब्दः प्रत्येकमभिसंबध्यते यत्तु माधवः निर्देशस्य सौत्रत्वाद।
ल्पस्वरस्याऽपि ङ शब्दस्य परनिपात इत्याह तन्न ङ सहसांतत्वात् स्वरांतत्वेनुएत्वेऽनुदात्तङेत इति स्यात् स्वरितेत इतिवत् द्वयोः स्वरांतयोर्मध्येऽल्पस्वरस्य ग्रहणात् एपा राम
यन णित्यादि ज्ञापकसिद्धं हि तत् ज्ञापकसिद्धं न सर्वत्रेति देव ते दमर्थे इत्यादिना च तस्यानित्यत्व अनुदात्तेतो ङितश्च धातोः यान् एधते शेते अनुदात्तङित इति किं भवति १८
अन्यपदार्थत्वे न धातोराश्रयणं किं अगमत् अशिश्रियत् ङः ङोर्डित्वेऽपि धातुत्वाऽभावादत्र यत्तु माधवः न चैवं यङं तादपि न स्यादिति वाच्यं ङित्स्य यङि कृतार्थत्वेनाऽस
मुदायार्थत्वात् अवयवे हि चरितार्थं लिंगं समुदायस्य विशेषकं न भवतीत्याह तन्न यङं तस्याऽपि धातुत्वेन पूर्वपक्षस्योक्तिसंभवाभावात् यदपि एवं तर्हि प्रायो विवक्षया धा

गोरित्युक्त मित्युक्तम् तदपि न यङ्‌ः तस्य धातुत्वेन आयो विवक्षयेत्यस्य असंभवात् यदपि ङा ऽङोस्तु परस्मैपदप्रत्ययनं न रप्रवृत्ते नङित्वेन ङित्वेपि आत्मनेपदं न भवतीत्युक्तं तदपि न ङोऽङोऽर्थानुत्वाभावेन तदंतादात्नः आप्तेरेवा ऽभावात् यदपि सूत्रे चा ऽऽदिति नामैकदेशेना ऽपि सर्वनामलक्ष्यते भामासत्यभामा भीमो भीमसेन इति यथेत्युक्तं तदपि न आत्शब्दयोरेव संज्ञात्वेन विधानात् तयोरेव सर्वत्रा ऽऽवृत्तिदर्शनात् आत्मनेपदपरस्मैपदशब्दयोः क्वचिदप्य ऽदर्शनाच्च दृष्टांतो ऽपि विषमः भीमभीमसेनशब्दयोर्द्वयोरपि पृथक्संज्ञात्वेन दिनियोगात् समुदायस्य विनियोगे पिपूर्वान रपदयोर्लोपविधानाच्च यद्यपि अनुदात्तङित आदिति वक्तुं युक्तं लाघवाद्धि ये यस्य पश्चाद्ग्रहणस्य युक्तत्वाच्च तथापि योगविभागार्थं विपरीत ग्रहणं धातोः क्वचिदाङ्‌ वति कोत्वा नीते मुंडो भीषयते इत्यादि सिद्धं अथ किमर्थमिदमारभ्यते वर्तमाने तिविन्यादिना दश विधा आख्यातानि विहितान्येव तेषामाङ्‌ वीत्यादिना ऽर्था अयुक्ता एवेति चेत् उच्यते आङ्‌ वीत्यादिना ऽऽख्यातानामर्थनियमः कृतः धातुमात्राद्भावकर्मणोरादेवेति तेन धातोर्भावकर्मणोः पंतेत्यर्थनियमः सिद्धः कर्तरि पंचेत्यनेन कर्त्रभिप्राये विहिते तत्र किं धातुमात्रात् कर्तरि ते भवतः किं वा कस्माच्चिदिति संदेहः तत्र प्रकृतिनियमार्थं यं चतुः॥

॥ निविशादेः॥ ७२॥ ञि त्स्वरिते तउभे॥ ७३॥ ॥

ऽत्या ऽऽरभ्यते अनुदात्तङित आदेवेति निविशादेरादेवेति यत एव कारस्ततो ऽन्यत्रा ऽवधारणमिति प्रकृतिनियमः फलितो भवति तेनैभ्यः पंत॥ ७१॥ निपूर्वो विशः तेः पर इति वा विशेरयत्युच्चारणार्थः निविश आदिर्यस्य तस्मात् असंदेहार्थं वा पदकार्यस्य वारणमन्यथा निविशादेरित्युक्ते विशिरित्युक्तो विडभेदनइति वा संदेहः स्यात् आदिशब्दः प्रकारे तेन निविशप्रकाराणि विशसदृशा उपसर्गपूर्वा धातवो गृह्यंते यद्वा स्याद्वा चिग्रहणं तु न निविशादिगणाभावात् विविशते अत्र निरुपसर्गग्रहणे धातोः पूर्वोच्चारणात् नेह नयति यत्कुलं तन्निविशति विजयते नेह वेति यत्कुलं तत् विजयति पराजयते नेह पराजयं निदूरामानो त्वमाः परः आदत्ते नेह आयच्छति आयाति आनतीति अतेरुः अः स्त्रियामपि आशक्तिरर्दरानिवाक्यस्मरणयोर्वा ऽऽकारः अनुक्रीडते संक्रीडते नेह वालमनुक्रीडति वालेन सह क्रीडतीत्यर्थः॥ ७२॥ ञ इत्‌ यस्य स ञित स्वरित इत्‌ यस्य स स्वरितेत् ञिच्च स्वरितेच्चा ऽनयोः समाहारः ञित् स्वरितेत् तस्मात् उभे पदे आतु सन्निहितमेव पंतु गिरित्येद इत्यतः परामृश्यते यद्वा आदित्यनेनैव

वे॰ व्या॰ पमाश्रित्य परस्य पूर्वापेक्षत्वात् पूर्वाण्येव पंसंज्ञानीत्याश्रित्यंते माधवस्तु क्रमस्तु न भवति ञित आत्मनेपदं स्वरितेतः परस्मैपदमिति सूत्रारंभसामर्थ्यात् अन्यथा
स॰ भा॰ हि ञितोऽत्रः स्थाने ङकारोपदेशेन ङित इत्येव सिद्धमात्मनेपदं स्वरितेत स्तु परत्वोऽन्यदित्येव परस्मैपदमपि सिद्धं किमस्यारंभेण यदि तु ञितां पं स्वरितेत आदितिक्र
१९ म उच्यते तर्हि ञितोऽसकारस्यागेन पेत्सिद्धेः स्वरितेनामनुदात्तेत्व पाठेनापि सिद्धे किं सूत्रे णेत्याह इदं चार्थसाम्यपक्षे उक्तं उभयशब्दस्य द्व्यर्थाभिधायित्वात् शब्दतः
साम्यपक्षे तु यथासंख्याप्राप्तिरेव नास्ति उभे इत्येकः शब्दः ञित्स्वरितेत इति द्वौ यद्वा नाऽत्र यथासंख्यवचनमस्ति किंतु ज्ञापकसिद्धं ज्ञापकसिद्धं न सर्वत्रेति न
भविष्यति यद्वा सूत्रेणोपस्थितस्य क्रमस्य बाधकं विना बाधो न युक्तोऽत्र तुल्यस्यासिद्धिवाधात्यज्यते अत्र चाऽनुबंधद्वयं त्याज्यं एकेनैव निर्वाहात् ञितोऽपि स्वरि
तेत एव पाठ्याः स्वरितेत उभ इति च सूत्रणीयमिति चेन्न डुकृञित्यस्य स्थाने डुकृञ इत्यादिपाठे गौरवप्रसंगात् तर्हि स्वरितेतोऽपि ञित एव पाठ्या ञितउभे इति सूत्र
णीयमिति चेन्न रुधिरित्यादौ रुधिर् ञत तु ञ इति पाठे गौरवप्रसंगात् न च विरिति त्यक्तुं शक्यः ङार्थं तस्याऽवश्यकत्वात् उकारश्च उदितो वेति इड्विकल्पार्थः आव
श्यकः एवं पूर्वसूत्रेपि ङितोऽनुदात्ता न पठितुं शक्याः शीङित्यादौ शीञ् इत्यादिपाठे गौरवप्रसंगात् न चानुदात्ता ङितः पाठ्याः एधङित्यादौ गौरवात् अकारस्यो
च्चारणार्थस्याऽवश्यकत्वात् न चाऽकारेण पाठ्य एधङित्येव पाठ्यं एवं तर्हि ङित्वेनेव सिद्धे यदनुदात्तेत्वं करोति तद् ज्ञापयत्यस्ति चेहानुदात्तेत्व प्रयुक्तं कार्यं तरम
पि नत्वानुदात्तेत श्चह सादेर्युः शीलेदिति तेन विचक्षणादित्यादि सिद्धं चक्षिङोऽनुदात्तेत्वात् न चैवं चक्षिङो ङित्त्वं व्यर्थं अनुदात्तेत प्रयुक्तं कार्यमनित्यमिति ज्ञापनार्थ
त्वात् तेनाऽपगनावित्यादेरपतीत्यादि सिद्धं कश्चित्तु चक्षिङित्यत्रेकारविशिष्टः पाठः सोऽयुक्तः नुमप्रसंगात् न चानेदितोऽनुम्विधीयते इदित इत्यत्रानग्रहणाऽभा
वात् गृहीतेवानस्मिन्निर्नोन्यत्वसंभवात् आदुच्चारणेऽगेइति पाठे तु गौरवदोषः अतोऽकारविशिष्ट एव पाठो युक्तः अत्र चाऽनुदात्तङित इति वत् स्वरितञित इतिपा राम
ठे युक्तो लाघवात् अत्र माधवः आत्यशब्दाभ्यामवयवाभ्यामात्मनेपद परस्मैपद संज्ञे गृह्येते ते चाऽन्वर्थे आत्मने कर्त्रे फलबोधकं पदमात्मनेपदं परस्मै कर्त्रे फलबोध १९
कं पदं परस्मैपदं तेन कर्तृगामिनि फले आत्मनेपदं परगामिनि फले परस्मैपदमित्याह तन्न उभयग्रहणवैयर्थ्यप्रसंगात् यथाहि ञित्स्वरितेत एतावदेव सूत्रमस्तु आ
दिति चाऽनुवर्तनीयं तेन कर्तृगामिनि क्रियाफले आत्मनेपदं अन्यत्र परतोऽन्यदिति परस्मैपदं किमुभयग्रहणेन परत इति तस्य निर्देशोऽर्थद्वयसंग्रहार्थः परस्माद्भातोः

परस्मिश्चार्थे इति अन्यथा परादित्येव ब्रूयात् किं तस्माऽन्वर्थता च परेषामपि न सम्मता स्वरितञितः कर्त्रभिप्राये क्रियाफले इत्याहुः अन्यथाऽन्वर्थत्वादेव तस्मिंस्तद्बोधो।
किं कर्त्रभिप्राये क्रियाफले इत्यनेन न च क्रियाफलस्य कर्तृगामित्वं शाब्दबोधे भासते पचतीत्यस्य हि एकाश्रितो विक्लित्त्यनुकूलो व्यापार इति हि बोधः न चाऽत्र फलस्य
कर्तृगामित्वं परगामित्वं वावगम्यते न संभवत्यपि तत् करोति कुरुते वा घटमित्यत्र घटनिर्माणफलस्य कुलालादन्यगामित्वस्याऽसंभवात् एवं सृष्टिं चकार चक्रे
वा ईश्वर इत्यत्र जगन्निर्माणफलस्येश्वरेऽसंभवाच्च नन्वेवं यष्टा यजते ऋत्विग्यजतीत्यादिप्रयोगव्यवस्था कथमिति चेत् शृणु श्रुतिबलात् तथाहि ज्योतिष्टोमे।
न स्वर्गकामो यजेतेति श्रुत्या यजमाने आत्मनेपदं प्रयुक्तं होता यजतीति श्रुत्या ऋत्विजि परस्मैपदं प्रयुक्तं तदनुयायी लोकोऽपि तथैव प्रयुंक्ते तस्माद्यज्ञोऽन्यत्र पदद्वयं
यथेष्टं प्रयोक्तव्यमिति दिक् ॥ ७३ ॥ परस्मादिति परतः तत्रादिर्विभक्त्यर्थे इति पंचम्यंतात् तसः परादन्यदित्युक्तेऽपि मात्रालाघवं नास्ति परत्वस्य सावधित्वात् अ
वध्यपेक्षायामनुदात्तङित इत्यादयः संबध्यन्ते अन्यत्वस्यापि सापेक्षत्वात् आंदुभेचेति संबध्यते अनुदात्तेतो ङितो निविशादेः ञितः स्वरितेतश्च धातोः परतोऽन्य

॥ परतोऽन्यत् ॥ ७४ ॥ अपित्तादिर्ङित् ॥ ७५ ॥

स्माद्धातोः केवलादात्तः आत्याभ्यां च केवलं तंपं भवतीत्यर्थः भवति अत्ति अनुदात्तेत इत्यादि किं स्पर्द्धते च्यवते अत्राऽनुदात्तेतः ञित्स्वरितेतश्चेत्यनुवर्त्य वाक्यभेदेन तेभ्योऽ
पि पं विधेयं क्वचित् अनुक्तमप्यूहंति पंडितो जनः अनुकरोति पराकरोति अभिक्षिपति परिमृष्यति प्रवहतीत्यादि सिद्धं अत्रेदमवधेयं आङ्यु विकर्मणीत्यस्ति तस्याऽग्रे
कर्तरि पमिति सूत्रणीयं तस्याऽग्रेऽनुदात्तङित इति निविशादेरिति स्वरितञित इति सूत्रणीयं पमिति च न चाऽनुदात्तङितः तङित्यत्र पमित्येवानुवर्तते इति वाच्यं तस्य पूर्वेण
प्राप्तस्य पस्याऽपवादत्वात् स्वरितेत्यत्र तु आत्येऽनुवर्तते न च पमात्रमेवानुवर्ततां तिवाच्यं सूत्रारंभस्य वैयर्थ्यप्रसंगात् कर्तरीत्यनेनैव तस्य सिद्धत्वात् न चाऽऽदित्येवानुवर्तेत
सूत्रारंभस्य वैयर्थ्यप्रसंगात् स्वरितञितामपि अनुदात्तेत्वस्य सुपरत्वात् पमित्यनेनैव हतीत्यादि सिद्धं एवं च कारग्रहणमाद्ग्रहणमुभे ग्रहणे न कर्तव्ये भवतीति कुतो
न कर्तव्यमिति चिंत्यमिति दिक् ॥ ७४ ॥ पङ् न पस्य सपित् ता आदिर्यस्य स तादिः पित्त्वतादिश्च पित्तादी ताभ्यामन्योऽपित्तादिः नञीति समासः ङिन्न ङिद्वदित्यर्थः अङित् ङि ॥

चं·श्रा· दित्याह ङिद्वदिति गम्यते अब्रह्मदत्तं ब्रह्मदत्त इत्याह ब्रह्मदत्तवदिति गम्यते यथा अत्र पर्युदासबलात् पित्तादिभिन्नः प्रत्ययएव गृह्यते न धातुः तेन दैप्दाप्रतिपत्तप
ल·भा· भिन्नस्य धातोर्ङित्वं न सति ङित्वे आत्स्यात् यद्वा एधशीङादेरनुदात्तेत्त्वङित्वकरणान्न धातोर्ग्रहः अन्यथाऽस्मादेव ङित्वादात्मसिद्धे किं ङित्वादिना ननु ङिदितिम
२० स्तु किदिति पाठ्यं उत्तरसूत्रेण कर्तव्यमिति लाघवं गुणादिनिषेधस्तूभयत्र तुल्य इति चेन्न स्वपितः वक्ता इत्यत्र यजादित्वात्किति संप्रसारणप्रसंगात् कुरुत इत्य
त्र ङित्यद्वुपित्स्याप्रसंगात् अन्यथा च ऋतुरित्यादावतिप्रसंगात् कुरुत इत्यत्रैवोभयथ्यवधानसत्वात् नन्वत्रादिग्रहणं व्यर्थं अपित्तादिर्ङिदित्येव युक्तं सिसत्तासी
त्यत्रैव नवानां ग्रहणं भविष्यति न च सिस्योर्ग्रहणार्थं तदिति वाच्यं सिस्योरिति लिंगात्तयोर्ङित्वाभावात् एवं तर्ह्युत्तरार्थं तत् अपिदित्यऽयं पर्युदासो न त्रञ् नञोत्क
मनित्यमिति स्वीकारात् स चाऽनित्यः ततश्च कुटादेः कुड़ ताप्यरः ञित् णिङ्विन्नः प्रत्ययो ङित् विजेः परइडादिः प्रत्ययो ङिद्भवति ऊर्णोः परइडादिर्वा उद्विजिता कु
टिष्यति ऊर्णुवीत् ऊर्णुवीदित्यादि सिद्धं ननु तत्रादिर्यस्येति कुतो न विग्रहः मैवं व्याख्यानाऽनुसारात् लक्ष्यानुसाराद्व्याकरणं न राऽनुसरणाच्च किं च तत्शब्देन वि
ग्रहे तिप्तनपोरऽनुवाददोषः स्यात् पित्वेन सिद्धत्वात् नाशब्देन विग्रहे तु नायं दोषः अथ सादेः कृतां चाऽनेन ङित्वं कुतो नेति चेन्नैवं यङ् नङोर्ङित्करणात्ज्ञापकात्
नानिदिति सूत्राऽऽरंभाच्च अतः परिशेषात् तिवादीनां चतुर्विधानामाख्यातानां तद्धितकरणानां चानेन ङित्वं नान्येषां तेन विभराञ्चकारेत्यादावाम्नोन यत्तु माधवः
अपितादिरिति तदन्यार्थेन नञा समासः अत एव च प्रसज्यप्रतिषेधान्नञोऽपथ्येऽन संबंध इत्याह तन्न परस्परविरोधात् यद्यऽन्यार्थे नञ् तर्ह्युत्तरपदेन संबंधो न क्रि एम
यया यदि प्रसज्यप्रतिषेधे नञ् तर्हि क्रियया संबंधो नोत्तरपदेन यदपि ङित्पिन्न भवति पिच्च ङिन्न भवतीत्यर्थात् ब्रूनाह्ववानित्यत्र तातङि स्थानिवद्भावप्राप्तपित्वनि २०
षेधात् पिदाश्रयोऽवादाविनीपन्न भवतीत्याह तदपि न तातङः ङित्वस्य तद्वद्भावेन लभ्यस्य ज्ञापकसिद्धं न सर्वत्रेत्यनित्यत्वादत्रानंगीकारात् किं च तातङो ङित्वस्याऽ
नन्यार्थस्य सत्वे न तद्विरुद्धस्यापित्वस्याऽप्रवृत्तेः अतिदेशो हि उपदेशविरुद्धं स्वकार्यं न प्रवर्तयति यथा क्षत्रिये ब्राह्मणकार्यातिदेशः क्षत्रियकार्यं न निवर्तयति किं
च तातङो ङित्वेऽनुपयर्थमेव होत्वनेनाऽतिदेशेन सिद्धं तत्कथं तत्रापित्कार्यप्रवृत्तिसंहत्तेनेति दिक्॥ ७५॥

ण आदिर्यस्याऽष्टादशात्मकस्य समुदायस्य स णादिः कित् किद्वत् पूर्ववदतिदेशोऽयं पूर्वसूत्रादादिग्रहणमनुवर्त्य वा कार्यभेदेन व्याख्येयं णाद्यादिः किदिति तेन पादा देऽपि कित्वं सिद्धं न च सीष्टादावतिप्रसंगः शंक्यः सिस्योरिति ज्ञापकात् ननु किद्ग्रहणं किमर्थं पूर्वसूत्रात् ङिदित्यनुवृत्तिसत्त्वात् मैवं ईजतुरित्यादौ संप्रसारणाऽभाव प्रसंगात् चक्रतुरित्यादौ ङित्त्वे दुरित्युक्तापत्तेश्च अथ णादिग्रहणे न ज्वलादेर्णादित्यादयः कुतो न गृह्यन्ते मैवं क्नुक्नियोः कित्त्ववैयर्थ्यप्रसंगात् बभूविथ बभूवेत्यत्र पित्त्वा त् कित्त्वाऽभावेऽपि न क्षतिः प्रतिपदोक्तेन वुकागुणस्य बाधो वा बाधसंभवात् ननु ऋदुपधानां कित्त्वात्परत्वाद्गुणः स्यात् मैवं प्रत्ययमात्रापेक्षत्वेन कित्त्वस्यान्तरंगत्वात् धातुल घूनाद्युपधापेक्षत्वेन गुणस्य बहिरंगत्वात् प्रायशो दृश्यतामिहेति कित्त्वेन गुणस्य बाधसंभवाच्च ईजतुः जुहुवतुः णादिः किं स्वप्यात् अपि किं इयष्ठ पादादौ इ ज्यात् अत्र केचित् णादिरिति योगं विभज्यादिशब्दं च प्रकारार्थमाश्रित्य ङिदिति चाऽनुवर्त्याऽन्येषामपि प्रत्ययानां ङित्त्वविधायकं दितेनत्यादि सिद्धमित्याहुः ॥ ७६ ॥ ऋ ऋच्च संयोगश्च ऋत्संयोगं तस्मात् णादिः किन्न जजरतुः शशरतुः ममंथतुः वव्रश्चतुः णादिः किं मथ्यात् शीर्यात् ऋत्संयोगात् किं ऊदतुः ऊयतुः केचिदत्र अर्तिप्र

॥ णादिः कित् ॥ ७६ ॥ ऋत्संयोगान्न ॥ ७७ ॥ न क्वा सेट् ॥ ७८ ॥

श्लिष्यंति ऋ अतुरिति स्थिते अकित्त्वाद्गुणे कृते द्वित्वे च आरतुरित्यादि सिद्धमित्याहुः अन्ये त्वर्तिर्न प्रश्लेष्यः ऋ अतुरिति स्थिते द्वित्वे उरदत्वे ऋ अरित्यस्थिते कृते ना स्य पूर्ववद्ग्रहणेन ग्रहणादाभ्योरित्याकारे सिद्धमारतुरित्याहुः अत्रादिग्रहणमनुवर्त्य तेनेण द्वितीयोऽपि वाक्यार्थः कर्त्तव्यः ऋदन्तात्संयोगादेर्णादिर्न कित् सस्मरतुः जह्वरतुरित्यादि सिद्धं अनेकमनित्यमिति शश्रतुः दद्रतुरित्यपि अत्र ऋहसादिति सूत्रयितुमुचितं न त्र ऋच्च हसौ च ऋहसं तस्मात् एवं संयोगान्तस्य लोप इत्यत्रापि ह सान्तस्य लोप इति सूत्रयितुमुचितं हसावन्ते यस्येति विग्रहः ॥ ७७ ॥ सेट् क्वा किन्न कित्कार्यं न करोतीत्यर्थः देवित्वा पवित्वा क्वा किं ईजिव ऊविम सेट् किं मुक्त्वा गत्वा नेत्यनु वर्त्य वा कार्यभेदेन व्याख्येयं सेट् क्वा किन्न क्वचित् भवतीत्यर्थः द्युतित्वा द्योतित्वा रुचित्वा रोचित्वा वचित्वा वंचित्वा लुचित्वा लुंचित्वा इत्यादि सिद्धं क्त्वा क्त इति क्तवत्वेकदेशस्या ऽप्युपलक्षणं यद्वा क्त्वा इत्यनेन क्तोऽपि गृह्यते न च अर्थवद्ग्रहणेन नानर्थकस्येति क्तवतो ग्रहणं नेति वाच्यं तस्या अनित्यत्वस्य बहुश आवेदितत्वात् अत्र क्त्वाग्रहणेन कित्।

कं॰आ॰ त्तशब्दस्यग्रहणं विवक्षितं तेन तत्रापि गृह्यते सेट्कोवा किन्न भवति विकल्पश्चायं व्यवस्थितः तेन शीङ् स्विदि स्विदि मिदि धृषमृषिभ्यो नित्यमकित् अन्येभ्यो वाश
ल॰भा॰ यितः शयितवान् स्वेदितः स्वेदितवान् क्ष्वेदितः क्ष्वेदितवान् धर्षितः धर्षितवान् मर्षितः मर्षितवान् रुचितः रोचितः द्युतितं द्योतितमित्यादिः क्तः किं रुरु
२१ चिषे सेट् किं गतं ॥ ७८॥ अतिशायनमतिशयः अतिपूर्वात् शीङो भावे स्वरादइति अच् अपि कर्तृकर्माद्यर्थोप्यतिशयशब्दोऽस्ति तथापि स नेह गृह्यते
कर्तृकर्मणोराख्यातेनोक्तत्वात् करणादेरप्रतीतेश्च अतिशयो द्विविधः पौनःपुन्यं भृशार्थश्च आद्यो यथा कस्यचिद्बहुशो नाऽनेहंडे च जाते लोका आहुरस्य इंडा
तिशयो जातइति तत्र पौनःपुन्यं गम्यते द्वितीयो यथा पूर्वान्महाभागतयाऽति शेषे इत्यत्र भक्त्या पूर्वातिक्रमणं नाम भक्तेर्भृशीभावः भक्त्या भृशोभवसीति गम्यते
सत्त्वाऽतिशयः प्रकृत्यर्थविशेषणाम् अतिशयविशिष्टक्रियावचनादिति एवं चातिशयो यङो द्योत्योऽर्थः भुक्तनरङ्ग्यादौ प्रकर्षस्तरवादेर्यथेति मिश्राएके तु
अतिशयो यङो वाच्योऽर्थः सस्येच्छाययाऽण्णादेरपत्याद्यर्थो यथा स च व्यापारस्य विशेषणाम् विशेष्यो वा क्रियाप्राधान्यस्य धात्वर्थप्रधानस्य वा निर्वाहात् यङन्तस्यापि

॥ अतिशये हसादेर्यङ् द्विश्च ॥ ७९ ॥

धातुत्वात् हस आदिर्यस्य स हसादिस्तस्माद्धातोर्यङ् स्यादेको वाक्यार्थः द्विरित्यपरं वा कं तत्र धातोरित्यनुवर्तते स न यङः प्रकृतिभूतो पाद्यः अदादृष्टेत्यादावसिद्धिप्र
संगात् किंतु यङन्तो धातुर्गृह्यते तत्र हसादेराद्यस्यैकस्वरस्य द्विर्वचनं स्वरादेस्तु द्वितीयस्य चेति तृतीयं वाक्यं अतिशये हसादेर्यङ् द्विर्वचनं सूचि सूत्रि मूत्रिभ्योऽनेन यङ्।
किमर्थमिदं पूर्वेणैव सिद्धत्वादिति चेत् सत्यं नियमार्थमिदं अनेकस्वरेभ्यो यदि भवति तर्हि एभ्य एव तेन जागर्ति दरिद्राति चिकीर्षति इत्यादिभ्यो न तं त्रादिना पूर्ववाक्या
भ्यामपि च शब्दः संबध्यते अतिशये चेति चशब्दस्याऽयं स्वभावो यस्याऽग्रे पठ्यते तेना दृष्टं द्वितीयमुक्तमनुक्तं वा समुच्चिनोति अत्र त्वनुक्तसमुच्चयः गत्यर्थेभ्यः कौटिल्य एव
लुपसदचरजपजभदहदंशगृभ्यो धात्वर्थगर्हायामेव नातिशये हसादिश्चेत्यत्राऽनुक्तं धात्वंतरं समुच्चिनोति अरुपर्त्यश्रुणुभ्यो यङिति निषेधात् दिम्यः कात्यायनसंवादा
त् पापच्यते वदंदैवेत्रः वेदार्थस्य ग्रहणाऽनुकूलः एकचैत्राभिन्नाश्रयको वर्तमानोऽतिशयविशिष्टो व्यापारः व्यापारातिशयो वेति बोधः ब्रह्म जाजायते सुधीः ब्रह्मा स्वयाऽज्ञा

नानहत्यनकूलएकमुबुद्ध्यभिन्नाश्रयकोवर्तमानोऽतिशयविशिष्टोव्यापारः व्यापारातिशयोवेतिबोधः अत एवतेवालः बालाभिन्नाश्रयकोव्क्रगत्यनुकूलोवर्तमा
नोव्यापारः अयेतिस्थिते नञोक्रमनित्यमितिनिषेधाभावाद्गुणोह्यतेर्यशब्दस्यदित्वेहसादिशेषेआतइतिदीर्घेअराय्यते अटाट्यते अशाश्यते ऊर्णोनुरिफंत्यत्का स्म
त्वस्यासिद्धत्वान्नुशब्दस्यद्वित्वेयङीतिगुणः ऊर्णोनूयते सोसूच्यते सोसूत्र्यते मोमूत्र्यते अतिशयेकिंपठति हसादेः किं भृशमीक्षते धातोः किंप्रपठतिभृशं उपसर्ग
विशिष्टान्माभूत् उपसर्गस्यद्वित्वादोषस्यात्तां धातोरेकाचोहलादेः क्रियासमभिहारे यङ् त्यत्रएकाच्ग्रहणंसुत्रात्य सूच्यादिग्रहणस्यनियमार्थत्वसंभवात् अथहला
देरित्यपित्याज्यमघादिग्रहणस्यनियमार्थत्वात् क्रियासमभिहारे इत्यस्यस्थानेऽतिशयेइतिपाठः लाघवात् एकार्थीभावेऽन्वयेतुवृत्तिर्व्यपेक्षायांतुवाक्यमितिव्यवस्थाः
अत्रमिश्राः अथकथंयङंतादात्मनेपदंभवतिकथंचनस्यात् ङितोधातोरात्मनेपदमुच्यते यश्चात्रधातुः नसङित् नचाऽऽयंसमुदायस्यानुबंधः यश्चङित् प्रत्ययोनासौ
धातुः यत्रचावयवेकृतंलिंगमचरितार्थंतत्रसमुदायस्यविशेषकंभवति अयंङकारस्तुवेभिद्यते इत्यादौगुणनिषेधादौचरितार्थः कश्चिदाह क्रियासमभिहारेऽयङ् त्यक
रोऽत्रप्रश्लिष्यतेसचाऽनुदात्तोऽनुनासिकः प्रतिज्ञायतेतत्रानुदात्तत्वमवयवेऽचरितार्थंसमुदायस्यविशेषकंभवति अनुदात्तेतश्चहलादेरितियुच्नभवतियुवंक्रम्येत्या
त्वचंक्रम्यदंद्रम्यग्रहणाल्लिंगादिति सवक्तव्यः अथकथंअतेरीयंङंतादात्मनेपदंभवतिसोपिहिङकारोगुणनिवृत्तौचरितार्थइति सचेत् ब्रूयात् तस्याप्यादितइका
रईकारोवाऽनुदात्तः प्रश्लिष्यतेइति प्रतिब्रूयादितिचेत्नूनइकारेनुमप्रसज्येतईकारेश्वीदितोनिष्ठायामितीणिनिषेधःस्यादिति नैषदोषः नुम्विधौगोःपादांतइति अ
तोऽतग्रहणमनुवर्तते तेनांतेइकारइत्संज्ञकोयेषांतेषांनुम श्वीदितोनिष्ठायामित्यत्राप्येकाचइति अनुवर्तते सत्यं प्रतिविहितमायुष्मतांसुधापुनरयंप्रयासः न
याहि अनुदात्तइत्यत्रधातुग्रहणमस्तितत्तः किंइदं ततोभवतिप्रत्ययमेवङितमाश्रित्यात्मनेपदंसिद्धंभवति नचैवमशिश्रियदवोचदित्यादौचङ् उभ्यामपिप्रसंगः
प्रागेवविकरणेभ्योऽनुदात्तङितइत्येतन्निमित्तंप्रवर्ततेऽन्यथावर्ततेइत्यादौविकरणव्यवधानान्नियमोनस्यात् यथाचप्रागेवविकरणेभ्योऽनुदात्तनियमः
प्रवर्ततेऽत्रवृत्तेतुनियमेभ्योविकरणादितितयात्तत्रैवप्रतिपादितमित्यलमियतेत्याहुः अत्रोच्यते ङितोधातोरित्युक्तेऽत्र प्रष्टव्यं किमत्रनासिधातुत्वंङित्वंवानाद्यः स
नाद्यंताधानवदितिधातुत्वसंभवात् ङित्वस्यश्रूयमाणत्वाच्च यच्चनायंसमुदायस्येतितन्नउभयानुबंधसंभवात् यथासुपःपोरोऽसुपीतिनिर्देशादवयवानुबंधः ॥९॥

सुपनिङे॰ तमिति समुदायानुबंधः तथाङि॰त्वस्याऽप्यऽवयवानुबंधत्वाद्गुणनिषेधादिकार्यं समुदायानुबंधत्वादात्मनेपदं च सेत्स्यतीयत्वयं ङ॰कारस्त्विति तन्न गि।
त्वेनापि तन्सिद्धेः ङ्कि तीत्यत्र गकारप्रश्लेषात् नचग्रहादेः संप्रसारणार्थे ङि॰त्वंस्यात् तत्रापि गकारप्रश्लेषान्नयरोऽनुनासिक इति ङ॰कारे कृते मान्यत्वेन हलोयो
यमामिति लोपात् यद्वा मगयोः संयोगसंज्ञामाश्रित्य संयोगांतलोपसंभवात् अंतर्वर्तिन्याविभक्त्यापदत्वसत्वान्संयोगांतस्यपदस्यलोपइत्यर्थसंभवाच्च सा
न्यङोरित्यत्र सन्यङोरिति सुवचत्वादित्थं प्रयोजनांतराभावात् ङि॰त्वमात्मनेपदार्थमेव यथा कङ॰ शिङोर्ङि॰त्वं नचनः क्रोरिनिदीत्यत्र ह्यऽनुबंधकत्वेन सामा
न्यग्रहणार्थं नदितिवाच्यं अनुबंधांतरेणाऽपि तन्सिद्धेः इत्थमयङीत्यत्राऽकारप्रश्लेषेणाऽनुदात्तत्वसंपादनं व्यर्थमेव यदपि ऋतेरीयङि॰त्यादि तदपि न ङि॰त्व
स्यात्मनेपदार्थत्वान्न च गुणनिषेधार्थं तत् कित्वेन गित्वेन वा तत्संभवात् इत्थमिकारप्रश्लेषोपिव्यर्थः यदपि अनुदात्तङि॰दित्यादि तत्राप्युच्यते प्रत्ययं ङि॰तमा।
श्रित्यात्मनेपदं प्रत्ययाद्भवति समुदायाद्वा नाद्यः तस्यैवांतरंगत्वेन प्रत्ययात्पूर्वमहप्रसंगात् यङ॰ एव ह्नित्वप्रसंगाच्च सन्यङोरिति षत्वाश्रयणात् नांत्यः स
मुदायस्य ङि॰त्वाऽभावस्य त्वयैवोक्तत्वात् यदपि धातोरिति नास्ति तदपि न भूवादय इति तस्याऽनुवृत्तेः सत्वात् आहु शाइत्यत्राचीत्यस्य यथा अननुवृत्तावा।
पिते नधातोराक्षेपसंभवात् इकोझलित्यत्र सनाययथा यदपि अशिश्रियदित्याद्युक्तं तदपि न ङि॰त्वभावित्वेन प्रथममेवात्मनेपदप्रवृत्तिसंभवात् ग्रहेः शितइ
त्यत्र भाविनं शितमाश्रित्याऽऽत्मनेपदं यथेति प्रत्ययस्यैव ङि॰तमाश्रित्याऽऽत्मनेपदविधाने यत्नइत्वाऽचरति सत्वेवाचरति कृत्स्नइ वाचरतीत्यत्रापिस्यात नङोदे
ङि॰त्वात् मन्मतेतु उपदेशेयोङि॰तत्तदंतादात्मनेपदविधानेपि ङ॰कारानुबंधः प्रत्ययत्वावगत्यर्थ इति केचित् यद्वा धातोरिति व्याख्यानान्न दोषः धातोः क्विंवंतत्वेन ङि॰दंतत्वाऽभावात् किंचकुकुटिषतीत्यत्र स्यात् कुटादित्वेन सनोङि॰त्वा
त् सन्मतेसनओपदेशिकं ङि॰त्वंनास्तीति दिग्गत्यर्थानांकौटिल्ये यङि॰त्युक्तं तत्कौटिल्यं फलस्य व्यापारस्य वा विशेषणं एवं लुंपादीनां गर्हापि जंगम्यतेऽश्वोमार्गं अश्वा
भिन्नाश्रयकः मार्गाभिन्नाश्रितवक्रगत्यऽनुकूलो वर्तमानो व्यापारः मार्गाभिन्नाश्रयसंयोगानुकूलो वक्रो व्यापार इति वा लोलुप्यते वनं चैत्रः चैत्राऽभिन्नाश्रयको वना
भिन्नाश्रयितकुत्सितछेदनानुकूलो वर्तमानो व्यापारः वनाभिन्नाश्रयछेदनानुकूलः कुत्सितो व्यापार इति वा लुंपादिषु योगात्यर्थत्वस्माद्गर्हायामेव यङ्॰ कौटिल्यस्याव
काशो जंघन्यते गर्हायामित्यस्यावकाशः सासद्यते वृक्षः कुत्सितसाऽवयवविभागानुकूल एकवृक्षाभिन्नाश्रयको वर्तमानो व्यापारः सासद्यते मार्गं चैत्र इत्यत्रोभयप्रसं

एम
२२

गेपरत्वाद्गर्ह्यायांयङ् एवमन्यदपि बोध्यं ॥७९॥

इषिरिच्छाइहैवसूत्रेनिपातनाद्ज्ञाविद् इषेः छश्चांतादेशः इषिकर्मार्थवाचका द्धातोरिच्छायांसप्रत्ययः नवेदिष्यमाणमिच्छाकर्तुरात्मसंबंध्येवभवति द्विरित्यनुवृत्तं भिन्नंवाक्यंधातोरित्यनुवर्तनेधातुश्चनसप्रकृतिर्गृह्यते किंतुसंतः प्रत्येतुमिच्छतिप्रतीषिषतिइणः सःसधातुरितिधातुसंज्ञा सनादेः परइतिसस्यद्वित्वंयः से इति पूर्वस्येत्वं ननुइषिकर्मार्थैतिकस्माल्लब्धंशृणुइच्छायाः कर्मैनिपतन्त्वादिषिकर्मेतिलब्धंधातोः प्रत्ययविधानात्तदर्थत्वंचलब्धं पक्तुमिच्छतिपिपक्षतितुमुन्तुस्तादर्थिकः साध्यावस्थांक्रियामाह सचलौकिकेवाक्येप्रयुज्यतेकेवलस्यधातोः प्रयोगानर्हत्वात् अलौकिकेतुधातुमात्रंप्रयुज्यतेनतनुतुमः कथंलोपइतिनाशंक्यं पचनेनेच्छतीत्यत्राऽपिसोऽस्तुकरणस्याऽपिक्रियायामपेक्षणादितिचेन्नवैषम्यात् कर्महिप्रथममपेक्षणादंतरंगमव्यभिचारात्त्वकरणं तुविपरीतं अंतरंगेणैवविधेराकांक्षापूर्तौवहिरंगप्रवृत्तिरयुक्ता किंचाऽनभिधानादपिनपिपक्षतीत्युक्तेपचेरिच्छाकर्मत्वप्रतीयतेनकरणता यथाराजपुत्रइत्युक्तेराजन्यएवपुत्रः प्रतीयतेननत्समीपवर्त्यन्यदीयः केचित्वाहुरिषिकर्मणोऽत्यतः कर्मणीत्यनुवर्त्यपंचम्याविपरिणम्य कर्मणोधातोरित्याहुः यत्तुयेनहेतुनापचनेनेच्छतीतिवाक्यंभवतितेनैवहेतुनावृत्ति

॥ इच्छायामात्मनः सः ॥ ८० ॥

आप्नोतीत्युक्तंतत्र ऋद्धस्यराज्ञः पुरुषइतिवाक्यवत् वृत्तेरपिप्राप्तेः धात्वर्थस्यकर्मत्वंतुफलावच्छिन्नस्यव्यापारस्यव्यापारसहितस्यफलस्यवा आत्मशब्दस्तुनचेतनद्रव्यवाचीतथासतिआत्मनइतीच्छाशब्दयोगेकर्तरिषष्ठीस्यात् ततश्चात्मकर्तृकायामिच्छायामित्यर्थः स्यात् तथाचात्मग्रहणंव्यर्थंस्यात् इच्छाया आत्मकर्तृकत्वाव्यभिचारात् व्यर्थविशेषणतापत्तेः कर्मणिषष्ठीतिपक्षेतुअसंभवः स्यात् नह्यात्मनोद्रव्यस्यसाध्यत्वाद्यतोऽर्थत्वंकुत्रापिसंभवति क्रियायाएवतत्संभवात् अतःपरत्वात्मत्यर्थः स्वशब्दस्यपर्यायोऽयमात्मशब्दः संबंधसामान्येचषष्ठीआत्मनः स्वस्येत्यर्थः स्वशब्देनात्रेषिकर्तैवगृह्यते इच्छायाःक्रियारूपत्वेनकर्तारंविनाऽनुपपन्नत्वात् कर्तुराक्षेपात् इच्छाकर्तेष्यमाणंवस्तुयदिस्वसंबंधित्वेनैवेच्छतितदाधातोः सप्रत्ययइत्यर्थः शिष्याणांपठनमिच्छतिगुरुरित्यादौसोनशिष्याणांस्वसंबंधित्वेपि पठनस्यसाक्षात्स्वसंबंधित्वाभावात् इच्छायांकिं भोक्तुंजानाति धातोः किं प्रतिष्ठासतेअत्रहिप्रशब्दसमभिहारेगतिःप्रतीयते गतिश्चधातोरेवार्थोयद्यपिप्रशब्दंविना

कौ॰ आ॰
उ॰ भा॰
२३

गतेरप्रतीतेर्द्योतकत्वेनाऽप्यपेक्षत्वात् विशिष्टस्य कर्मत्वाद्विशिष्टान्नन्वयोपपत्तिः स्यात् तथा चाऽऽङ्दिवयोर्दोषः स्यात् तन्निवृत्त्यर्थं धातुग्रहणं धातोः कर्मणः समानकर्तृकादि-
च्छायां वेति सूत्रे कर्मण इत्यस्यार्थ उक्तरीत्या न ह्याभसंभवात्समानकर्तृकादित्यपि व्यर्थं आत्मन इत्यनेनैव तल्लाभात् उत्तरसूत्रे च तत्तत्पाठ्यमिति लाघवाच्च वेत्यपि व्यर्थं स्या-
त्कार्यीभावे वृत्तिः व्यपेक्षायां तु वाक्यमिति तन्न फलस्यासिद्धत्वात् अथ पूर्वसूत्राच्चोऽनुवर्तते सह इच्छायामित्यस्याऽग्रेयोऽप्यः अनुक्तसमुच्चयार्थः तेनाऽऽशंकायामपि सप्रत्ययः
नदीकूलमुन्मुमूलयिषति हृषितिरजिगमिषति अन्ये तु चेतनत्वारोपात्सः पाषाणादीनां संबोधनवदित्याहुः तन्मते च कारो भिन्नवाक्यं न त्वेतन्नेनेति इच्छायामिति वा-
नुवर्तते प्रत्ययग्रहणात् परिभाषया सशब्देन सांतं गृह्यते तेनेच्छासंगात्पूर्वोक्तं नेत्यर्थः चिकीर्षितुमिच्छति स्वार्थसांतात्तु इच्छायां सोऽभवत्येव जुगुप्सिषति मीमांसिषते इति
अचण्णादिकि किरित्यतः किदिति चाऽनुवर्त्य वाक्यभेदेन व्याख्येयं सः किद्भवति न च भवति लक्ष्यानुसाराच्च व्यवस्थानेन रुरुदिषति विविदिषति मुमुषिषति जिघृक्षति सुषुप्सति
पिप्रच्छिषति तं द्रुतितृक्षतीत्यादौ गुणाऽभावसंप्रसारणनलोपाः सिध्यंतीति दिक् ॥ ८० ॥ बहुवचनमाद्यर्थं गुपूतिज्कित्मान्बधदान्शान्भ्यः सप्रत्ययः धातोश्च वृद्धिः इच्छायां

॥ गुप्यः ॥ ८१ ॥ आयः ॥ ८२ ॥ नाम्नोयः ॥ ८३ ॥

पूर्वेणासिद्धत्वाद्दर्थानयनभिधानाच्च स्वार्थे विधिरयं गुप तिज मान बध आद्य अनुदात्तेतः दान्शानौ स्वरितेतौ अवयवेऽचरितार्थलिंगं समुदायादात्मप्रवर्तकं जुगुप्सते आगमजमनि-
त्यमिति नेट् नानिटि से इति न गुणः तितिक्षते चिकित्सति मीमांसते बीभत्सते दीदांसति शीशांसति ॥ ८१ ॥ गुप्य इत्यनुवर्तते शब्दाधिकारश्चायं तेन गुपूधूपविच्छिपणिपनिभ्य आयः
अनिर्दिष्टार्थत्वात्स्वार्थे पणिपन्योरनुदात्तेत्त्वं आयाऽभावे चरितार्थमित्यायंतात्मनाऽऽत्मवर्तते इति आभ्यां चाऽपः स्तुतावेवेष्यते गोपायति धूपायति विच्छायति पणायति
पनायति अत्राऽनुक्तसमुच्चयार्थश्चोऽनुवर्तते तेन ऋतेरीयङ् ऋतीयते कमेर्णिङ् कामयते वाऽनप्यायादिः गोपायांचकार जुगोप ऋतीयांचक्रे आनर्त कामयांचक्रे चकमे इ- राम २३
ति सिद्धं ॥ ८२ ॥ इषिकर्मार्थकान्नाम्न इच्छायां यः प्रत्ययः तदिष्यमाणं यदीच्छाकर्तुः स्वसंबंधि भवति पुत्रीयति घटीयति ननु कर्मण इति कस्मान्नोक्तमिति चेत् शृणु इच्छायाः
सकर्मकत्वेनाऽऽक्षिप्तस्य कर्मणो नामार्थेनाऽभेदसंबंधात्त्वं ननु पुत्रेण पुत्राय पत्नाद्वेच्छतीत्यादावपि कुतो न तेषामपीच्छायामन्वयस्य संभवादिति चेन्न बहिरंगत्वात्कर्मेदिप्र

यमाकांक्षितत्वादंतरंगमव्यभिचारिचकरणादितु पश्चादपेक्षितत्वाद बहिरंगंव्यभिचारि च नहिसर्वत्रेच्छायांकरणादिरस्तीतिनियमोऽस्ति अंतरंगेकर्मणिचरितार्थेबहिरंगेकरणादौप्रवर्तितुंनार्हति अप्रतीतेश्च नहिपुत्रीयतीत्युक्तेकरणादिः कश्चित्प्रत्येति यद्वा आङ्गुवीत्यतः कर्मणीत्यनुवर्त्यकर्मणिवर्तमानात्वाम्नइतिव्याख्यानात्सत्वं आत्मनइत्यनुवर्ततिमचचेतनद्रव्यवचनोनग्राह्यः घटीयतीत्यादावप्रसंगात् घटादेरचेतनत्वात् परव्याचत्यर्थःस्वशब्दपर्यायोगृह्यते इच्छायाश्चक्रियात्वेनस्वाश्रयः कर्ताऽऽक्षिप्तः सचेदिष्यमाणंवस्तुस्वसंबंधित्वेनाऽपेक्षतेनदाऽऽत्मनः ससंबंधित्वंचसाक्षाद्ग्राह्यं यजमानस्यपुत्रमिच्छतिपुरोधाइत्यत्रनयः यजमानपुत्रस्यसाक्षात्व संबंधित्वाभावात् ननुस्वस्यपुत्रंपरस्यदासमिच्छतीत्यऽत्रकुतोनपुत्रस्यस्वसंबंधित्वादितिचेन्न इष्यमाणेनरूपेणस्वसंबंधित्वस्यविवक्षणात् नचात्रदासत्वेनतत्वसंबंधि ननुनाम्नइतिकिमर्थं धातोः पूर्वेणमविधानात्यविशेषात्वाम्नोलाभात् नचसिंवंनादप्याऽऽयास्यतीतिवाच्यं सत्यभावात् नचवाच्यतिमरुत्यतीत्यादौकुत्वत्वादिप्रसंगइतिवाच्यं अप्पयोरादित्यत्रजत्वाऽकरणेनयेपदकार्याभावस्यज्ञापितत्वात् राजीयतीत्यत्रतुज्ञापकसिद्धंनसर्वत्रेतिनलोपः सिध्यतिनाम्नोपः पक्षेतुकुत्वाद्यः भावीयुक्तएव नचाऽत्रपक्षेराजीयतीत्यत्रनलोपाप्रसंगः ओर्वमोविप्यतोलोपइतिकृत्नोयेइत्यतोयेइति क्रसंयोगादित्यतोनेति चानुवर्त्यवाक्यभेदेनव्याख्येयंनेतिस्वरूपपरंशब्दाधिकारात्पष्ठ्याविपरिणामयितव्यंतेननाम्नोनस्यलोपोयेइतिलाभात् इत्थंव्यर्थंनाम्नइतिचेत् उच्यते एकत्वस्यविवक्षणार्थंनामग्रहणं तेनाऽनेकस्मात्वात्वःपदाद्यानयः महांतंपुत्रमिच्छतिइति किंचमहापुत्रीयतीतिस्यात् नचेष्टमेव यद्ययंविग्रहः महान्पुत्रोमहापुत्रइति महांतंपुत्रमिच्छतीतिविग्रहेतुनेष्टं नन्वऽत्रकर्मत्वाभावादेवनभविष्यति मैवंकर्मत्वस्यसत्वात् क्रियाजन्यफलाश्रयःकर्म क्रियाचात्रेच्छातज्जन्यंफलमिष्टत्वंतच्चसमुदायाश्रितंनहिपुत्रमात्रमिच्छतिनापिमहत्वमात्रंकिंतुविशिष्टं एवंतर्हिसविशेषणानांवृत्तिर्नवृत्तस्यविशेषणयोगोनेतिवचनात् नसमुदायाच्च इदंचन्यायसिद्धानुवादकं नत्वऽपूर्ववचनं तथाहि पुत्रस्यप्रत्ययार्थेनसहएकार्थीभावरूपोऽन्वयोविशेषणेनतुव्यपेक्षारूपः नचैकस्यविरुद्धमन्वयद्वयंसंभवति ऋद्धस्यराज्ञःपुरुषइत्यत्रराज्ञोयथापुत्रीयतीत्यत्रतुसमुदायशक्तौप्रविष्टस्यविशेषणीभूतस्यपुत्रस्यनविशेषणाऽन्वयःसंभवति पदार्थःपदार्थेनयुज्यते नत्वेकदेशेनेति सर्वतंत्रसम्मतं ननुनामपक्षेकर्मत्वेसत्यपितद्वाचकविभक्त्यभावात्प्रत्ययोनभविष्यतीतिचेत् नत्रिकपक्षेनथात्वेपिपंचकंनामार्थइतिपक्षेनाम्नैवकर्मणोऽभिधानाद्विभक्त्यनपेक्षणात् ननुद्योतकत्वेनविभक्तिरपेक्षिताचेत्

नयत्रानेककारकसंभवस्तत्रकारकविशेषद्योतनार्थविभक्तेरपेक्षणात् अत्रतुकर्मैवकारकं यथापिपक्षनिपचतीत्यत्रविक्लित्तिरेवकर्म पश्यमृगोधावतीत्यत्रमृगकर्तृकं
सरणं दर्शनेकर्मनकारकांतरमस्तिअतोविभक्त्याविनापिनिर्वाहः तथाऽत्रापि एवंतर्हिउत्तरार्थनाम्नइति इच्छायांकिंपुत्रंजानाति आत्मनःकिंशत्रोःपुत्रमिच्छति कर्मणः
किंपुत्रस्येच्छति॥८३॥यदृत्यनुवृत्तंसप्तम्याविपरिणम्यते येपरेऽवर्णस्यईर्भवति नेत्यनुवृत्त्याक्वचिन्नभवति पुत्रीयति गंगीयति अशनमिच्छतिअशनायति अशनीयति
धनायति धनीयति उदकीयति उदकपर्यायउदनशब्दोप्यस्ति तस्योदन्यति सुडामदृत्यत्रसुडिनियोगविभागात्क्वचिदन्यत्राऽपिसुट् अश्वस्यतिवडवाक्षीरस्यतिबालः।
वृषस्यतिगौः लवणस्यत्युष्ट्रइति सिद्धंडेर कृदृत्यत्रयोगविभागादन्यत्राप्यऽभवतीत्युक्तंक्वचिदकृसुटोःसहप्रयोगोभवति यद्वा दृगधांतादित्यतःसकमनुवृत्त्य दिवादा।
वदृत्यतोऽटमनुवृत्त्यनाम्नः सकृसकोऽट्शब्दाधिकारमाश्रित्यसगाऽ गमोवोध्योव्याख्यानात् दध्यस्यति दधिस्यति मध्वस्यतिमधुस्यति षःसःइतिविपरीतनिर्देशान्न
षः चोऽनुक्तसमुच्चयार्थः तेनमांनाद्यायाभ्यांयोनकिमिच्छतिस्वरिच्छतिक्वचित्काम्यप्रत्ययोभवतिपुत्रकाम्यति स्वःकाम्यति किंकाम्यतिएकार्थीभावरूपेऽन्वयेवृत्तिर्व्यपेक्षा

॥ ईचाऽस्य॥॥ ८४ ॥ ६ ॥

यांतुवाक्यमितिव्यवस्थयारूपद्वयसिद्धौपाणिनीयेसूत्रेऽनुवृत्तंवेतिव्यर्थंपश्यपुत्रमिच्छति घटमिति प्रत्युदाहरणंतुद्विविधस्याप्यऽन्वयस्याऽभावद्योतनाय वस्तुतस्तुवा
क्यमेवप्रत्युदाहरणमेकार्थीभावाभावात् यकाम्यांनातुनकर्मणिप्रत्ययः कर्मणो धात्वर्थानरमभावेनाऽकर्मकत्वात् ननुपुत्रीयतिशिष्यमित्यादाविवेच्छायेऽपिसकर्मकता
कुतोनेतिचेन्न इच्छायाअप्रतीतेः नहिशिष्यंपुत्रीयतीत्युक्तेइच्छागम्यतेकिंत्वाचार एव ननुतात्पर्येसतिइच्छासंगंस्यतेइतिचेन्न तात्पर्यज्ञानस्यशाब्दबोधाऽहेतुत्वात् नहि
वक्तुस्तात्पर्यंश्रोत्रावगंतुंशक्यं परबुद्धेरप्रत्यक्षत्वात् अर्थप्रकरणादिनातात्पर्यज्ञानांगीकरणं तुनयुक्तं अर्थादिनाशाब्दबोधएवांगीकर्तुमुचितः किंतेन किंचसुप्तोन्मत्तशुका
दिवाक्येव्यभिचाराच्चनहिवक्तुस्तत्रतात्पर्यमस्तितत्रेश्वरतात्पर्यंग्राह्यमिति चेन्नवक्तुस्तात्पर्यमित्यस्यवैयर्थ्यप्रसंगात् आवश्यकेनतेनैवनिर्वाहात् किंचेश्वरतात्पर्यम
प्यऽज्ञातंहेतुर्ज्ञातंवानाऽद्यः तस्यसर्वत्रसाम्येनकुत्राप्यस्तिनास्तिवेतिज्ञातुमशक्यत्वात् चैत्रस्यतुतात्पर्यज्ञानेसतिमैत्रस्याऽपिबोधप्रसंगात्नांत्यः अस्माकमीश्वरतात्पर्यज्ञा

नाऽसंभवात् कार्येणानदनुमास्यतीति चेत् न परस्पराश्रयप्रसंगात् शाब्दबोधे सति तस्य कारणत्वग्रहः कारणत्वे गृहीते च शाब्दबोध इति किंचेश्वरानंगीकर्तॄणां सांख्य
मीमांसकादीनां शाब्दबोधो न स्यात् तेषामीश्वरस्यैवनाऽसिद्धिनात्पर्यज्ञानंतु दूरापास्तमिति दिक् ॥ ८४ ॥ आचरणं आचारः चरेर्भावे घञ् ज्ञानं व्यवहारो वा उपमीयतेऽनेनेत्यु
पमानं माङः साधने ल्युट् कर्मण उपमानादाचारे यस्तस्मिंश्चार्थे परे पूर्वस्यास्य ईः इति वाक्यभेदेनैव द्वयोः समावेशसिद्धे चोऽनुक्तसमुच्चयार्थः तेनाऽऽधारस्याप्युपमानं
यः पुत्रमिवाचरति पुत्रीयति शिष्यमुपाध्यायः हरीयति विप्रं राजा भानूपतिचंद्रं विरहिणी प्रासादीयति कुट्यां भिक्षुः कुटीयति प्रासादे नृपः गंगीयति पल्वले मूर्खः अत्र ना
न्तः सिवंतात्वाद्यः आद्येलोपः इत्याद्यनुवृत्त्या न लोपः कार्यः अंत्येऽप्ययोरिति ज्ञापकात्पदकार्याभावः साध्यः ज्ञापकसिद्धं न सर्वत्रेति नस्य लोपः राजानमिवाचरति राजी
यति आद्यं भिक्षुः पुत्रविषयकं यद्ज्ञानं व्यवहारो वा तन्नत्स्वदृशं शिष्याऽभिन्नाश्रयं यद्ज्ञानं व्यवहारो वा तदनुकूलो वर्तमान एकगुर्वभिन्नाश्रयको व्यापारः प्रासादाभिन्नाश्रय
कं यद्ज्ञानं व्यवहारो वा तत्सदृशं कुट्यभिन्नाश्रयं यद्ज्ञानं व्यवहारो वा तदनुकूल एकभिक्ष्वाश्रयो वर्तमानो व्यापारः ॥ ८५ ॥ कर्तुरिति योगो विभज्यते कर्तुरुपमानान्नाम्न इति

॥ आचारउपमानात् ॥ ८५ ॥ कर्तुर्यङ् ॥ ८६ ॥ ९ ॥

वर्तते चोऽनुक्तसमुच्चयार्थः तेनाऽनुक्तः क्विप्प्रत्ययः समुच्चीयते नामन्तः सिवंतं प्राप्तं न सिवंतं विभक्तिकार्यप्रसंगात् कर्तुरुपमानान्नाम्न आचारेऽर्थे क्विप्प्रत्ययः कृष्ण
इवाचरति कृष्णति अवादि कृष्णांश्चकार यतद्रूपस्य लोपः कृष्ण्यात् कवयति दृषम्यति अद्इवाचरति अतिद्विर्वं सवर्णदीर्घः णलौ औ अतुः क इवाचरति कति चककेचि
तुः आ अन इति स्थिता अदंतादपिणयोऽडवाऽदेश उक्तः तन्मते च कौ माला इवाचरति मालाति सर्पः पंथा इवाचरति पथीनति त्रमांतस्येति दीर्घः नन्विनां शावित्यनेनो
पधादीर्घमात्रस्यसो नियतत्वात्कथमत्र दीर्घः मैवं प्रवर्तमानं हि नत्कृत्रं दीर्घं नियच्छति पथ्यादिषु त्वऽप्रवर्तमानं कथं दीर्घं नियच्छेत् केचित्तु त्वाऽऽत्वाभ्यां बाधितत्वा
त्प्रवर्तते यदि तु ऽत्वाऽऽत्वे न विधीयेते तदाऽत्रापि प्रवर्तेतेति योग्यता मात्रेण नियमप्रवृत्तिमाहुस्तन्मते पथेनेति वृत्रहनतीत्यत्रतु नियमप्रवर्तनान्न दीर्घः राजा
नति इदामति कीमति सजुषति आशिषतीत्यादौ न पदकार्यं नाम्नो विधानात् कर्तुः किं पुत्रीयति शिष्यं कर्मोपमानमिदं उपमानात्किं पुत्र आचरति कृष्णनिष्ठज्ञानं।

सं॰ व्या॰ व्यवहारसदृशः पुंड्रकनिष्ठो वर्तमानो ज्ञानव्यवहारः मालानिष्ठवर्तमानव्यवहारसदृशः सर्पनिष्ठो वर्तिमानो व्यवहारः उपमानस्य कर्तुः धात्वर्थांतरभावेऽपि उप
ल॰ मा॰ मेयेन कर्त्रा सकर्तृकत्वात् कर्तरि प्रत्ययः यथा पूर्वसूत्रे उपमानस्य कर्मणो धात्वर्थांतरभावेऽपि उपमेयस्य कर्मणः सत्वात् कर्मणि अपि प्रत्ययाः द्वयोरपि आचार
२५ क्रियापेक्षया कर्तृत्वकर्मत्वे नो ध्ये अवगल्भक्लीवहोडेभ्योऽक्विवंतेभ्यः पेप्राप्ते आदनुदात्तेत्यत्र आदिति योगविभागादाऽऽद्वोध्यं णादेशोऽननेकस्वरत्वादाऽऽमत्र
वगल्भांचक्रे क्लिविंतानां तु अवजगल्भे चिक्लीवे जुहोडे इति विशेषः ततः यङ् उपमानात्कर्तुर्नाम्न आचारेऽर्थे यङ् हंस इवाचरति हंसायते गरुडायते हं
सनिष्ठव्यवहारसदृशो बकनिष्ठो वर्तमानो व्यवहारः अत्र हसेड् इति चाऽनुवर्त्य वाक्यभेदेन व्याख्येयं हसस्य लोपो यङि तस्य नित्यं लोपः सस्य व्यवस्थितः ओ
जसोऽप्सरसो नित्यमन्येषां तु विकल्पनात् अन्यहसस्य तु न लोपः राजायते वृत्रहायते पथीयते दंडीयते अत्र नलोपे येइति दीर्घः तस्याऽनुपधादीर्घत्वेन नि
यमाभावात् अत्राऽङ्गुवीत्यतो भुवीत्यनुवर्त्य वाक्यभेदेन व्याख्येयं भवत्यर्थे नाम्नो यङ् तस्मिंश्च नित्यं हसस्य लोपः योगविभागादिष्टसिद्धिरिति भवत्यर्थो च्व्यर्थो
विशिष्टो ग्राह्यः अशश्वत् शश्वद्भवति शश्वायते सुमनायते अत्र धातुसंज्ञाहेतौ प्रत्यये विकीर्षिते उपसर्गसमाकारं पूर्वपदं पृथक्क्रियते चुरादिषु संग्रामङ् युद्धे इ
ति विशिष्टपाठात् ज्ञापकात् अन्यथा ग्राम युद्ध इत्येवापठिष्यत् अतो मनः शब्दात्पूर्वोऽट् स्वमनायत नाम्नश्च क्ताने तिसमासे क्यप् सुमनाय्य सुस्मिमनायिषते इति
द्वित्वं च सिध्यति अत्र च करणे इत्युत्तरसूत्रात् दपकृष्य वाक्यभेदेन व्याख्येयं नाम्नो यय अक्षेत्तः करोत्यर्थे करोत्यर्थश्च द्विधा उत्पादनरूपः एकः तत्र धात्वर्थोऽपरः।
करोत्यर्थस्य सर्वधात्वर्थेष्वऽनुगतत्वात्सर्वे धात्वर्थाः करोत्यर्थाः अपि भवंति वरिवः शुश्रूषां करोति वरिवस्यति नमस्यति देवान् अत्र न च तुर्थी जहत्स्वार्थायां वृत्तौ राम
नमः शब्दस्याऽनर्थकत्वात् अजहत्स्वार्थायां तु प्रत्ययार्थे उपसर्जनत्वात् तपश्चरति तपस्यति शब्दं करोति शब्दायते वैरायते कलहायते बाष्पमुद्वमति बाष्पाय २५
ति उष्माणमुद्वमति ऊष्मायते कष्टाय क्रमते कष्टायते रु छायते गहनायते इति वृत्ति विषये पापार्थी पापं कर्तुमुत्सहते इत्यर्थः सुखं वेदयते सुखायते दुःखायते
सुखं दुःखं चानुभवतीत्यर्थः लक्ष्यानुसारादतिप्रसंगो नोद्भाव्यः ॥८६॥

नाम्नोणिः प्रत्ययोभवतिद्विविधेकरोत्यर्थेसचडित् यदिडितसंज्ञाविधीयतेतर्हिडितिदेरित्यादावस्येवग्रहणंस्यात् कृत्रिमत्वात् डइत्यस्यतस्यतुग्रहणंनस्यादकृत्रिमत्वादतोऽतिदेशोयं परत्रप्रयुज्यमानः परशब्दोविनाऽपिवतिंवत्यर्थंगमयति अडितडिदित्याह डिद्वदितिगम्यते यद्यऽपिडिदितिसामान्यशब्दस्तथाऽपिलक्ष्यानुसाराद्व्याख्यानाद्विशेषपरोबोध्यः यद्वा डिदितिवचनसामार्थ्याद्विशेषपरः अन्यथाणिड्डिक्करणादन्येवाऽवक्ष्यत् नचैवमुत्तरयोगयोरपिडिद्विधानेटिलोपइतिवाच्यंधातोर्णिःप्रेरणादृतिगौरवाभावात्सुपठितत्वात् नचैवंजेरित्यादावस्यैवग्रहणंस्यादेकानुबंधकत्वादितिवाच्यं एकानुबंधकग्रहणेतिपरिभाषायाअनित्यत्वात् नत्रवशासःशित्वंज्ञापकंशासीत्यस्यस्थानेअसीतिपाठ्यं तत्राऽननुबंधकस्यैवग्रहणंभविष्यतिनजसादेःकिंशित्वेन तज्ज्ञापयति तेनसुरारित्यत्रतत्नोर्ग्रहणंभवतियथा तथाजेरित्यादौणिणिङोर्ग्रहणंभविष्यति तेनडिद्वदित्यस्यष्ठवदित्यर्थः तेनेष्ठे यत्कार्यंदृष्टंसंभावितंचतन्नाम्नोभवतिदृश्यते टिलोपःइष्ठे

॥ णिर्डिन्तकरणे ॥ ८१ ॥

पथ्या यदिष्टःएवंपटुमाचष्टेपटयति वृद्धोसत्यांपूर्वंवाटिलोपः अपीपटदपपटद्वा विन् मतुवतुलोपोयथास्रग्विणमाचष्टेस्रजयति अग्निमंतमग्नयति दंडवंतं दंडयति गुरुमाचष्टेगरयति युवानमल्पंवायवयति कनयति अल्पयति अंतिकंवाढंवानेदयतिसाधयति प्रियंस्थिरंस्फिरं प्रापयति स्थापयति स्फापयति अत्रणिडिदितियोगंविभज्यसापेक्षादपिनाम्नोणिर्विधेयः माणवकंमुंडंकरोतिमुंडयति गुडंमिश्रंकरोतिमिश्रयति काष्ठंश्लक्ष्णंकरोतिश्लक्ष्णयति पयोभोक्तुंवनंकरोति व्रतयति शूद्राऽन्नंभोक्तुंव्रतयति अनयोर्योगयोर्नाम्नःप्रत्ययविधिः तेनपदकार्यंन सम्राडिवाचरतिसम्राज्यते मरुत्वत्यते वाच्यते स्रजयतिपततीतिपततमाचष्टेपतयतिअत्रकारउभयपदार्थोवृद्ध्यर्थश्च ननुवृद्धोचरितार्थः कथंपाऽऽतोर्हेतुरितिमेवं उच्चारणसामर्थ्यात् वृद्धिमात्रार्थत्वेतुणिरित्येवपठेत् तेनणिरितिसूत्रंकर्तव्यंभवति अत्राऽऽदादेर्लुगित्यतोलुगित्यनुवृत्त्यवाक्यभेदेनव्याख्येयंनाम्नोऽवयवस्यकृत्प्रत्ययस्यलुक्स्यात्णौकंसवधमाचष्टेणिप्रत्ययेमदामित्यऽप्रत्ययस्यलुक् अकृतव्यूहेतिनिमित्तापायेतिन्यायेनवावधादेशाऽभावः इहपूर्वपदंपृथक्क्रियते संग्राममयुद्धइतिसामान्यापेक्षज्ञापकात् तस्यचहंत्यर्थेकर्मत्वात्ततो।

द्वितीया हनो घदिति घत्वादेशः कंसं घातयति एवं बलिं बंधं राजागमनं चाऽऽचष्टे बलिं बंधयति राजानमागमयति यद्वा अव्यविकन्यायेन नाम्नो विग्रह एव ह
नादेर्धातोः प्रेरणे ञिप्रत्यय इति वक्ष्यते ॥ ८७॥ धातोरिति योगो विभजनीयः यक्ता तुर्ष्वित्यतो यगित्यनुवर्त्य धातोर्यगिति व्याख्येयं स च कंड्वादिभ्य एव लक्ष्या
नुसारात् कंड्वादयो द्विविधाः धातवो नामानि च कंडूञ् गात्रविघर्षणे नाम्नां तु विग्रह एव कंडूं करोति प्रेरणे कारणादित्यनुवर्तते क्रियाविषयके प्रेरणे वा
च्ये धातोर्ञिः प्रत्ययः स्यात् प्रेरणं चाऽनेकविधं भृत्यादेर्निकृष्टस्य प्रवर्तना प्रेषणं आज्ञा गुर्वादेराऽऽराध्यस्य प्रवर्तनाऽध्येषणं प्रार्थना यस्याऽनुमतिमन्तरेणा
ऽर्थी न प्रवर्तते तस्य राजादेरनुमत्या प्रेरकत्वं वैद्यादेस्तु भुक्त्वा पर्यटकं पिबेत् ज्वरितइत्याद्युपदेशेन प्रेरकत्वं यः पुनः केनचिज्जिघांसितं पलायमानं निरुणद्धि
निरुद्धश्च हन्यते तत्र निरोद्धा हंतुरनुग्रहं करोतीत्यनुग्रहेण तस्य प्रेरकत्वं एवं चोरस्य वासान्नादिप्रदस्याऽप्यनुकूलाचरणेन प्रेरकत्वं सर्वत्राप्ययं विशेषः प्रकार
णादिगम्यः सर्वत्रानुगतं प्रेरणमात्रं त्वर्थः ननु प्रेरणे इति धातोर्विशेषणमस्तु प्रेरणे वर्तमानाद्धातोर्ञिरिति अथ पचति पाचयतीत्युक्ते व्यक्तमर्थान्तरं गम्यते न

॥ धातोः प्रेरणे ॥ ८८ ॥

नु कथमन्यस्वार्थिकः इह हि कः पचेरर्थः याऽसौ तंडुलानां विक्लित्तिः अधिश्रयणादीनां तु तादर्थ्यात्तदवच्छेदेन च पचत्यर्थता यो हि पानार्थमुदकमाऽऽहरति विक्रियार्थं च
काष्ठानि आहरति शीतं चापनेतुमग्निं समिंद्धे पेष्टुं च तंडुलान् प्रक्षालयति तेनासौ पचतीत्युच्यते तत्कस्य हेतोर्विक्लित्तिं प्रति साधनत्वाऽभावात् तदवच्छेदाऽभावाच्च अत
स्तादर्थ्यादेवाधिश्रयणादीनां पचत्यर्थता तद्वत् प्रेरकव्यापारोऽपि तादर्थ्यादेव पच्यादिवाच्यो भविष्यति ञिप्रत्ययस्तु द्योतकः तथा च योऽप्येकान्तेन तूष्णीमासीनो भक्तबीजव
लीवर्दैः प्रतिविधत्ते स उच्यते पंचभिर्हलैः कृषतीति तेन देवं द्योतकपक्षोऽपि संभवति न च यथा प्रकृत्याऽभिहिते ञिर्भवति एवमुक्त प्रेषितादिशब्दाऽभिहितेऽपि स्यात् उक्तः क
रोति प्रेषितः करोति प्रेरणाविषयार्थत्वात्करोत्यर्थस्य प्रत्ययार्थपक्षे तूक्तार्थत्वात्तञ्ञेरभाव इति वाच्यं उक्तार्थत्वात्प्रेरकव्यापारद्योतनार्थं ञिः प्रयुज्यते तस्य स्वशब्देनैव द्यो
तितत्वात् इह तर्हि पाचयत्योदनं चैत्रो मैत्रेण द्वयोः कर्त्रोः प्रत्ययेनाऽभिधानं प्राप्नोति पाचयतश्चैत्रो मैत्र इति प्रत्ययार्थपक्षे तु प्रकृत्यर्थोपसर्जनस्य प्रत्ययार्थस्य प्राधान्या

तस्यैव कर्त्तरि प्रत्ययइति दोषान्तरं घोतकतापक्षो ग्राह्यः किंच अन्वयव्यतिरेकाभ्यां शब्दार्थावसायः नच पचतिपठतिगच्छतीत्यादावंतरेण णिचं क्वचिदपि प्रयोज्य
व्यापारोऽवसीयते उत्पन्ने तु णौ प्रतीयते अतस्तदर्थत्व मेवयुक्तं किंच एवं च सति अण्णादेरप्यपत्याद्यर्थो द्योत्य एवस्यात् पंचभिर्हलैः कृषतीत्यत्र च नेकार्थत्वाद्धा
तूनां कृषिरेव प्रतिविधानेऽपि प्रवर्त्ततइति युक्तं नपुनस्तद्दर्शनेन सर्वत्र प्रकृत्यर्थत्वं नन्वत्र पक्षे भेदिकाविभिन्ना देवदत्तस्य यज्ञदत्तस्य काष्ठानामिति कृद्योगलक्ष
णा षष्ठी न प्राप्नोति अप्रधानत्वात् मेवं तृतीया वक्ष्यति तद्यथा पाचयत्योदनं देवदत्तो यज्ञदत्तेनेति प्रयोज्ये कर्त्तर्यप्रधानेऽपि तृतीया भवति व्याप्तेः ननु भिक्षावास
यति कारीषोऽग्निरध्यापयतीति णिर्नस्यात् प्रवर्त्तनस्य चेतनधर्मत्वादिति चेन्नाचेतनस्यापि तत्संभवात् नाऽवश्यं स एव वा संप्रयोजयति य आहोष्यतामिति ॥
योपि तूष्णीमासीनस्तत्समर्थमाचरयति सोऽपि वासं प्रयुंक्ते भिक्षाः प्रचुराश्च व्यंजनवत्यश्च लभ्यमाना वासं प्रयोजयंति तथाकारीषोऽग्निर्निर्वातः एकांते सुप्रा
ज्वलितः शीतकृतमध्ययनविरोधिनमुपद्रवमपनयन् अध्ययनेऽनुकूलो भवति तत्र यथाऽनुमतिरुपदेशोऽनुग्रहइत्येतेषु णिर्भवति तथाऽत्रापि भविष्य
ति यद्वाऽनुमत्यादिषु प्रयोज्यव्यापारोपदेशेन प्रवृत्तिः इह तु न तथा तथाप्याऽनुकूल्याचरणमेव प्रयोजकव्यापारत्वेनाऽध्यारोप्यते अथ कश्चित्कंचिदाह पृच्छतु
मां भवान् अनुयुंक्तां मा भवानिति तत्र प्रष्टा प्रयोज्यः तस्य प्रेरकः प्रयोजकः इति तद्व्यापारे णिः प्राप्नोति एकविषयत्वाच्च प्रेसुवादीनां च पर्यायप्रसंगः उच्यते ॥
प्रयोज्यप्रवृत्त्युपहितप्रयुक्तिर्ण्यर्थः केवलात्तु तु वाद्यर्थ इति तदुक्तं द्रव्यमात्रस्य तु प्रैषे पृच्छादेर्लोड्विधीयते सक्रियस्य यदा प्रैषस्तदा स विषयो णिच इति ॥
वासुदेवेन कंसं घातयति कापि कश्चित्करोवेत्यत्र कथं णिः उच्यते ये कंसाद्यनुकारिणो नटानां व्याख्यानोपाध्यायाः ते कंसानुकारिणं नटं सामाजिकैः कंस
बुद्ध्या गृहीतं तादृशेनैव वासुदेवेन घातयंति येपि चित्रं व्याचक्षते इयं मथुरा अयं प्रासादः अयं कंसः अयं भगवान् वासुदेवः प्रविष्टः एताः कंसकर्षिण्यो रा
ज्जवस्ते उग्रनिपाताश्च प्रहाराः अयं हतः कंसः अयमाकृष्ट इति तेपि चित्रगतं कंसं तादृशेनैव वासुदेवेन घातयंति चित्रेपि हि तद्बुद्धिश्च पश्यतां एतेन चि
त्रलेख्यकाख्याताः येपि ग्रंथं वाचयंतः कंसवधमाचक्षते काथिका नां मतेष्वुत्पत्तिप्रभृत्याविनाशात्कंसादीन् वर्णयंति तेपि वर्ण्यमानाः श्रोतॄणां बुद्धिस्थाः प्र
त्यक्षवद्भवंति चित्तमपि चैतेषां तदात्मकमिव भवति अत एव नानापक्षमाश्रिता भवंति केचित्कंसभक्ताः केचिद्वासुदेवभक्ताः वर्णान्यत्वं खल्वपि पुष्यंति के

वै॰ भा॰ चिद्रक्तमुखाः केचित्कालमुखाः त्रैकाल्यमपि लोके लक्ष्यते कथायां वाच्यमानायां हि वक्तारो भवंति गच्छ हन्यते कंसः गच्छ घातिष्यते किं गतेन हतः कंसः तदेवकाथिको।
ल॰ भा॰ ऽपि बुद्धिस्थं कंसं बुद्धिस्थेन वासुदेवेन घातयति श्रोताऽपि शब्दोपहितरूपांश्च बुद्धेर्विषयतां गतान् प्रत्यक्षमिव कंसादीन् साधनत्वेन मन्यते एवं वलिं बंधयति राजानमा
२१ गमयतीत्यादावपि द्रष्टव्यं॥ ८८॥ चुरस्त्रादिर्यस्येति तद्गुणसंविज्ञानो बहुव्रीहिः अनुद्भूतावयवभेदसमुदायस्याऽन्यपदार्थत्वेनाऽऽश्रयणादेकवचनं चुरादेर्धातो।
र्णिः प्रत्ययः चोरयति चोरयते चुरादौ यानि नामानि पठितानि तेभ्यः सुवचनसामर्थ्याण्णिः हस्तिनाऽतिक्रामति हस्तयति॥ ८९॥ अत्राऽनंतरोऽपि णिर्न परामृश्य
ते सग्रहणवैयर्थ्यप्रसंगात् आनंतर्यादेव तदनुवृत्तिसंभवात् नापि व्यवहितस्त्रिवादिः आदेशादिविधायकप्रकरणेन विच्छेदात् अतो यङादिरेव परामृश्य
ते यङादिना च प्रत्ययग्रहणपरिभाषया तदंतं गृह्यते तेषां केवलानां संज्ञाप्रयोजनाभावाद्वा बोभूयते इत्यादि प्रागुदाहृतं यत्तु सनाद्यंता धातव इति सूत्रं तत्तु सधा
तुरिति कर्तुं युक्तं तच्छब्देन सनादयः परामृश्यंते पूर्वविहितत्वेन प्राधान्यात् सर्वादेरंतर्गतः प्रधानपरामर्शित्वात् ननु सनादिपरामर्शेऽपि तदंतस्य संज्ञा न स्यात् सं

॥ चुरादेः॥ ८९॥ सधातुः॥ ९०॥ भ्वादिः॥ ९१॥

ज्ञाविधौ प्रत्ययग्रहणे तदंतग्रहणाभावादिति चेन्न सुप्तिङंतमिति ज्ञापकसिद्धस्य तस्याऽसार्वत्रिकत्वेनाऽत्राऽनाश्रयणात् केवलानां धातुसंज्ञाप्रयोजनाऽभावाच्च
न च सन्यङोरिति द्वित्वप्रयोजनमस्ति कण्ड्वादेस्तदभावात् सौतिण्योरेव षण्यभ्यासात् सस्विदिस्वदिसहीनां च गुणोयङ्लुकोरित्यादिसूत्रवैयर्थ्यप्रसंगाच्च यद्वा भूवा।
दयो धातव इत्यस्याऽनंतरं सडिति सूत्रणीयं सनः सकारादारभ्य णिङो ङकारेण प्रत्याहारः यत्तु चङ्डोर्ङकारेणाऽपि प्रत्याहारः संभाव्येत तदुक्तं तत्र व्याख्यानतो विशे राम
षप्रतिपत्तिसंभवात् अन्यथा रोऽसुपीत्यादौ डापश्चापो वा पकारेण सुप्प्रत्याहारः स्यात् यद्वा सणिङिति सूत्रमस्तु आद्यंताभ्यामवयवाभ्यां संदंशन्यायेनाक्षिप्तस्तदंत॥ २१
समुदायो धातुसंज्ञ इति तस्याऽर्थः॥ ९०॥ भवनं भूः क्रियासामान्यं संपदादिः अंदतींद्रियेण वध्नाति अर्थमित्याऽऽदिः आगमजमनित्यमिति नतु म् यद्वा अंद्यते संवध्य
तेऽर्थोऽनेन यद्वा अंतिअंतर्भावयत्यर्थम् अदर्भक्षणे यद्वा अंघनेऽमनसि क्रियतेऽर्थोऽनेन औणादिकः इ न् यद्वा आदत्ते ग्राहयत्यर्थं अंतर्भावितण्यर्थः यद्वा आदीयते॥

प्रह्वयतेऽर्थोऽनेन आङः परा ह्वाञः किः शब्द इति यावत् भुवः क्रियासामान्यस्य आदिर्वाचकः शब्दो धातुसंज्ञः एवं सत्याऽऽणवयेत्यादावपभ्रंशे हि कृतानेत्यादावव्य
येवभूववभूवेद इत्यादावाख्याताने वाऽतिप्रसंगस्तद्वारणार्थं भ्वादिरित्याऽवर्त्य भूरादिर्यस्येति बहुव्रीहिर्व्याख्येयः आद्यन्तयोरौ च भ्वादिरिति पाठ एव मानम् अन्यथा भ्वर्य
इत्येवाऽवक्ष्यत् आदिशब्दश्च व्यवस्थायां तेन भूशब्दादाऽऽरभ्य ये पठितास्ते ग्राह्याः तेन क्रियावाचित्वे सति भ्वादिगणपठितत्वं धातुत्वम् नामधातूनां तु सधातुरिति
वचनाद्धातुत्वं सौत्राणां तु गणे एव पाठाभावात् यद्वा सं भ्वादीनामुदित्करणात् तेषां धातुत्वं ज्ञाप्यते तेन द्विसंभिन्नाऽस्तथ्ये टू विकल्पाऽर्थं कृतम् क्राच धातोर्भवति धातुत्वाभा
वे क्तैवनास्ति यद्वा स इत्यनुवर्त्य स प्रसिद्धो यो भ्वादिः पठितो पलक्षितार्थविशिष्टः स धातुसंज्ञ इत्यर्थः यद्वा प्रायपाठात् यावादिषु नातिप्रसंगः भूराधस्य ह्रीदयः
क्रियावाचकाः पठितास्तन्मध्यपतिता यावादयोऽपि क्रियावाचका एव गृहीतु मुचिता न द्रव्यविकल्पवाचकाः यद्वा याशब्दस्य न धातुसंज्ञा लाक्षणिकत्वात् यदः।
स्यादौत्यदाद्यत्वे आपि च येति सिद्धं लाक्षणिकस्याऽपि ग्रहणे गामादाग्रहणेष्वविशेष इति व्यर्थं स्यात् वाशब्दस्य धातुत्वे किं स्याद्विकल्पार्थं गंधनादाविव वातीति
रूपं स्यादिति चेन्न अव्ययादिभक्तेर्लुगिति तिवादेर्लुकः संभवात् इत्यं च विभक्तिग्रहणस्यापि तत्र सार्थकं लभ्यते अन्यथा सिपः स्यादेर्वाऽवक्ष्यत् सर्वादिषु पठि
तस्य उभशब्दस्य धातुसंज्ञा प्राप्नोति उभउंभेत्यत्र पाठादिति चेन्न पाठेऽकारस्योच्चारणार्थत्वात्सर्वादौ तु विवक्षितत्वात् रूपसामान्याऽभावात् किं च सर्वादिमध्ये पा
ठसामर्थ्यात्तु उभकाविन्यादिरूपसिद्ध्यर्थो हि पाठः धातुत्वे सति सन सिध्येत् द्योदिवाविति स्वर्गवाचकस्य न धातुत्वं अनुदितत्वात् गणे वो दितस्य पाठात् तदनुबंध
कग्रहणेनाऽतदनुबंधकस्येति न्यायात् कुंडलिनं चैत्रमानयेत्यादौ अकुंडलिनआनयनाऽदर्शनाच्चाऽनयारीत्याऽन्यत्राऽप्यऽतिप्रसंगः परिहार्यः यत्तु धातुरिति पू
र्वाचार्यसंज्ञाग्रहणात्तंत्रस्यापि तेषां क्रियावाचको गृह्यते इति नाऽतिप्रसंग इति तन्न इत्थं हि सूत्रे वैयर्थ्यापातात्प्रथमेत्यादिवत् तत्संज्ञयैव व्यवहारसंभवात् अत्र
कश्चिदाऽऽह धातोः क्रियावाचिनः प्रत्यय इत्यत्र किं प्रमाणमिति उच्यते भगवतः पाणिनेर्वचनं भूवादय इति भ्वर्था वादयो भूवादय इति हि तदर्थः यदि तु गणपठित
त्वमात्रं तंत्र विवक्षितमऽभविष्यत् तदा भ्वादय इत्येवाऽवक्ष्यत् भुवो वार्थं वदंतीति भ्वर्था वा वादयः स्मृताः इति कात्यायनवचनमपि मानं क्रियावाचका भ्वादय इति हि

वै·भ्रा· तस्यार्थः समानशब्दानां प्रतिषेध इति हि नागनाथवचनमपि मानं अक्रियावचनेष्वतिप्रसंगवारणार्थं हि तत् यास्कवचनमपि भावप्रधानमाख्यातं सत्वप्रधाना
ल·भा· निनामानीति भावः क्रिया आख्यातं धातुः॥ आख्यायेते फलभावने अनेनेति व्युत्पत्तेः ननु प्रसिद्धं प्रत्ययमाख्यातशब्दस्यार्थं विहायैवं कथं व्याख्यायत इति चेत्॥
२८ शृणु सत्वप्रधानानि नामानीति साहचर्यात् अन्यथा तु पदइत्येवावक्ष्यत् अतः प्रकृतिसाहचर्याद्धातुरेव गृह्यते न तु प्रत्यय इति तथा पदजातानामाख्यातोपस
र्गा इति तेनैवोक्तं अत्राऽपि प्रकृतिसाहचर्याद्धातुरेवाख्यातशब्देन ग्रहीतुमुचितः साध्यत्वेन क्रियात्र धातुरूपनिबंधनासिद्धरूपस्तु यत्तस्याः सघञादिनिबंधन
इति हरिणाप्युक्तं धातुवाच्यायाः क्रियायाः साध्यत्वेपीदं वचनं मानमिति दिक् का पुनः क्रिया उच्यते करोत्यर्थभूता उत्पादनाऽपरपर्याया उत्पत्त्यनुकूलव्यापारसंतान
रूपा भावनैव क्रिया तथाहि अभवतो गगनादेरक्रियमाणतया भवतश्च घटादेः क्रियमाणतया भवत्यर्थकर्तुः करोति कर्मत्वं तथा च करोत्यर्थकर्तुर्भवितृप्रयोजकत
या भवतेरुत्पत्त्यर्थात्प्रयोजकव्यापारे णिजुत्पद्यमानः करोत्यर्थमवलंबते उक्तं च करोतेः क्रियमाणेन न कश्चित्कर्मणा विना भवत्यर्थस्य कर्ता च करोतेः कर्म जाय
ते करोत्यर्थस्य पक्तर्ता भवितुः सप्रयोजकः भवितानपेक्ष्यास्य प्रयोज्यत्वं प्रपद्यते प्रयोज्यकर्तृके कांतव्यापारप्रतिपादकाः ण्यंता एव प्रयुज्यंते तेन प्रयोजकक
र्मसु तेन भूतिषु कर्तृत्वं प्रतिपन्नस्य वस्तुनः प्रयोजकक्रियामाहुर्भावनां भावनाविद इति सर्वे धातवो धातुत्वेन तस्या वाचकाः अत एव किं करोतीति प्रश्ने पचति पा
ठतीत्याद्युत्तरं संगच्छते प्रातिस्विकेन रूपेण पचित्वादिना विक्लित्त्यादेः फलस्य वाचकाः फलं तु प्रायेण व्यापारे साध्यत्वेनान्वेति ज्योतिष्टोमेन स्वर्गकामो यजेतेत्या राम
दौ क्वचित्तु साधनत्वेनाऽन्वेति क्रिया च व्यापारत्वेन धातोर्वाच्या न तु फूत्कारत्वयत्नत्वादिरूपेण पचतीत्युक्ते फूत्कारादेरप्रतीतेः क्वचित्प्रकरणादिना तत्प्रतीतावपि २८
समुदायेवृत्ताशब्दा अवयवेष्वपि वर्तंते इति न्यायो बोध्यः तदुक्तं गुणभूतैरवयवैः समूहः क्रमजन्मनां बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते न चाऽसौ मीमांसको
क्तरीत्या आख्यातवाच्यैवास्तामिति वाच्यं भोक्तव्यमित्यादावाऽऽख्यातं विनाऽपि तत्प्रतीतेः तथा च तत्राऽपि कारकाऽपेक्षा दृश्यते अस्ति च तत्रापि करोति सामानाऽधि
करण्यं किं कर्तव्यं भोक्तव्यं किं कृतवान् भुक्तवानिति किंच भावयति घटमिति कथन्न मते भवति घटमित्यऽपि स्यात् तुल्यार्थत्वात् दृष्टांते हि कर्तुः कुंभकारस्य व्यापारं॥

ञिगाचन्यायदार्ढ्यमिति केत्वाऽऽख्यातप्रत्ययः ननु प्रयोजकव्यापारोऽप्यर्थः कर्तृव्यापारत्वादाख्यातार्थ इति वैषम्यमिति चेत् कारकचक्रप्रयोक्तुः कर्तृत्वेन तदस्याऽतथात्वात
पदितु धातुनाऽऽक्षिप्यं नित्यं कारकेऽकर्तृतेष्यते इति भर्तृहरिप्रतिपादितरीत्या प्राधान्येन धातूपात्तव्यापाराश्रयत्वरूपं कर्तृत्वं न वाऽपि संमतं कर्तृत्वहीदानीमाख्या
तार्थः व्यापारस्य धातुनैवाऽभिहितत्वात् अपि च धातोः सकर्मकाऽकर्मकत्वविभाग उच्छिद्येत ननु सिद्धान्तेऽपि क्रियायाः कर्मापेक्षानियमात्कथमकर्मतेति
चेत् न फलव्यापारयोः सामानाधिकरण्यवैयधिकरण्याभ्यां सकर्मकाऽकर्मकविभागस्य संभवात् अथ स्ववाच्यव्यापारव्यधिकरणफलवाचकत्वं सकर्म
कत्वं स्ववाच्यव्यापारसमानाधिकरणफलवाचकत्वमकर्मकत्वमिति तव मतं मयानु स्वोत्तराख्यातवाच्यव्यापारव्यधिकरणफलवाचकत्वं सकर्मकत्वं स्वोत्त
राख्यातवाच्यव्यापारसमानाधिकरणफलवाचकत्वमकर्मकत्वं धातोः सेद्धाऽनिद्रुवदिति वाच्यमिति चेत् न घटो भवतीत्यत्राऽतिप्रसंगस्य सत्त्वात् भावनायाः
कुलालाश्रयत्वात् फलस्य चोत्पत्तेर्घटाश्रयत्वात् अथ व्यापारव्यधिकरणसमानाधिकरणत्वमेवाऽकर्मकत्वादेर्लक्षणं ब्रूषे तथाप्युक्तातिप्रसंगस्तदवस्थ एव का
रकचक्रप्रयोक्तुः कर्तृत्वाऽभ्युपगमात् किंच धातोः फलं आख्यातस्य च कर्तावाच्यः भावनैवाऽऽक्षेपलभ्येति स्वीकुरु न च तथा सति प्राधान्यप्रतीतिर्न स्यादिति वा
च्यं व्यक्तिवदुपपत्तेः तव मते हि गवादिशब्दानां जातिरेव वाच्या व्यक्तिस्त्वाक्षेपलभ्या वाहदोहादौ तस्या एव प्राधान्यं साक्षादन्वयात् तद्वद् भावनाया अपि भविष्य
ति किंच आकृत्यधिकरणोक्तरीत्या भावनात्वमेव वाच्यं स्यात् तव मते न भावना तस्या घटादिवदाऽऽक्षेपात् ननु क्रियाया धात्वर्थत्वे पचतीत्यादौ एककर्तृका
वर्तमाना पचिक्रियेति क्रियाविशेष्यको बोधो न स्यात् प्रत्ययार्थं प्रति प्रकृत्यर्थस्य विशेषणतया औपगवादौ क्लृप्तत्वादिति चेन्न अजा गौरीत्यादौ आबीपोर्वाच्यं
स्त्रीत्वमिति पक्षे स्त्रीत्वस्य वैश्वदेवीत्यादौ आमिक्षां देवतायुक्तां वदन्त्येव तद्धितः इति भट्टपादोक्तेस्तद्धितार्थस्य देवतायाश्च विशेषणत्वांगीकारात् आख्याता
र्थस्य कर्तुरपि विशेषणत्वोपपत्तेः किंच युष्मदि समानाधिकरणे मध्यमः अस्मद्युत्तम इत्यादि पुरुषव्यवस्था त्वन्मते न संभवति युष्मदस्मदादिवाच्यकारकवा
चित्वाऽभावात् उक्तं कर्तरि प्रथम इत्यादि च न स्यात् कर्तुः प्रत्ययेनाऽनुक्तेः न च समानाधिकरणे इत्यनेन स्वाभिधेयसंख्यान्वयित्वं अभिहितशब्देन चाभिहितसंख्याक

वै॰ व्या॰ त्वं विवक्षितमिति वाच्यं कृत्वाऽननुगुणत्वात् कृत्तद्धितसमासैः संख्याया अनभिधानात्तदभिहिते तृतीयाप्रसंगात् न च कृत्यनभिधानमेव कर्तुरनभिधानमिति
ल॰ भा॰ वाच्यं भावार्थप्रत्ययेऽपि कर्तरि प्रथमापत्तेरिति दिक् तार्किकास्त्वन्यथ्येनेदोषास्तुल्याः नेहीत्यमाहुः आख्यातस्य यत्नोऽर्थः यत्नत्वस्य जातिरूपस्याऽवच्छेदकावला
२९ भात् न कर्तो कृतिमतः कर्तृत्वे न तत्र शक्तौ गौरवात् यत्नार्थककरोतिना सर्वाख्यातविवरणादर्शनाच्च रथो गच्छतीत्यादौ यत्नाभावाद्व्यापारे लक्षणा यत्नो
हि प्रथमान्तार्थविशेषणमाश्रयत्वं च संसर्गः पचति चैत्र इत्यस्य पाकानुकूलकृतिमान् चैत्र इति प्रथमान्तविशेष्यको बोध इति अत्रोच्यते कृतिमान् कर्तेति नाऽस्म
न्मते लक्षणं किंतु धातूपात्तव्यापाराश्रयः कर्तेति व्यापारस्य धातुनैवोपादानात् नाऽऽख्यातस्य तदंशे शक्तिः कल्प्या यत्नस्यापि व्यापारविशेषत्वेन धातुनैव
लाभात् न तत्राख्यातस्य शक्तिः किंत्वाश्रये आख्यातस्य शक्तिः आश्रयत्वं च शक्यतावच्छेदकं तच्चाऽखंडोपाधिरूपमिति न जातिनो दोषः यद्वा आश्रयत्वमेव
वाच्यं तदेव तादात्म्येनाऽवच्छेदकं च रथो गच्छतीत्यत्र त्वया त्रयं कल्प्यं शक्तिज्ञानमनुपपत्तिज्ञानं शक्यसंबंधज्ञानं च ममतु शक्तिज्ञानमेवैकं कल्प्यमिति लाघवं
अयं यदि निरूढलक्षणा स्वीक्रियते तर्हि सा शक्तितो नाममात्रेणाभिद्यते नार्थतः अनादित्वस्योभयोस्तुल्यत्वात् करोतिर्न यत्नार्थकोऽकर्मकताऽपत्तेः फला
स्थानीयत्नवाचकाहि यत्नादयोऽकर्मका दृष्टा न हि भवति घटं यतत इति एवं घटं करोतीत्यपि न स्यात् करोतिनाऽऽख्यातविवरणमसिद्धं करोतिर्हि धातोर्वि
वरणं नाऽऽख्यातस्य आख्यातस्य त्वाऽऽख्यातएव किमत्र विनिगमकमिति चेत् शृणु विनाप्याऽऽख्यातं कृत्सु करोतिना विवरणं दृश्यते पक्ता पाककर्ता पक्ववान्
पाकं कृतवान् इति धातुस्तूभयाऽनुगतोऽस्ति किंच कृञो यत्नार्थकत्वे कर्मकर्तरि प्रयोगो न स्यात् अकर्मकाणां कर्मणोऽभावात्तस्य कर्तृत्वाऽसंभवात् अस्मा
न्मते त्वाऽऽश्रयोऽर्थः तत्र संख्याऽन्वेति कर्तृप्रत्यये सव्यापारेऽन्वेति कर्मप्रत्यये तु फले कालस्तूभयत्र व्यापारे ओदनं पचति स्थाल्यां चैत्रः एकोदनाभिन्नाश्रयका राम
याविक्लित्तिस्तदनुकूलैकं चैत्राभिन्नाश्रयकस्थाल्यऽभिन्नाश्रयको वर्तमानो व्यापारः ओदनः पच्यते चैत्रेणेत्यत्रैकोदनाऽभिन्नाश्रयकायाविक्लित्तिस्तदऽनु २९
कूलएकचैत्राभिन्नाश्रयको वर्तमानो व्यापारः अत्राऽऽश्रयस्तु तृतीयार्थ इति प्रथमान्तविशेष्यके पक्षे पश्य मृगो धावतीति न सिध्येत् पश्य धावंतं मृगमिति

स्यात्स्मरणक्रियाविशेष्यस्य मृगस्य दर्शनकर्मत्वात् द्वितीया स्यात् तत्सामानाधिकरण्यात्तेनैरपि प्रथमा स्यात् न च तमित्यध्याहार्यं गौरवाद्वाक्यभेदापत्तेश्च न चेदमे
कं वाक्यं नेति वाच्यं नागनाथादिभिरेकवाक्यत्वस्य स्वीकारात् न चाऽत्र मृगो दिदर्शयिषितः तथा सति मृगं पश्येत्यस्यैवानुवचनत्वात् धावतीत्यस्य वैयर्थ्यप्रसंगात् सिद्धां
तत्रु शीघ्रं स्मरणमेव दिदर्शयिषितं तस्य मृगाश्रयत्वात् मृगाश्रयोपादानं तिवं नातु न द्वितीया नामत्वाऽभावात् भावनायाः प्रत्ययार्थत्ववदन् प्रष्टव्यः यः प्रत्ययार्थ
स प्रधानमित्युच्यते त्वया किं वा यः प्रधानं स प्रत्ययार्थ इति नाऽऽद्यः संख्याकालयोः प्रत्ययार्थयोरपि प्राधान्यादर्शनात् नाऽन्त्यः चित्रग्वादौ प्रधानस्याऽन्यपदार्थ
स्य प्रत्ययार्थत्वादर्शनात् तस्माद्धातुवाच्या क्रियाविशेष्येत्यत्र न कश्चिद्दोष इति दिक् ननु सन्ति भवन्ति विद्यन्तिषु क्रियावाचित्वमव्याप्तं न हि तत्रोत्पादना प्रतीयते
एवं तिष्ठतावपि तथा जायते उत्पद्यते इत्यत्राऽपि उत्पत्तिर्हि आद्यक्षणसंबंधः तदनुकूलव्यापारश्चोत्पादना तदऽनुभवश्चास्त्यादिभ्यो नास्त्येव च अत एव किं करो
तीति प्रश्ने पचतीत्यादिवदस्तीति न प्रतिब्रुवते इति चेत् उच्यते अस्तीत्यादेः स्वरूपधारणं करोतीत्यर्थः धारणं चोत्तरकालसंबंधस्तथा सत्त्याऽपि करोत्यऽर्थो
न धात्वर्थान्तरगतेन धारणेनैव भाव्याकांक्षायाः पूरणाज्जीवतिनृत्यतीत्यादिवदकर्मकता तत्राहि व्यापारव्यधिकरणैवोत्पत्तिरुच्यते अत एव तत्र घटादीनां
कर्मता परसमवेत व्यापारफलीभूतोत्पत्तिशालित्वात् जनिप्रभृतिभिस्तु व्यापारसमानाधिकरणैवोच्यते अत एवाऽकर्मकता तेषां स्वोत्पत्त्यऽनुकूलव्यापार
भाजामऽपि सूक्ष्मरूपापन्न घटादीनां परसमवेतत्वघटितकर्मताविरहात् तदुक्तं च हरिणा आत्मानमात्मना विभ्रदस्तीति व्यपदिश्यत इति अन्ये त्वाहुः॥
अस्त्यादावपि धर्म्यंशे भाव्येऽस्त्येव हि भावनेति दिक्॥ ॥ ॥हाटकेशपुरस्थापीविनायकसुतोऽकरोत् रघुनाथाभिधो व्याख्यां तिवन्तस्य यथामति १ ॥ २
॥ मिती कार्तिककृष्णद्वादश्यां ॥ १२ ॥ संवत् ॥ १९ ॥ ३१ ॥ गुरुवार ॥ श्रीजानकीवल्लभो विजयते ॥ … ॥ … ॥ … ॥ … ॥ … ॥

॥श्रीकाशीविश्वनाथपुरीमेढुंढिराजगणेशकेपाशदाऊअग्निहोत्रीकेयहाँसिद्धविनायकयंत्रमेसिद्धांतचंद्रिका॥
श्रीस्यातटीकालघुभाष्यसंयुक्तछापागयालिखासीताराममिश्रछापनेवालाभूमी॥ शुभंभूयात्॥ ☼ ॥

श्रीकाशीविश्वनाथपुरीमेढुंढिराजगणेशकेपाशदाऊअग्निहोत्रीकेयहांसिद्धिविनायकयंत्रमेसिद्धान्तचन्द्रिकाटीकासुबोधनीसहितछापागया धुरविनछापनेवालेसे लिखाविशेशरउपाध्या सम्वत १९२४ फाल्गुण कृष्ण २ बुधवासरे शुभम्॰

॥श्रीगणेशायनमः॥ ॥सरस्वत्यैनमः॥ ॥सार्वीयंसच्चिदानन्दं नामंनामंजगतप्रभुं॥ सिद्धांतचन्द्रिकाख्यानवृत्तिश्चक्रियतेतराम् ॥१॥ धातोः अधिका
रोयंप्राङ्नास्तोवद्सत। किमर्थोयमधिकारः उच्यतेऊरीकरोतिमुख्योभवतिसहायोस्यादित्यादौऊर्यादिच्व्यंतयोर्धातोःप्राक्प्रयोगस्यनियतत्वेनविशि
शात मत्ययोत्पत्तिर्वयानस्यात् अन्यथा अट्द्वित्वयोर्दोषोदुर्वारःस्यादित्यधिकारः भ्वादिः भवनंभूः क्रियासामान्यं आदत्ते आहयत्यर्थमित्या
दिः अतस्तंक्रियार्थः यद्वादीयतेगृह्यते अर्थोऽनेनेति आङ्पूर्वोदाञः किप्रत्ययः शब्दइतियावत् भुवःक्रियासामान्यस्यआदिर्वाचकः शब्दोधा
तुसंज्ञोभवति एवंसतिहिरुकुनानाइत्यादावव्ययेवभूवेदुत्यादावाख्याताते चाति व्याप्तिस्तेषामपिक्रियावाचकत्वात् अतोभ्वादिरित्यावर्त्यभूआदिर्यस्ये
तिबहुव्रीहियोज्यः अत्रादिशब्दोव्यवस्थायांतेनभूशब्दादारभ्यये पठितास्तेग्राह्याः तेनक्रियावाचित्वेसतिभ्वादिगणपठितत्वंधातुत्वंनामधातूनां
सधातुरितिवचनाद्धातुत्वंतेनासुगणेएवपाठ्याः कापुनःक्रियाउच्यते करोत्यर्थभूताउत्पादनाःपरपर्यायाउत्पत्त्यनुकूलव्यापारसंतानरूपभावनैवक्रियानत्व

॥श्रीगणेशायनमः॥ ॥धातोः। इदमधिक्रियते। भ्वादिः। क्रियावाचीभ्वादिर्धातुसञ्ज्ञकोभवति। आदनुदा
त्तङितः अनुदात्तेतोङितश्चधातोरात्मनेपदं॥ ञित्स्वरितेतउभे॥ ञितस्वरितेतश्चधातोरात्मनेः॥ ॥ ॥ ॥

ऽस्तिभवति। विद्यतिपुक्रियावाचित्वमव्याप्तंनहितत्रोत्पादनाप्रतीयते उत्पत्तिर्हिप्राद्यक्षणसंबंधस्तदनुकूलव्यापारश्चोत्पादनातद्भवश्चास्त्यादि
ष्वेनास्त्येवउच्यते अपठीत्यादेः स्वरूपधारणंकरोतीत्यर्थः। धारणंचोत्तरकालसंबंधः क्रियावचनः किंयाः पश्यतीत्यादौधातुत्वंमाभूत्सतिहितस्मि
न्नाःतोरित्यालोपःस्यात् आदनुदात्तङितः अनुदात्तश्चङ्च अनुदात्तङौनावितौयस्यधातोःसोऽनुदात्तङित् तस्मात् द्वंद्वांतेश्रूयमाणः इच्छब्दः प्रत्ये
कमभिसंबध्यते द्वंद्वेअल्पस्वरेतिङस्यपूर्वनिपातोनहसांतत्वात् एधायनणिस्यादिज्ञापकसिद्धंहितत् ज्ञापकसिद्धंनसर्वत्रेति देवतेदमर्थेइत्या प्र०म० १
दिनाचतस्यानित्यत्वाच्च अनुदात्तेतोङितश्चधातोरात्मनेपदंभवति। एधते शेते अन्यपदार्थत्वेनधातोराश्रयणंकिं आगमत् अशिश्रियत इञ्ङो
ङित्वेपिधातुत्वाभावान्न ञित्स्वरितेतउभे ञ इद्यस्यसञित् स्वरित इद्यस्यसस्वरितेत् ञिच्चस्वरितेच्चानयोःसमाहारःञित्स्वरितेत् तस्मात् उभयपदे

अनुसंनिहितमेवपंतुगिरीसेइत्यतः परम्स्मपते ॥ ॥परतोन्यत। परस्मादितिपरतः तत्रादिविभक्त्यर्थेइतिपंचम्यंतात्तस् परत्वस्यसावधित्वादव ध्यपेक्षायामनुदात्तङित इत्यादयः संबध्यते। अन्यत्वस्यापिसापेक्षत्वादादुभेचेतिसंबध्यतेंअनुदात्तेतोङितोनिविशदेर्ज्ञितःस्वरितेतश्चधातोः परतोन्यस्माद्धातोःकेवलंभवति। नवपं परा णयात् प्रत्येकमशब्दस्यवचनात्मकादशविधाख्यानाडऊास्तेषांनवनववचनानांसंज्ञाविधीयतेति वादीनामाद्यानिनववचनानिपंसंज्ञानिपराणिनवात् संज्ञानिप राणीतिपरशब्देननवमित्यचाद्यानीतिलभ्यंते नाम्निचयुष्मदिचास्मदिचभागेः आत्मनशब्दावनुवृत्तौसप्तम्याविपरिणामयितव्यौ आङ्कु वीत्यादेः कर्मणिकर्तरीति। चानुवर्ततेनामादिशब्देनंविवक्षितंतंगृह्यते प्रकरणात्तिवादयोदशविधा। आख्यातागृह्यंते नामाद्यर्थेकर्तरिकर्मणिचविहितानांतिवादीनांधातोरस्ययोर्या निनववचनानितानि त्रिभिर्भागैर्विभज्यप्रयोक्तव्यानियानिसंख्येननामार्थेकर्तरिप्रयुतेःप्रयुक्तेचप्रथमोभागः प्रयोक्तव्यःसपचति। तौपचतः तेपचंति। सपचते

परतोन्यत। उक्तनिमित्ताहीनाद्धातोःपम् नवपरा। तिवादीनामाद्यानिनववचनानिपसंज्ञानिस्युः पराण्यात। नाम्निच युष्मदिचास्मदिचभागेः। तिवादेकार्थेषुनामादिषूपपदेषुसत्प्रस्ययास्त्रि भिर्भागैः स्युरात्सयोः। नाम्निप्रयुज्यमा नेप्यादप्रयुज्यमानेप्रथमः। युष्मदिमध्यमः। अस्मद्युत्तमः ॥ ११तौपचेते तेपचंते अप्रयुक्ते पचति पचतः पचंति पचते पचेते प चंते नाम्न्यर्थेकर्मणि ओदनः पच्यते [illegible]नौपच्येते ओदनाः पच्यंते। अप्रयुक्ते पच्यते पच्येते पच्यंते पंचकर्मणिनास्तियुष्मदर्थे कर्तरित्वं पचसियुवांपच थः यूयं[illegible]पचसेयुवांपचेथे यूयंपचध्वे अप्रयुक्ते पचसिपचथः पचथ। पचसेपचेथे पचध्वेयुष्मदर्थेकर्मणिप्रयुक्ते त्वंदुःखेक्रियसेएगैः युवांदुःखि ताक्रियेथे यूयंदुःखितक्रियध्वे अप्रयुक्ते क्रियसे क्रियेथे क्रियध्वे अस्मदर्थेकर्तरिप्रयुक्ते। अहंपचामि आवांपचावः वयंपचामः अहंपचे आवांपचाव हे वयंपचामहे अप्रयुक्ते पचामि पचावः पचामः पचे पचावहे पचामहे अस्मदर्थे कर्मणिप्रयुक्ते विरागैः सुख्यहंक्रिये आवांक्रियावहे वयंक्रियामहे ॥अ प्रयुक्ते क्रिये क्रियावहे क्रियामहे त्वयापच्यते मयापच्यते इत्यत्रयुष्मदाद्यर्थे आख्यातस्यविधानाभावान्नमध्यमोत्तमौप्रथमातिक्रमेकारणाभावात् ॥: प्रथमएवतन्निर्हिताव्यात प्रवृत्तौसत्रमध्यमःप्राप्नोतिभवद्युष्मच्छब्दयोरेकार्थत्वादितिचेन्न तयोरर्थभेदात् अलिंगःसंबोधनविषयश्चयुष्मदर्थः॥ ॥

वैं० प्रा० टी० सु० २

भवदर्थस्तुलिंगवान्नचसंबोधनैकविषय इति त्वद्रूपः त्वत्कल्पः त्वत्तरः पचसि मद्रूपः मत्कल्पः मत्तरः पचामीत्यत्र तरादेर्विशेषणत्वेनाऽकर्तृत्वात् युष्मद
स्मदर्थस्यैव कर्तृत्वान्मध्यमोत्तमौ भवतः अतित्वंप्रियस्त्वंपचसि अत्यहं प्रियाहं पचामी सत्र पूर्वपदान्यपदार्थयोः प्राधान्येन कर्तृत्वात् युष्मदस्मदर्थयो
र्गौणत्वेन कर्तृत्वाभावात् न मध्यमोत्तमौ एवमऽत्वत्वं संपद्यते त्वद्भवतीत्यादावपि च्व्यंतेहि संधीभवंतिब्राह्मणा इत्यत्र गुणे धेन प्रकृतेः कर्तृत्वं विकृतेः क
र्तृत्वे तु संधीभवति ब्राह्मणा इति स्यात् अत्रापि युष्मदस्मदर्थयोर्विकृतित्वेनाऽकर्तृत्वं न दुक्तम् यदाच्व्यर्थे विनिर्दिष्टे भवतो युष्मदस्मदी हृयोरपि तयोर्यो
गेन धातोर्मध्यमोत्तमौ १ प्रकृतेर्विकृतेर्वापि द्योकदा प्रतिपादने वाचकः प्रकृतेः संख्यां गृह्णाति विकृतेर्नतु २ अतएव स्युद्घटोभवति ओदनस्तंडुलाभ

॥ ॥ कर्तरिपञ्च ॥ चादान् ॥ भूसत्तायाम् ॥ ॥

वंतीति प्रयुज्यते तिवादिभिः सह एकोऽर्थो एषां ते तिवाद्येकार्थास्ते युष्मदादीनां यः कर्त्रादिरर्थः स एव कर्त्रादिरर्थो नामादीनामित्यर्थः तिवाद्येकार्थेष्वि
ति किं त्वां पश्यति । त्वयाक्रियते तुभ्यं ददाति कर्तरिपंच कर्तरिवाच्ये धातोः पं भवति च कारादादविपचति आख्यातप्रत्ययेनोक्तत्वात् कर्तरि प्रथमा न तु
भावकर्मकर्तृष्वाद्विधानात् कथं निर्णयः स्यात् मैवं प्रयोगान्निर्णयसंभवात् आस्तेशेते नर इत्यत्र कर्तरि प्रथमादर्शनात् कर्तर्येव शय्यते आस्यते नरे राम०
णेत्यत्र कर्तरि तृतीयादर्शनाद्भावे आत् चक्रे करिष्यते वा घटं कुलाल इत्यत्र कर्तर्यात् चक्रे करिष्यते वा घटः कुलालेनेत्यत्र कर्मण्यात् कर्मणि प्रथमा २
याः कर्तरि तृतीयायाश्च दर्शनात् कृषीष्ट कर्तृत्सत्रत्वऽनिर्णय एवं यथा गमाभ्यामित्यत्रा निर्णयः ॥ ॥ ॐ ॥ ॥ ॐ ॥ ॥ ॐ ॥ ॥

लट् लिट् लोट् लङ् लिट् लिङ् लुट् लृट् लृङ् लुङ्

वर्तमाने तिप् तस् अंति सिप् थस् थ मिप् वस् मस् ते आते अंते से आथे ध्वे ए वहे महे व्यापारे इति शेषः व्यापारः क्रिया सा च धातोर्वाच्या १ सा त्रिविधा अतीताना
गतवर्तमानभेदात् तत्र वर्तमानक्रियायां वर्तमानाद्धातोस्तिवादयो भवंति ते च द्योतका वर्तमानक्रियाया धातुनैवोक्तत्वात् यदि तु सद्य आदिरित्यतः कालेइ सत्तु
वर्तते वर्तमाने काले वाच्ये तिवादयः इति व्याख्यायते तदा वाचका अपि भवंति कालस्य धातुनाभिहितत्वात् अथ को वर्तमानः प्रारब्धापरिसमाप्तो व
र्तमानः भूरस्तीत्यादौ कथं वर्तमानादिः प्रारब्धापरिसमाप्तत्वाद्यभावात् उच्यते सृष्टिसंहारस्फूर्तिमात्रमस्वीकर्तॄणां मते अत्राप्यस्ति वर्तमानत्वं कल्पादौ
प्रारब्धायाः स्थितेरपरिसमाप्तत्वात् तस्थुः पर्वता भविष्यति भूरित्यादौ त्वतीतानागतकल्पावाद्यायभूतभविष्यतेवोध्ये क्रियाफलयोर्वाचको धातुः कालः सं

वर्तमाने तिप् तस् अन्ति सिप् थस् थ मिप् वस् मस् ते आते अन्ते से आथे ध्वे ए वहे महे वर्तमानार्थक्रियावृत्ते
र्धातोस्तिवादयः प्रत्ययास्युः एषां स्त्र्याल्लट् अपकर्तरि कर्त्रर्थेषु तिवादिषु चतुर्षु दिव्यर्थन्तेषु परतो धातोरप् स्यात्
गुणः नाम्यन्तस्य धातोर्गुणो भवति भवति ॥ ॥ एरव्याकारकं चाख्यातार्थः तत्र तिवादित्वेन कालोर्थः तिप्त्वतस्त्वांतित्वेनएकत्वद्वित्वब
हुत्वरूपाः संख्यार्थः आत्वेन भावकर्मणी अर्थः आत्वेन यत्वेन च कर्त्रर्थः तत्र फलस्य कर्मण्यन्वयः फलाश्रयस्य कर्मत्वात् व्यापारस्य कर्तर्यन्वयो धातू
पात्तव्यापाराश्रयस्य कर्तृत्वात् संख्यायास्तु कर्तरि प्रत्यये कर्तर्यन्वयः कर्मणि प्रत्यये कर्मण्यन्वयः कालस्य क्रियायामन्वयः कर्तृकर्मणी क्रियायाः विशे
षणे क्रिया तु विशेष्येति शाब्दिकमतं वर्तमानोऽर्थो यस्याः सा वर्तमानार्था सा चासौ क्रिया चेति शाकपार्थिवादित्वान्मध्यमपदलोपः वर्तमानक्रियातत्र वृत्तिर्य
स्य तत्तथा तस्मात् तिवित्यादेः समाहारे एकपद्यं अन्यथा समासे द्वादशपदत्वम् अपकर्तरि कर्तरि इति नाऽयोऽभिधेयमाख्यातोक्तत्वात् किंत्वऽनुवृत्त
स्य चतुर्थ्येस्य विशेषणं धातोरप् स्यात् कर्त्रर्थे चतुर्षु परतः अपः पित्त्वमपित्वादेर्ङिद्वित्त्वाङित्वाभावार्थं अन्यथा भवत् इत्यादौ ङित्वाद्गुणो न स्यात् गुणः
अचो दोषमिन इति नियमान्नामिनः हस्वस्य धातोर्विशेषणत्वात्तदंतविधिः ॥ ॥ ❁ ॥ ॥

चं० प्रा० अपितादिङित् पकृतस्यस्यसपित् ताऽआदिर्येषसतादिः पित्वतादिश्च अपितादिभ्यामन्योऽपितादिः नञितिसमासः ङित्ङिदित्यर्थः अत्रपर्युदासवलात्
टी० सु० अपितादिभिन्नः प्रत्ययएवगृह्यते नधातुः ननुसादेः कृतांचानेनङित्वंकुतोनेतिचेत् मैवंपङ्नङोङित्वकरणात् ज्ञापकात् नानिटिसेट्इतिसूत्रारंभाच्च अ
३ न्तः परिशेषात्तिवादीनां चतुर्विधानामाख्यातानां तद्धिकरणानां चानेनङित्वं नान्येषां तेन विभर्याचकारस्यादावामोन ङित्वंङित्स्यद्युस्तिकृत् चङ्कौतावितीय
स्सतव्यात्तस्मिन् अद्युसीतिविशेषणाद्धित्वनिमित्तेऽस्मिन् अजुहवुः अदेःअच्च एचेति पृथक्पदे अविभक्तिके अतदुत्सनुवृत्तं अतोलोपोभवति अतिएति
वभवति पचे अतः किंब्रुवंति ब्रुवतेपरः किंयांतिगैः आख्यातप्रकरणएववा यंविधिस्तेननस्यादावतिव्याप्तिः ब्वोए वव् भव् ब्वोतयोः अतःआत्वंभवति ॥

अपितादिङित् पकारेतनत्तादिकञ्च विहायान्यःप्रत्ययोङिद्भूत्स्मात् क्ङिसचुति किंतिङितिचपरेधातोर्वृद्धिगुणौनहर्वच
नहेतुकेडसिगुणःस्यात् इतिनसिगुणप्राप्तौ अक्निमित्तोगुणः भवतः अदे अतोलोपोभवत्यकारे एकारेचपरे भवन्ति भव
सि भवथः भवथ ब्वोए वमयोः परतोऽतआत्वंस्यात् भवामि भवावः भवामः सभवति त्वम्भवसि अहम्भवामि युगपत्प्राप्तौ
परः सचत्वञ्च भवथः त्वञ्चअहंचभवावः ॥ ॥ ११ ब्वोः भवामि भवावः भवामः अतः किंचितुवः चितुमः आख्यातप्रकरणएव युगप

त्प्राप्तौपरः सचत्वंचपंडितौभवथः अहंचसचपंडिताभवामः॥ इत्सवत्रत्रयाणांनामाद्यर्थानांकर्तृत्वेनैकदाप्राप्तौपरत्वात् मध्यमोत्तमौभवतः उक्तं राम०
च एकदाचेत् क्रियाकालसंवंधप्रतिपादनं धातोर्नामादिपृक्तेषु यःपरःसपुमान्भवेत् १ परत्वंचविधायकसूत्रापेक्षयानप्रयोगापेक्षयाग्राह्यम् ॥ ३
अस्मदर्थस्यैकत्वेपिसमुदायाश्रितासंख्याग्राह्यातदुक्तं ह्योर्नाम्नोर्वहूनांवाप्यदिवाक्येसमुच्चयः नामत्रयाश्रितासंख्या कृतिवाद्योर्विशेषणम् १
सचत्वंच अहंचेतिसहविवक्षायां त्वेकशेषोभवतिसंख्यातुसमुदायाश्रिता ॥ ⁘ ॥ ॥

विधिसंभावनयोः यात् यातां युस् यास् यातं यात यां याव याम ईत् ईयातां ईरन् ईयास् ईयाथां ईध्वं ईय ईवहि ईमहि धातोर्यादादयः प्रत्ययाःस्युर्विधि। संभावनयोर्वाच्यत्वे रित्यर्थं वाचकतापक्षः न चात्र पक्षे विध्यादिनाऽर्थेन कर्त्राद्यर्थवाधो विरोधाभावात् यद्वा विधिसंभावनयोर्वर्तमानाद्धातोर्यादादयः। प्रत्ययाःस्युः विध्याद्यर्थस्य विशेष्यस्य प्रकृत्यर्थविशेषणत्वे द्योतकतापक्षोऽयं विपूर्वाद्धाञोऽन्तर्भावितण्यर्थान्नड् कीइतिभावे किः विधिविधाने दुसस्मादं

विधिसंभावनयोः यात् यातम् युस् यास् यातम् यात याम याव याम ईत ईयाताम् ईरन् ईयास् ईयायाम् ईध्वम् ईय ईवहि ईमहि विधिः कर्तव्यार्थोपदेशः सम्भावनं कल्पनम् तत्र यादादयः प्रत्यया भवन्ति एषां सञ्ज्ञा लिङ् या अतः परो या इस्यात् भवेत् भवेताम् युसइट् अतः परस्य युस ईडागमः स्यात् भवेयुः भवेः भवेतम् भवेत यामियम् अतः परो यामियं स्यात् भवेयम् भवेव भवेम शिष्यो गुरुशुश्रूषको भवेदिति विधिः भवेदसौ वेदविद्ब्राह्मणत्वात्॥ ॥

तर्भावितण्यर्थाद्धाञः किः विधानं वेधनं वा विधिः अनुष्ठापनाकारणाप्रवर्तनेति यावत् साप्रवर्तनाश्रुतिवाक्यनिष्ठा लौकिकवाक्ये पित्रादिवक्तृनिष्ठा च संपूर्वकाद्भवतेः श्वोण्यन्तात्प्रेरणे स्वार्थेवाण्णिः भावे युट् ततः स्त्रियामाप् संभावना कल्पना ऊहः कर्तव्यः करणीयोऽर्थस्तस्योपदेशो विधिः या अविभक्तिको निर्देशः अतः परो याइः स्यात् अतः किंयुयात् तपरः किं यायात् युसइट् अतः परस्य युस इट् स्यात् टित्वादादौ यामियं अतः किंयुर्यात् तपरः किं यायाम्॥

वै० प्र० आशीः प्रेरणयोः तुप् तां अंतु हि तं त आनिप् आवप् आमप् तां आतां अंतां स्व आथां ध्वं ऐप् आवहैप् आमहैप् धातोस्तुवादयः स्युराशीः प्रेरणयोर्वा
ती० सु० अनयोरितिवाचकतापक्षः आशीः प्रेरणयोर्वर्त्तमानाद्धातोरिति द्योतकतापक्षः आशासनमाशीः आङः शासु इच्छायां ततः क्विप् आतइत्वं निपाततः प
४ त्वं मपूर्वदीर्गिसाविस्सस्मात्प्रेरणार्थं यंता द्वावेसुदू प्रेरणाप्रवर्तनाविधिशब्दार्थ एव आशीश्च प्रेरणाच आशीःप्रेरणे तयोः आशीः प्रेरणयोः आशास
नं चाप्राप्तस्यैव संभवतीत्यप्राप्तप्रार्थनमाशीः सा च स्वस्य परस्य च संभवति परस्येष्टार्थशंसनं वाशीरिदमप्यप्राप्तविषयमेव यद्यपियादादितुवादयो

आशीःप्रेरणयोः तुप् ताम् आन्तु हि तम् त आनिप् आवप् आमप् ताम् आताम् अनाम् स्व आथाम् ध्वम्
ऐप् आवहैप् आमहैप् अप्राप्तप्रार्थनमाशीः परस्येष्टार्थशंसनं वा प्रेरणमप्रवर्तनम् तत्र तुवादयः एषां स
म्ज्ञालोट् तुह्योस्तातङाशिषि वा भवतु भवतात् भवताम् भवन्तु आतः अतः परस्य हेर्लुक् भवति भव भव
तात् भवतम् भवत भवानि भवाव भवाम अध्ययनायोद्यतो भव सौम्य आयुष्मान् भवतु भवान् ॥ ६ ॥

नकालविशेषे विहिताः तथापि भविष्यत्कालोऽत्र गम्यते अतीतवर्तमानयोर्विध्याद्यसंभवात् तुह्योस्तातङाशिषि वा तुश्च हिश्च तुही तयोः एम०
अनन्यार्थं हि ङित्त्वमस्यादेशं प्रयोजयति अत्र तु गुणवृद्धिप्रतिषेधे संप्रसारणे च चरितार्थत्वात् ङित्त्वस्यानेकाल्त्वात् सर्वादेशता भूतात् एधतात् इत्यादि ४
स्मादि अतः स्थानिवद्भावेन तातङो हित्वे पि लोपो न आवो हेरित्सतो वेस्यानुवृत्तस्तस्य व्यवस्थितत्वेन स्वीकारात् ॥ ॥ ॥ ॥ ६ ॥

अनद्यतने अतीते दिप् तां अन् सिप् तं त अमिप् वं मं तन् आतां अं तं यास् आयां ध्वं इ वहि महि अनद्यतने ऽतीते काले द्योत्ये वाच्ये वा धातो दिवा
द्येभवंति अस्मिन्नहनीत्यस्य अद्यशब्दवाच्यः कियान्कालः अतीतरात्रेरंतिमं यामद्वयमागामिन्याः प्रथमं यामद्वयं मध्यवर्ती दिवसः सकलः एषोऽद्य
शब्दवाच्यः कालः अद्यभवोऽद्यतनः अद्यतनाद्भिन्नः अनद्यतनः अनद्यतनकालस्त्रिविधः अतीतोऽनागतो वर्तमानश्च तत्राद्यतनेऽतीते भूते सिः अद्यतने वर्त
माने तिबादि अद्यतनेऽनागते लृट् नास्त्यद्यतनो यस्मिन्निति बहुव्रीहिः यद्वा अनद्यतनादन्योऽनद्यतनः इति नञ्तत्पुरुषः अन्वरे इत्सन्नाम्नेति
अनद्यतने ऽतीते दिप् ताम् अन् सिप् तम् त अमिप् व म तन् आताम् अन यास् आथाम् ध्वम् इ वहि महि अती।
तायाः रात्रेर्यामद्वयाद्दिवसस्यावदागामिन्याः प्रथमं यामद्वयं दिवसः सकलः सोऽद्यतनः नास्त्यद्यतनो यस्मिन्नतीते काले
तत्र दिवादयः एषां संज्ञा लङ् दिसिमीनामिकारस्योच्चारणार्थः दिवादावट् दिवादौ परे धातोरडागमः स्यात् अभवत्
अभवताम् अभवन् अभवः अभवतम् अभवत अभवम् अभवाव अभवाम ह्योऽभवत्तत्पुत्रः परोक्षे णप् अतुस् उ
स् थप् अथुस् अ णप् व म ए आते इरे से आथे ध्वे ए वहे महे धातोः परोक्षेऽतीतकाले णबादयः एषां संज्ञा लिट्
लोपः शेतिनलोपस्तु नविधानसामर्थ्यात् तस्मिन् ह्यस्तने काले दिवादिर्शादिपरे ऽपरोक्षे णादिविधानात् दिवादावट् दिवादाविति सप्तमी
निर्देशाद्दिव्यवधानेः आत्र आटेवेवाट पश्चाद्दिवादिः परोक्षे णप् अतुस् उस् थप् अथुस् अणप् वम ए आते इरे से आथे ध्वे एवहे महे
अनद्यतनातीतपरोक्षार्थक्रियावृत्तेर्धातोर्णबादिरिति द्योतकतापक्षः अनद्यतनातीतपरोक्षार्थे णबादिरिति वाचकतापक्षः अक्ष्णः परः प
रोक्षः टादकादेशः अस्य लोपः आक्ष्णादिद्रियात् परइतिवा अक्षिदमाद्यंतस्य परस्त्वमितिपंचम्यंतस्य परस्त्वं परशब्दाऽकारस्योकारो निपातनात् ॥

द्विश्च णवादौ स्यनुवर्तते सन्नभ्यावि परीत्यम्यते धातोर्द्विर्वचनं भवति णवादौ परे द्वौ वारौ विति द्विः द्विश्चि चतुर्भ्यं इति क्रियाहत्तौ सुः अत्र क्रियावाचकं विना
क्रियाहत्तेरसंभवात् वचनमित्यध्याहृियते तच्च कृदंतं तदपेक्षया धातोरिति कर्मणि षष्ठी धातोर्द्विरुच्चारणं कर्तव्यं इत्यर्थः अनंतरस्येति न्यायेनोक्त्या
द्वियोगेनैव द्विस्त्वं न विदो नवा ना मिति विहित णादि योगे अत्र द्विर्वचनं द्विप्रयोग एव न त्वादेशः तेन तु तोसे स्यादौ कृतस्य सस्याऽभावात् षत्वं न सस्वर
आदिर्द्विरेद्विः अद्विरुक्तः किं वो भूयिषते णादिः किंत् अपिताः दिङि द्विस्तोऽपि दिस्तनुहृतेण आदिर्ये स्याष्टादशात्मकस्य समुदायस्य णादिः कित्
द्विश्च उक्ताये णवादियोगे धातोर्द्विर्वचनम् सस्वर आदिर्द्विरेद्विः अनेकस्वरस्य धातोः सस्वर आद्योऽवयवोऽद्विरुक्तो द्विर्भ
वति णादिः कित् अपिणादिः कित्स्यात् आम्बोऽस्यैदौ पूर्वस्याकारस्य भूशब्दस्य वाकारेणादौ हृस्वः पूर्वसम्बधिनो दीर्घस्य हृ
स्वः स्यात् झपानां जवचपाः पूर्वस्य झपानां जवाश्चपास्सुः झ ढ ध घ भानां ज्ब ड द ग बा भवन्ति खफछठथानां चटतकपाः
भुवोवुक् भुवो वुगागमो भवति णादौ स्वरे परे बभूव बभूवतुः बभूवुः कादेर्णादेः कृसृभृवृस्तुद्रुस्रुश्रुभ्य इत्येतेभ्यः परस्य वसादेर्णा
देरिण्न अन्यस्मात् भवतीति नियमादिट् बभूविथ बभूवथुः बभूव बभूव बभूविव बभूविम बलिर्बलवान्बभूव ॥ ॥ ६ ॥
किहृत कार्यातिदेशोमंई जतुः जुहवतुः आम्बोर्णादौ अस्य भूस्य अभ्यौतयोः पूर्वस्य हृस्वादित्यतः पूर्वस्येत्यनुवर्तते हृस्वः पूर्वस्यस्वरस्य हृस्वः स्या
त् बभूवेत्यत्र तु आम्बो रिति कृतस्य दीर्घस्येत्यर्थः झपानां जवचपाः वर्ग्यो वर्ग्येणेति स्थानैक्या आदेशा भवंति भुवोवुक् कृताकृतप्रसंगित्वेन नित्यत्वात् प्राग ५
त् प्रथमं वुक् ततो वुको धात्ववयवत्वात् हुण द्हीन कादेर्णादेः डुकृञ् करणे कृञ् हिंसायामिति सुभौगः ह्वेते स्तगतौ भृञ्भरणे डुभृञ् धारणपोष
णयोरित्युभौ हृङ् सम्भक्तौ वृञ् वरणे इत्युभौ द्रु गतौ ष्टुञ् स्तुतौ श्रु श्रवणे स्त्रु गतौ एते कादयः कृसृभृ इति त्रयाणामनुदात्तत्वान्नेकस्वरादिति महे

त्वाश्रयेड्विनिषेधेप्राप्तेरड्‌ऋद्धोस्मूदात्तत्वात्कित् इतिप्रसंगयाश्रये इडागनिषेधे प्राप्तेदुस्त्वादीनां चतुर्णामस्वरांतत्वात् स्वरांतादत्तश्चेतीड्विकल्पेप्रा
प्तेवनियमः॥ ॥आशिषिपात्पास्तांयासुसपास्पास्तंयास्तयासंयास्वयास्मसीष्टसीयास्तांसीरन्सीष्ठास्सीयास्तांसीध्वंसी यसीवहिसीमहि धातो
र्योद्यादयः आशीर्वादेवाच्येयहाप्रार्थ्यमानक्रियाहन्तेर्द्रातोरितिवा आशीर्याद्यादेः पंकित् नलुङिस्तेनैवगुणवृद्धिनिषेधःसिद्धइतिचेन्नइ्यात् सु

आशिषि यात् यास्ताम् यासुस् यास् यास्तम् यास्त यासम् यास्व यास्म सीष्ट सीयास्ताम् सीरन् सीष्ठास् सीयास्थाम्
सीध्वम् सीय सीवहि सीमहि धातोराशिषि अर्थेयाद्यादयः एषांसञ्ज्ञालिङ् आशीर्याद्यादेः पंकित भूयात् भूयास्ताम्
भूयासुः भूयाः भूयास्तम् भूयास्त भूयासम् भूयास्व भूयास्म सः श्रीमान्भूयात् श्वस्तने ता तारौ तारस् तासि तास्थः ता
स्थ तास्मि तास्वस् तास्मस् ता तारौ तारस् तासे तासाथे ताध्वे ताहे तास्वहे तास्महे श्वोभाविन्यर्थेतादयः एषां स
ञ्ज्ञालुट् सिस्तासीस्यपामिट् धातोपरेषां सिस्तासीस्यपामिडागमस्स्यात् भविता भवितारौ भवितारः भवितासि
भवितास्थः भवितास्थ भवितास्मि भवितास्वः भवितास्मः श्वोभविता राज्यभारः कुमारस्य॥ ॥ ९ ॥ ॥

ष्या हिंसार्थेप्रसारणार्थंजागर्याद्दिंसादौ जागर्तेरितिगुणार्थं चकिद्वचनं श्वस्तने ता तारौ तारस् तासि तास्थस् तास्थ तास्मि तास्वस् तास्म
म ता तारौ तारस् तासे तासाथे ताध्वे ताहे तास्वहे तास्महे॥ आगामिनि दिवसे श्वोऽव्ययं श्वोभवः श्वस्तनः कालस्तस्मिन्वाच्येधातोस्ताद
यस्स्युः स्वस्वेव्यापारे वर्तमानाद्धातोरितिवा सिस्तासीस्यपामिट् धातोरित्यनुवृत्तम्॥ ॥ ९० ॥ ॥ ॥ ९ ॥ ॥ ॥

वै॰ भा॰ स्यतासेर्भविष्यतिस्यप् तिसादिर्यस्यतस्मिन् भविष्यत्यर्थे वर्तमानाद्धातोः स्यप् प्रत्ययो भवति स्यासेपरे इति भविष्यत्वं चोत्यं यद्वा धातोः स्यप् भविष्य
टी॰ सु॰ तिकाले वाच्ये तिवादौ परे प्रत्ययस्य द्वये अनुवादसामर्थ्यात्तिवादिः भविष्यतीति शत्रंतात् सप्तमी स्यप् क्रियातिक्रमे क्रियायाः अतिक्रमः अनिष्पत्तिः
६ असिद्धिरित्यर्थः भविष्यत्यनुवृत्ते उत्तरसूत्राद्भूते इति च भूते भविष्यति चार्थे वर्तमानाद्धातोर्दिवादिर्भवति क्रियाः निष्पत्तौ गम्यायां दिवादौ चप
